# Samaveda Samhita Kauthuma ShAkha

# સામવેદ સંહિતા કૌથુમ શાખા

## Document Information

Text title : sAmaveda saMhitA kauthuma shAkhA

File name : sv-kauthuma.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Anshuman Pandey pandey at umich.edu

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# Samaveda Samhita Kauthuma ShAkha

# સામવેદ સંહિતા કૌથુમ શાખા

પૂર્વાર્ચિકઃ

છન્દ આર્ચિકઃ

આગ્નેયં કાણ્ડમ્

પ્રથમઃ પ્રપાઠકઃ । પ્રથમોऽર્ધઃ

૧ ૧ ૧ ૦૧૦૧a અગ્ન આ યાહિ વીતયે ગૃણાનો હવ્યદાતયે ।
૧ ૧ ૧ ૦૧૦૧c નિ હોતા સત્સિ બર્હિષિ ॥ ૧
૧ ૧ ૧ ૦૧૦૧a ત્વમગ્ને યજ્ઞાનાઁ હોતા વિશ્વેષાઁ હિતઃ ।
૧ ૧ ૧ ૦૧૦૨c દેવેભિર્માનુષે જને ॥ ૨
૧ ૧ ૧ ૦૧૦૩a અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।
૧ ૧ ૧ ૦૧૦૩c અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ ૩
૧ ૧ ૧ ૦૧૦૪a અગ્નિર્વૃત્રાણિ જઙ્ઘનદ્દ્રવિણસ્યુર્વિપન્યયા ।
૧ ૧ ૧ ૦૧૦૪c સમિદ્ધઃ શુક્ર આહુતઃ ॥ ૪
૧ ૧ ૧ ૦૧૦૫a પ્રેષ્ઠં વો અતિથિઁ સ્તુષે મિત્રમિવ પ્રિયમ્ ।
૧ ૧ ૧ ૦૧૦૫c અગ્ને રથં ન વેદ્યમ્ ॥ ૫
૧ ૧ ૧ ૦૧૦૬a ત્વં નો અગ્ને મહોભિઃ પાહિ વિશ્વસ્યા અરાતેઃ ।
૧ ૧ ૧ ૦૧૦૬c ઉત દ્વિષો મર્ત્યસ્ય ॥ ૬
૧ ૧ ૧ ૦૧૦૭a એહ્યૂ ષુ બ્રવાણિ તેऽગ્ન ઇત્થેતરા ગિરઃ ।
૧ ૧ ૧ ૦૧૦૭c એભિર્વર્ધાસ ઇન્દુભિઃ ॥ ૭
૧ ૧ ૧ ૦૧૦૮a આ તે વત્સો મનો યમત્પરમાચ્ચિત્સધસ્થાત્ ।
૧ ૧ ૧ ૦૧૦૮c અગ્ને ત્વાં કામયે ગિરા ॥ ૮
૧ ૧ ૧ ૦૧૦૯a ત્વામગ્ને પુષ્કરાદધ્યથર્વા નિરમન્થત ।
૧ ૧ ૧ ૦૧૦૯c મૂર્ધ્નો વિશ્વસ્ય વાઘતઃ ॥ ૯
૧ ૧ ૧ ૦૧૧૦a અગ્ને વિવસ્વદા ભરાસ્મભ્યમૂતયે મહે ।
૧ ૧ ૧ ૦૧૧૦c દેવો હ્યસિ નો દૃશે ॥ ૧૦

૧ ૧ ૧ ૦૨૦૧a નમસ્તે અગ્ન ઓજસે ગૃણન્તિ દેવ કૃષ્ટયઃ ।

૧૧૧૦૨૦૧c  અમૈરમિત્રમર્દય ॥ ૧૧
૧૧૧૦૨૦૨a  દૂતં વો વિશ્વવેદસઁ હવ્યવાહમમર્ત્યમ્ ।
૧૧૧૦૨૦૨c  યજિષ્ઠમૃઞ્જસે ગિરા ॥ ૧૨
૧૧૧૦૨૦૩a  ઉપ ત્વા જામયો ગિરો દેદિશતીર્હવિષ્કૃતઃ ।
૧૧૧૦૨૦૩c  વાયોરનીકે અસ્થિરન્ ॥ ૧૩
૧૧૧૦૨૦૪a  ઉપ ત્વાગ્ને દિવેદિવે દોષાવસ્તર્ધિયા વયમ્ ।
૧૧૧૦૨૦૪c  નમો ભરન્ત એમસિ ॥ ૧૪
૧૧૧૦૨૦૫a  જરાબોધ તદ્વિવિડ્ઢિ વિશેવિશે યજ્ઞિયાય ।
૧૧૧૦૨૦૫c  સ્તોમઁ રુદ્રાય દૃશીકમ્ ॥ ૧૫
૧૧૧૦૨૦૬a  પ્રતિ ત્યં ચારુમધ્વરં ગોપીથાય પ્ર હૂયસે ।
૧૧૧૦૨૦૬c  મરુદ્ભિરગ્ન આ ગહિ ॥ ૧૬
૧૧૧૦૨૦૭a  અશ્વં ન ત્વા વારવન્તં વન્દધ્યા અગ્નિં નમોભિઃ ।
૧૧૧૦૨૦૭c  સમ્રાજન્તમધ્વરાણામ્ ॥ ૧૭
૧૧૧૦૨૦૮a  ઔર્વભૃગુવચ્છુચિમપ્નવાનવદા હુવે ।
૧૧૧૦૨૦૮c  અગ્નિઁ સમુદ્રવાસસમ્ ॥ ૧૮
૧૧૧૦૨૦૯a  અગ્નિમિન્ધાનો મનસા ધિયઁ સચેત મર્ત્યઃ ।
૧૧૧૦૨૦૯c  અગ્નિમિન્ધે વિવસ્વભિઃ ॥ ૧૯
૧૧૧૦૨૧૦a  આદિત્પ્રત્નસ્ય રેતસો જ્યોતિઃ પશ્યન્તિ વાસરમ્ ।
૧૧૧૦૨૧૦c  પરો યદિધ્યતે દિવિ ॥ ૨૦

૧૧૧૦૩૦૧a  અગ્નિં વો વૃધન્તમધ્વરાણાં પુરૂતમમ્ ।
૧૧૧૦૩૦૧c  અચ્છા નપ્ત્રે સહસ્વતે ॥ ૨૧
૧૧૧૦૩૦૨a  અગ્નિસ્તિગ્મેન શોચિષા યઁસદ્વિશ્વં ન્યાઉત્રિણમ્ ।
૧૧૧૦૩૦૨c  અગ્નિર્નો વઁસતે રયિમ્ ॥ ૨૨
૧૧૧૦૩૦૩a  અગ્ને મૃડ મહાઁ અસ્યય આ દેવયું જનમ્ ।
૧૧૧૦૩૦૩c  ઇયેથ બર્હિરાસદમ્ ॥ ૨૩
૧૧૧૦૩૦૪a  અગ્ને રક્ષા ણો અઁહસઃ પ્રતિ સ્મ દેવ રીષતઃ ।
૧૧૧૦૩૦૪c  તપિષ્ઠૈરજરો દહ ॥ ૨૪
૧૧૧૦૩૦૫a  અગ્ને યુઙ્ક્ષ્વા હિ યે તવાશ્વાસો દેવ સાધવઃ ।
૧૧૧૦૩૦૫c  અરં વહન્ત્યાશવઃ ॥ ૨૫
૧૧૧૦૩૦૬a  નિ ત્વા નક્ષ્ય વિશ્પતે દ્યુમન્તં ધીમહે વયમ્ ।
૧૧૧૦૩૦૬c  સુવીરમગ્ન આહુત ॥ ૨૬

૧ ૧ ૧ ૦૩૦૭a અગ્નિર્મૂર્ધા દિવઃ કકુત્પતિઃ પૃથિવ્યા અયમ્ ।
૧ ૧ ૧ ૦૩૦૭c અપાँ રેતાँસિ જિન્વતિ ॥ ૨૭
૧ ૧ ૧ ૦૩૦૮a ઇમમૂ ષુ ત્વમસ્માકँ સનિં ગાયત્રં નવ્યाँસમ્ ।
૧ ૧ ૧ ૦૩૦૮c અગ્ને દેવેષુ પ્ર વોચઃ ॥ ૨૮
૧ ૧ ૧ ૦૩૦૯a તં ત્વા ગોપવનો ગિરા જનિષ્ઠદગ્ને અઙ્ગિરઃ ।
૧ ૧ ૧ ૦૩૦૯c સ પાવક શ્રુધી હવમ્ ॥ ૨૯
૧ ૧ ૧ ૦૩૧૦a પરિ વાજપતિઃ કવિરગ્નિર્હવ્યાન્યક્રમીત્ ।
૧ ૧ ૧ ૦૩૧૦c દધદ્રત્નાનિ દાશુષે ॥ ૩૦
૧ ૧ ૧ ૦૩૧૧a ઉદુ ત્યં જાતવેદસં દેવં વહન્તિ કેતવઃ ।
૧ ૧ ૧ ૦૩૧૧c દૃશે વિશ્વાય સૂર્યમ્ ॥ ૩૧
૧ ૧ ૧ ૦૩૧૨a કવિમગ્નિમુપ સ્તુહિ સત્યધર્માણમધ્વરે ।
૧ ૧ ૧ ૦૩૧૨c દેવમમીવચાતનમ્ ॥ ૩૨
૧ ૧ ૧ ૦૩૧૩a શં નો દેવીરભિષ્ટયે શં નો ભવન્તુ પીતયે ।
૧ ૧ ૧ ૦૩૧૩c શં યોરભિ સ્રવન્તુ નઃ ॥ ૩૩
૧ ૧ ૧ ૦૩૧૪a કસ્ય નૂનં પરીણસિ ધિયો જિન્વસિ સત્પતે ।
૧ ૧ ૧ ૦૩૧૪c જોષાતા યસ્ય તે ગિરઃ ॥ ૩૪

૧ ૧ ૧ ૦૪૦૧a યજ્ઞાયજ્ઞા વો અગ્નયે ગિરાગિરા ચ દક્ષસે ।
૧ ૧ ૧ ૦૪૦૧c પ્રપ્ર વયમમૃતં જાતવેદસં પ્રિયં મિત્રં ન શँસિષમ્ ॥ ૩૫
૧ ૧ ૧ ૦૪૦૨a પાહિ નો અગ્ન એકયા પાહ્યૂઉત દ્વિતીયયા ।
૧ ૧ ૧ ૦૪૦૨c પાહિ ગીર્ભિસ્તિસૃભિરૂર્જાં પતે પાહિ ચતસૃભિર્વસો ॥ ૩૬
૧ ૧ ૧ ૦૪૦૩a બૃહદ્ભિરગ્ને અર્ચિભિઃ શુક્રેણ દેવ શોચિષા ।
૧ ૧ ૧ ૦૪૦૩c ભરદ્વાજે સમિધાનો યવિષ્ઠ્ય રેવત્પાવક દીદિહિ ॥ ૩૭
૧ ૧ ૧ ૦૪૦૪a ત્વે અગ્ને સ્વાહુત પ્રિયાસઃ સન્તુ સૂરયઃ ।
૧ ૧ ૧ ૦૪૦૪c યન્તારો યે મઘવાનો જનાનામૂર્વં દયન્ત ગોનામ્ ॥ ૩૮
૧ ૧ ૧ ૦૪૦૫a અગ્ને જરિતર્વિશ્પતિસ્તપાનો દેવ રક્ષસઃ ।
૧ ૧ ૧ ૦૪૦૫c અપ્રોષિવાન્ગૃહપતે મહाँ અસિ દિવસ્પાયુર્દુરોણયુઃ ॥ ૩૯
૧ ૧ ૧ ૦૪૦૬a અગ્ને વિવસ્વદુષસશ્ચિત્રँ રાધો અમર્ત્ય ।
૧ ૧ ૧ ૦૪૦૬c આ દાશુષે જાતવેદો વહા ત્વમદ્યા દેવाँ ઉષર્બુધઃ ॥ ૪૦
૧ ૧ ૧ ૦૪૦૭a ત્વં નશ્ચિત્ર ઊત્યા વસો રાધाँસિ ચોદય ।
૧ ૧ ૧ ૦૪૦૭c અસ્ય રાયસ્ત્વમગ્ને રથીરસિ વિદા ગાધં તુચે તુ નઃ ॥ ૪૧
૧ ૧ ૧ ૦૪૦૮a ત્વમિત્સપ્રથા અસ્યગ્ને ત્રાતરૃતઃ કવિઃ ।

૧ ૧ ૧ ૦૪૦૮c ત્વાં વિપ્રાસઃ સમિધાન દીદિવ આ વિવાસન્તિ વેધસઃ ॥ ૪૨
૧ ૧ ૧ ૦૪૦૯a આ નો અગ્ને વયોવૃધઁ રયિં પાવક શઁસ્યમ્ ।
૧ ૧ ૧ ૦૪૦૯c રાસ્વા ચ ન ઉપમાતે પુરુસ્પૃહઁ સુનીતી સુયશસ્તરમ્ ॥ ૪૩
૧ ૧ ૧ ૦૪૧૦a યો વિશ્વા દયતે વસુ હોતા મન્દ્રો જનાનામ્ ।
૧ ૧ ૧ ૦૪૧૦c મધોર્ન પાત્રા પ્રથમાન્યસ્મૈ પ્ર સ્તોમા યન્ત્વગ્નયે ॥ ૪૪

૧ ૧ ૧ ૦૫૦૧a એના વો અગ્નિં નમસોર્જો નપાતમા હુવે ।
૧ ૧ ૧ ૦૫૦૧c પ્રિયં ચેતિષ્ઠમરતિઁ સ્વાધ્વરં વિશ્વસ્ય દૂતમમૃતમ્ ॥ ૪૫
૧ ૧ ૧ ૦૫૦૨a શેષે વનેષુ માતૃષુ સં ત્વા મર્તાસ ઇન્ધતે ।
૧ ૧ ૧ ૦૫૦૨c અતન્દ્રો હવ્યં વહસિ હવિષ્કૃત આદિદ્દેવેષુ રાજસિ ॥ ૪૬
૧ ૧ ૧ ૦૫૦૩a અદર્શિ ગાતુવિત્તમો યસ્મિન્વ્રતાન્યાદધુઃ ।
૧ ૧ ૧ ૦૫૦૩c ઉપો ષુ જાતમાર્યસ્ય વર્ધનમગ્નિં નક્ષન્તુ નો ગિરઃ ॥ ૪૭
૧ ૧ ૧ ૦૫૦૪a અગ્નિરુક્થે પુરોહિતો ગ્રાવાણો બર્હિરધ્વરે ।
૧ ૧ ૧ ૦૫૦૪c ઋચા યામિ મરુતો બ્રહ્મણસ્પતે દેવા અવો વરેણ્યમ્ ॥ ૪૮
૧ ૧ ૧ ૦૫૦૫a અગ્નિમીડિષ્વાવસે ગાથાભિઃ શીરશોચિષમ્ ।
૧ ૧ ૧ ૦૫૦૫c અગ્નિઁ રાયે પુરુમીઢ શ્રુતં નરોઽગ્નિઃ સુદીતયે છર્દિઃ ॥ ૪૯
૧ ૧ ૧ ૦૫૦૬a શ્રુધિ શ્રુત્કર્ણ વહ્નિભિર્દેવૈરગ્ને સયાવભિઃ ।
૧ ૧ ૧ ૦૫૦૬c આ સીદતુ બર્હિષિ મિત્રો અર્યમા પ્રાતર્યાવભિરધ્વરે ॥ ૫૦
૧ ૧ ૧ ૦૫૦૭a પ્ર દૈવોદાસો અગ્નિર્દેવ ઇન્દ્રો ન મજ્મના ।
૧ ૧ ૧ ૦૫૦૭c અનુ માતરં પૃથિવીં વિ વાવૃતે તસ્થૌ નાકસ્ય શર્મણિ ॥ ૫૧
૧ ૧ ૧ ૦૫૦૮a અધ જ્મો અધ વા દિવો બૃહતો રોચનાદધિ ।
૧ ૧ ૧ ૦૫૦૮c અયા વર્ધસ્વ તન્વા ગિરા મમા જાતા સુક્રતો પૃણ ॥ ૫૨
૧ ૧ ૧ ૦૫૦૯a કાયમાનો વના ત્વં યન્માતૃરજગન્નપઃ ।
૧ ૧ ૧ ૦૫૦૯c ન તત્તે અગ્ને પ્રમૃષે નિવર્તનં યદ્દૂરે સન્નિહાભુવઃ ॥ ૫૩
૧ ૧ ૧ ૦૫૧૦a નિ ત્વામગ્ને મનુર્દધે જ્યોતિર્જનાય શશ્વતે ।
૧ ૧ ૧ ૦૫૧૦c દીદેથ કણ્વ ઋતજાત ઉક્ષિતો યં નમસ્યન્તિ કૃષ્ટયઃ ॥ ૫૪

પ્રથમ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૧ ૧ ૨ ૦૬૦૧a દેવો વો દ્રવિણોદાઃ પૂર્ણાં વિવષ્ટ્વાસિચમ્ ।
૧ ૧ ૨ ૦૬૦૧c ઉદ્વા સિઞ્ચધ્વમુપ વા પૃણધ્વમાદિદ્વો દેવ ઓહતે ॥ ૫૫
૧ ૧ ૨ ૦૬૦૨a પ્રૈતુ બ્રહ્મણસ્પતિઃ પ્ર દેવ્યેતુ સૂનૃતા ।
૧ ૧ ૨ ૦૬૦૨c અચ્છા વીરં નર્યં પઙ્ક્તિરાધસં દેવા યજ્ઞં નયન્તુ નઃ ॥ ૫૬
૧ ૧ ૨ ૦૬૦૩a ઊર્ધ્વ ઊ ષુ ણ ઊતયે તિષ્ઠા દેવો ન સવિતા ।

૧ ૧ ૨ ૦૬૦૩c ઊર્ધ્વો વાજસ્ય સનિતા યદઞ્જિભિર્વાઘદ્ભિર્વિહ્વયામહે ॥ ૫૭
૧ ૧ ૨ ૦૬૦૪a પ્ર યો રાયે નિનીષતિ મર્તો યસ્તે વસો દાશત્ ।
૧ ૧ ૨ ૦૬૦૪c સ વીરં ધત્તે અગ્ન ઉક્થશઁસિનં ત્મના સહસ્રપોષિણમ્ ॥ ૫૮
૧ ૧ ૨ ૦૬૦૫a પ્ર વો યહ્વં પુરૂણાં વિશાં દેવયતીનામ્ ।
૧ ૧ ૨ ૦૬૦૫c અગ્નિઁ સૂક્તેભિર્વચોભિર્વૃણીમહે યઁસમિદન્ય ઇન્ધતે ॥ ૫૯
૧ ૧ ૨ ૦૬૦૬a અયમગ્નિઃ સુવીર્યસ્યેશે હિ સૌભગસ્ય ।
૧ ૧ ૨ ૦૬૦૬c રાય ઈશે સ્વપત્યસ્ય ગોમત ઈશે વૃત્રહથાનામ્ ॥ ૬૦
૧ ૧ ૨ ૦૬૦૭a ત્વમગ્ને ગૃહપતિસ્ત્વઁ હોતા નો અધ્વરે ।
૧ ૧ ૨ ૦૬૦૭c ત્વં પોતા વિશ્વવાર પ્રચેતા તાક્ષિ યાસિ ચ વાર્યમ્ ॥ ૬૧
૧ ૧ ૨ ૦૬૦૮a સખાયસ્ત્વા વવૃમહે દેવં મર્તાસ ઊતયે ।
૧ ૧ ૨ ૦૬૦૮c અપાં નપાતઁ સુભગઁ સુદઁસસઁ સુપ્રતૂર્તિમનેહસમ્ ॥ ૬૨

૧ ૧ ૨ ૦૭૦૧a આ જુહોતા હવિષા મર્જયધ્વં નિ હોતારં ગૃહપતિં દધિધ્વમ્ ।
૧ ૧ ૨ ૦૭૦૧c ઇડસ્પદે નમસા રાતહવ્યઁ સપર્યતા યજતં પસ્ત્યાનામ્ ॥ ૬૩
૧ ૧ ૨ ૦૭૦૨a ચિત્ર ઇચ્છિશોસ્તરુણસ્ય વક્ષથો ન યો માતરાવન્વેતિ ધાતવે ।
૧ ૧ ૨ ૦૭૦૨c અનૂધા યદજીજનદધા ચિદા વવક્ષત્સદ્યો મહિ દૂત્યાઉં ચરન્ ॥ ૬૪
૧ ૧ ૨ ૦૭૦૩a ઇદં ત એકં પર ઊ ત એકં તૃતીયેન જ્યોતિષા સં વિશસ્વ ।
૧ ૧ ૨ ૦૭૦૩c સંવેશનસ્તન્વેઉ ચારુરેધિ પ્રિયો દેવાનાં પરમે જનિત્રે ॥ ૬૫
૧ ૧ ૨ ૦૭૦૪a ઇમઁ સ્તોમમર્હતે જાતવેદસે રથમિવ સં મહેમા મનીષયા ।
૧ ૧ ૨ ૦૭૦૪c ભદ્રા હિ નઃ પ્રમતિરસ્ય સઁસદ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૬૬
૧ ૧ ૨ ૦૭૦૫a મૂર્ધાનં દિવો અરતિં પૃથિવ્યા વૈશ્વાનરમૃત આ જાતમગ્નિમ્ ।
૧ ૧ ૨ ૦૭૦૫c કવિઁ સમ્રાજમતિથિં જનાનામાસન્નાઃ પાત્રં જનયન્ત દેવાઃ ॥ ૬૭
૧ ૧ ૨ ૦૭૦૬a વિ ત્વદાપો ન પર્વતસ્ય પૃષ્ઠાદુક્થેભિરગ્ને જનયન્ત દેવાઃ ।
૧ ૧ ૨ ૦૭૦૬c તં ત્વા ગિરઃ સુષ્ટુતયો વાજયન્ત્યાજિં ન ગિર્વવાહો જિગ્યુરશ્વાઃ ॥ ૬૮
૧ ૧ ૨ ૦૭૦૭a આ વો રાજાનમધ્વરસ્ય રુદ્રઁ હોતારઁ સત્યયજઁ રોદસ્યોઃ ।
૧ ૧ ૨ ૦૭૦૭c અગ્નિં પુરા તનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥ ૬૯
૧ ૧ ૨ ૦૭૦૮a ઇન્ધે રાજા સમર્યો નમોભિર્યસ્ય પ્રતીકમાહુતં ઘૃતેન ।
૧ ૧ ૨ ૦૭૦૮c નરો હવ્યેભિરીડતે સબાધ આગ્નિરગ્રમુષસામશોચિ ॥ ૭૦
૧ ૧ ૨ ૦૭૦૯a પ્ર કેતુના બૃહતા યાત્યગ્નિરા રોદસી વૃષભો રોરવીતિ ।
૧ ૧ ૨ ૦૭૦૯c દિવશ્ચિદન્તાદુપમામુદાનડપામુપસ્થે મહિષો વવર્ધ ॥ ૭૧
૧ ૧ ૨ ૦૭૧૦a અગ્નિં નરો દીધિતિભિરણ્યોર્હસ્તચ્યુતં જનયત પ્રશસ્તમ્ ।
૧ ૧ ૨ ૦૭૧૦c દૂરેદૃશં ગૃહપતિમથવ્યુમ્ ॥ ૭૨

૧ ૧ ૨ ૦૮૦૧a અબોધ્યગ્નિઃ સમિધા જનાનાં પ્રતિ ધેનુમિવાયતીમુષાસમ્ ।
૧ ૧ ૨ ૦૮૦૧c યહ્વા ઇવ પ્ર વયામુજ્જિહાનાઃ પ્ર ભાનવઃ સસ્રતે નાકમચ્છ ॥ ૭૩
૧ ૧ ૨ ૦૮૦૨a પ્ર ભૂર્જયન્તં મહાં વિપોધાં મૂરૈરમૂરં પુરાં દર્માણમ્ ।
૧ ૧ ૨ ૦૮૦૨c નયન્તં ગીર્ભિર્વના ધિયં ધા હરિશ્મશ્રું ન વાર્મણા ધનર્ચિમ્ ॥ ૭૪
૧ ૧ ૨ ૦૮૦૩a શુક્રં તે અન્યદ્યજતં તે અન્યદ્વિષુરૂપે અહની દ્યૌરિવાસિ ।
૧ ૧ ૨ ૦૮૦૩c વિશ્વા હિ માયા અવસિ સ્વધાવન્ભદ્રા તે પૂષન્નિહ રાતિરસ્તુ ॥ ૭૫
૧ ૧ ૨ ૦૮૦૪a ઇડામગ્ને પુરુદँસँ સનિં ગોઃ શશ્વત્તમँ હવમાનાય સાધ ।
૧ ૧ ૨ ૦૮૦૪c સ્યાન્નઃ સૂનુસ્તનયો વિજાવાગ્ને સા તે સુમતિર્ભૂત્વસ્મે ॥ ૭૬
૧ ૧ ૨ ૦૮૦૫a પ્ર હોતા જાતો મહાન્નભોવિન્નૃષદ્મા સીદદપાં વિવર્તે ।
૧ ૧ ૨ ૦૮૦૫c દધદ્યો ધાયી સુતે વયाँસિ યન્તા વસૂનિ વિધતે તનૂપાઃ ॥ ૭૭
૧ ૧ ૨ ૦૮૦૬a પ્ર સમ્રાજમસુરસ્ય પ્રશસ્તં પુँસઃ કૃષ્ટીનામનુમાદ્યસ્ય ।
૧ ૧ ૨ ૦૮૦૬c ઇન્દ્રસ્યેવ પ્ર તવસસ્કૃતાનિ વન્દદ્વારા વન્દમાના વિવષ્ટુ ॥ ૭૮
૧ ૧ ૨ ૦૮૦૭a અરણ્યોર્નિહિતો જાતવેદા ગર્ભ ઇવેત્સુભૃતો ગર્ભિણીભિઃ ।
૧ ૧ ૨ ૦૮૦૭c દિવેદિવ ઈડ્યો જાગૃવદ્ભિર્હવિષ્મદ્ભિર્મનુષ્યેભિરગ્નિઃ ॥ ૭૯
૧ ૧ ૨ ૦૮૦૮a સનાદગ્ને મૃણસિ યાતુધાનાન્ન ત્વા રક્ષाँસિ પૃતનાસુ જિગ્યુઃ ।
૧ ૧ ૨ ૦૮૦૮c અનુ દહ સહમૂરાન્કયાદો મા તે હેત્યા મુક્ષત દૈવ્યાયાઃ ॥ ૮૦

૧ ૧ ૨ ૦૯૦૧a અગ્ન ઓજિષ્ઠમા ભર દ્યુમ્નમસ્મભ્યમધ્રિગો ।
૧ ૧ ૨ ૦૯૦૧c પ્ર નો રાયે પનીયસે રત્સિ વાજાય પન્થામ્ ॥ ૮૧
૧ ૧ ૨ ૦૯૦૨a યદિ વીરો અનુ ષ્યાદગ્નિમિન્ધીત મર્ત્યઃ ।
૧ ૧ ૨ ૦૯૦૨c આજુહ્વદ્ધવ્યમાનુષક્શર્મ ભક્ષીત દૈવ્યમ્ ॥ ૮૨
૧ ૧ ૨ ૦૯૦૩a ત્વેષસ્તે ધૂમ ઋણ્વતિ દિવિ સં ચ્છુક્ર આતતઃ ।
૧ ૧ ૨ ૦૯૦૩c સૂરો ન હિ દ્યુતા ત્વં કૃપા પાવક રોચસે ॥ ૮૩
૧ ૧ ૨ ૦૯૦૪a ત્વँ હિ ક્ષૈતવદ્યશોઽગ્ને મિત્રો ન પત્યસે ।
૧ ૧ ૨ ૦૯૦૪c ત્વં વિચર્ષણે શ્રવો વસો પુષ્ટિં ન પુષ્યસિ ॥ ૮૪
૧ ૧ ૨ ૦૯૦૫a પ્રાતરગ્નિઃ પુરુપ્રિયો વિષ સ્તવેતાતિથિઃ ।
૧ ૧ ૨ ૦૯૦૫c વિશ્વે યસ્મિન્નમર્ત્યે હવ્યં મર્તાસ ઇન્ધતે ॥ ૮૫
૧ ૧ ૨ ૦૯૦૬a યદ્વાહિષ્ઠં તદગ્નયે બૃહદર્ચ વિભાવસો ।
૧ ૧ ૨ ૦૯૦૬c મહિષીવ ત્વદ્રયિસ્ત્વદ્વાજા ઉદીરતે ॥ ૮૬
૧ ૧ ૨ ૦૯૦૭a વિશોવિશો વો અતિથિં વાજયન્તઃ પુરુપ્રિયમ્ ।
૧ ૧ ૨ ૦૯૦૭c અગ્નિં વો દુર્યં વચઃ સ્તુષે શૂષસ્ય મન્મભિઃ ॥ ૮૭
૧ ૧ ૨ ૦૯૦૮a બૃહદ્વયો હિ ભાનવેઽર્ચા દેવાયાગ્નયે ।

૧ ૧ ૨ ૦૯૦૮c યં મિત્રં ન પ્રશસ્તયે મર્તાસો દધિરે પુરઃ ॥ ૮૮
૧ ૧ ૨ ૦૯૦૯a અગન્મ વૃત્રહન્તમં જ્યેષ્ઠમગ્નિમાનવમ્ ।
૧ ૧ ૨ ૦૯૦૯c ય સ્મ શ્રુતર્વન્નાર્ક્ષે બૃહદનીક ઇધ્યતે ॥ ૮૯
૧ ૧ ૨ ૦૯૧૦a જાતઃ પરેણ ધર્મણા યત્સવૃદ્ભિઃ સહાભુવઃ ।
૧ ૧ ૨ ૦૯૧૦c પિતા યત્કશ્યપસ્યાગ્નિઃ શ્રદ્ધા માતા મનુઃ કવિઃ ॥ ૯૦

૧ ૧ ૨ ૧૦૦૧a સોમઁ રાજાનં વરુણમગ્નિમન્વારભામહે ।
૧ ૧ ૨ ૧૦૦૧c આદિત્યં વિષ્ણુઁ સૂર્યં બ્રહ્માનં ચ બૃહસ્પતિમ્ ॥ ૯૧
૧ ૧ ૨ ૧૦૦૨a ઇત એત ઉદારુહન્દિવઃ પૃષ્ઠાન્યા રુહન્ ।
૧ ૧ ૨ ૧૦૦૨c પ્ર ભૂર્જયો યથા પથોદ્યામઙ્ગિરસો યયુઃ ॥ ૯૨
૧ ૧ ૨ ૧૦૦૩a રાયે અગ્ને મહે ત્વા દાનાય સમિધીમહિ ।
૧ ૧ ૨ ૧૦૦૩c ઈડિષ્વા હિ મહે વૃષં દ્યાવા હોત્રાય પૃથિવી ॥ ૯૩
૧ ૧ ૨ ૧૦૦૪a દધન્વે વા યદીમનુ વોચદ્બ્રહ્મેતિ વેરુ તત્ ।
૧ ૧ ૨ ૧૦૦૪c પરિ વિશ્વાનિ કાવ્યા નેમિશ્ચક્રમિવાભુવત્ ॥ ૯૪
૧ ૧ ૨ ૧૦૦૫a પ્રત્યગ્ને હરસા હરઃ શ◌ૃણાહિ વિશ્વતસ્પરિ ।
૧ ૧ ૨ ૧૦૦૫c યાતુધાનસ્ય રક્ષસો બલં ન્યુબ્જવીર્યમ્ ॥ ૯૫
૧ ૧ ૨ ૧૦૦૬a ત્વમગ્ને વસૂઁરિહ રુદ્રાઁ આદિત્યાઁ ઉત ।
૧ ૧ ૨ ૧૦૦૬c યજા સ્વધ્વરં જનં મનુજાતં ઘૃતપ્રુષમ્ ॥ ૯૬

દ્વિતીય પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

૧ ૨ ૧ ૦૧૦૧a પુરુ ત્વા દાશિવાઁ વોચેઽરિરગ્ને તવ સ્વિદા ।
૧ ૨ ૧ ૦૧૦૧c તોદસ્યેવ શરણ આ મહસ્ય ॥ ૯૭
૧ ૨ ૧ ૦૧૦૨a પ્ર હોત્રે પૂર્વ્યં વચોઽગ્નયે ભરતા બૃહત્ ।
૧ ૨ ૧ ૦૧૦૨c વિપાં જ્યોતીઁષિ બિભ્રતે ન વેધસે ॥ ૯૮
૧ ૨ ૧ ૦૧૦૩a અગ્ને વાજસ્ય ગોમત ઈશાનઃ સહસો યહો ।
૧ ૨ ૧ ૦૧૦૩c અસ્મે ધેહિ જાતવેદો મહિ શ્રવઃ ॥ ૯૯
૧ ૨ ૧ ૦૧૦૪a અગ્ને યજિષ્ઠો અધ્વરે દેવાં દેવયતે યજ ।
૧ ૨ ૧ ૦૧૦૪c હોતા મન્દ્રો વિ રાજસ્યતિ સ્રિધઃ ॥ ૧૦૦
૧ ૨ ૧ ૦૧૦૫a જજ્ઞાનઃ સપ્ત માતૃભિર્મેધામાશાસત શ્રિયે ।
૧ ૨ ૧ ૦૧૦૫c અયં ધ્રુવો રયીણાં ચિકેતદા ॥ ૧૦૧
૧ ૨ ૧ ૦૧૦૬a ઉત સ્યા નો દિવા મતિરદિતિરૂત્યાગમત્ ।
૧ ૨ ૧ ૦૧૦૬c સા શન્તાતા મયસ્કરદપ સ્રિધઃ ॥ ૧૦૨
૧ ૨ ૧ ૦૧૦૭a ઈડિષ્વા હિ પ્રતીવ્યાઉં યજસ્વ જાતવેદસમ્ ।

૧ ૨ ૧ ૦૧૦૭c ચરિષ્ણુધૂમમગૃભીતશોચિષમ્ ॥ ૧૦૩
૧ ૨ ૧ ૦૧૦૮a ન તસ્ય માયયા ચ ન રિપુરીશીત મર્ત્યઃ ।
૧ ૨ ૧ ૦૧૦૮c યો અગ્નયે દદાશ હવ્યદાતયે ॥ ૧૦૪
૧ ૨ ૧ ૦૧૦૯a અપ ત્યં વૃજિનઁ રિપુઁ સ્તેનમગ્ને દુરાધ્યમ્ ।
૧ ૨ ૧ ૦૧૦૯c દવિષ્ઠમસ્ય સત્પતે કૃધી સુગમ્ ॥ ૧૦૫
૧ ૨ ૧ ૦૧૧૦a શ્રુષ્ટ્યગ્ને નવસ્ય મે સ્તોમસ્ય વીર વિશ્પતે ।
૧ ૨ ૧ ૦૧૧૦c નિ માયિનસ્તપસા રક્ષસો દહ ॥ ૧૦૬

૧ ૨ ૧ ૦૨૦૧a પ્ર મઁહિષ્ઠાય ગાયત ઋતાવ્ને બૃહતે શુક્રશોચિષે ।
૧ ૨ ૧ ૦૨૦૧c ઉપસ્તુતાસો અગ્નયે ॥ ૧૦૭
૧ ૨ ૧ ૦૨૦૨a પ્ર સો અગ્ને તવોતિભિઃ સુવીરાભિસ્તરતિ વાજકર્મભિઃ ।
૧ ૨ ૧ ૦૨૦૨c યસ્ય ત્વઁ સખ્યમાવિથ ॥ ૧૦૮
૧ ૨ ૧ ૦૨૦૩a તં ગૂર્ધયા સ્વર્ણરં દેવાસો દેવમરતિં દધન્વિરે ।
૧ ૨ ૧ ૦૨૦૩c દેવત્રા હવ્યમૂહિષે ॥ ૧૦૯
૧ ૨ ૧ ૦૨૦૪a મા નો હૃણીથા અતિથિં વસુરગ્નિઃ પુરુપ્રશસ્ત એશઃ ।
૧ ૨ ૧ ૦૨૦૪c યઃ સુહોતા સ્વધ્વરઃ ॥ ૧૧૦
૧ ૨ ૧ ૦૨૦૫a ભદ્રો નો અગ્નિરાહુતો ભદ્રા રાતિઃ સુભગ ભદ્રો અધ્વરઃ ।
૧ ૨ ૧ ૦૨૦૫c ભદ્રા ઉત પ્રશસ્તયઃ ॥ ૧૧૧
૧ ૨ ૧ ૦૨૦૬a યજિષ્ઠં ત્વા વવૃમહે દેવં દેવત્રા હોતારમમર્ત્યમ્ ।
૧ ૨ ૧ ૦૨૦૬c અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ ૧૧૨
૧ ૨ ૧ ૦૨૦૭a તદગ્ને દ્યુમ્નમા ભર યત્સાસાહા સદને કં ચિદત્રિણમ્ ।
૧ ૨ ૧ ૦૨૦૭c મન્યું જનસ્ય દૂઢ્યમ્ ॥ ૧૧૩
૧ ૨ ૧ ૦૨૦૮a યદ્વા ઉ વિશ્પતિઃ શિતઃ સુપ્રીતો મનુષો વિશે ।
૧ ૨ ૧ ૦૨૦૮c વિશ્વેદગ્નિઃ પ્રતિ રક્ષાઁસિ સેધતિ ॥ ૧૧૪

॥ ઇત્યાગ્નેય પર્વં કાણ્ડમ્ ॥

ઐન્દ્ર કાણ્ડમ્

૧ ૨ ૧ ૦૩૦૧a તદ્વો ગાય સુતે સચા પુરુહૂતાય સત્વને ।
૧ ૨ ૧ ૦૩૦૧c શં યદ્ગવે ન શાકિને ॥ ૧૧૫
૧ ૨ ૧ ૦૩૦૨a યસ્તે નૂનઁ શતક્રતવિન્દ્ર દ્યુમ્નિતમો મદઃ ।
૧ ૨ ૧ ૦૩૦૨c તેન નૂનં મદે મદેઃ ॥ ૧૧૬
૧ ૨ ૧ ૦૩૦૩a ગાવ ઉપ વદાવટે મહિ યજ્ઞસ્ય રપ્સુદા ।
૧ ૨ ૧ ૦૩૦૩c ઉભા કર્ણા હિરણ્યયા ॥ ૧૧૭

૧ ૨ ૧ ૦૩૦૪a  અરમશ્વાય ગાયત શ્રુતકક્ષારં ગવે ।
૧ ૨ ૧ ૦૩૦૪c  અરમિન્દ્રસ્ય ધામ્ને ॥ ૧૧૮
૧ ૨ ૧ ૦૩૦૫a  તમિન્દ્રં વાજયામસિ મહે વૃત્રાય હન્તવે ।
૧ ૨ ૧ ૦૩૦૫c  સ વૃષા વૃષભો ભુવત્ ॥ ૧૧૯
૧ ૨ ૧ ૦૩૦૬a  ત્વમિન્દ્ર બલાદધિ સહસો જાત ઓજસઃ ।
૧ ૨ ૧ ૦૩૦૬c  ત્વઁ સન્વૃષન્વૃષેદસિ ॥ ૧૨૦
૧ ૨ ૧ ૦૩૦૭a  યજ્ઞ ઇન્દ્રમવર્ધયદ્યદ્ભૂમિં વ્યવર્તયત્ ।
૧ ૨ ૧ ૦૩૦૭c  ચક્રાણ ઓપશં દિવિ ॥ ૧૨૧
૧ ૨ ૧ ૦૩૦૮a  યદિન્દ્રાહં તથા ત્વમીશીય વસ્વ એક ઇત્ ।
૧ ૨ ૧ ૦૩૦૮c  સ્તોતા મે ગોસખા સ્યાત્ ॥ ૧૨૨
૧ ૨ ૧ ૦૩૦૯a  પન્યંપન્યમિત્સોતાર આ ધાવત મદ્યાય ।
૧ ૨ ૧ ૦૩૦૯c  સોમં વીરાય શૂરાય ॥ ૧૨૩
૧ ૨ ૧ ૦૩૧૦a  ઇદં વસો સુતમન્ધઃ પિબા સુપૂર્ણમુદરમ્ ।
૧ ૨ ૧ ૦૩૧૦c  અનાભયિન્રરિમા તે ॥ ૧૨૪

૧ ૨ ૧ ૦૪૦૧a  ઉદ્ઘેદભિ શ્રુતામઘં વૃષભં નર્યાપસમ્ ।
૧ ૨ ૧ ૦૪૦૧c  અસ્તારમેષિ સૂર્ય ॥ ૧૨૫
૧ ૨ ૧ ૦૪૦૨a  યદદ્ય કચ્ચ વૃત્રહન્નુદગા અભિ સૂર્ય ।
૧ ૨ ૧ ૦૪૦૨c  સર્વં તદિન્દ્ર તે વશે ॥ ૧૨૬
૧ ૨ ૧ ૦૪૦૩a  ય આનયત્પરાવતઃ સુનીતી તુર્વશં યદુમ્ ।
૧ ૨ ૧ ૦૪૦૩c  ઇન્દ્રઃ સ નો યુવા સખા ॥ ૧૨૭
૧ ૨ ૧ ૦૪૦૪a  મા ન ઇન્દ્રાભ્યાऽऽ૩ દિશઃ સૂરો અક્તુષ્વા યમત ।
૧ ૨ ૧ ૦૪૦૪c  ત્વા યુજા વનેમ તત્ ॥ ૧૨૮
૧ ૨ ૧ ૦૪૦૫a  એન્દ્ર સાનસિઁ રયિઁ સજિત્વાનઁ સદાસહમ્ ।
૧ ૨ ૧ ૦૪૦૫c  વર્ષિષ્ઠમૂતયે ભર ॥ ૧૨૯
૧ ૨ ૧ ૦૪૦૬a  ઇન્દ્રં વયં મહાધન ઇન્દ્રમર્ભે હવામહે ।
૧ ૨ ૧ ૦૪૦૬c  યુજં વૃત્રેષુ વજ્રિણમ્ ॥ ૧૩૦
૧ ૨ ૧ ૦૪૦૭a  અપિબત્કદ્રુવઃ સુતમિન્દ્રઃ સહસ્રબાહ્વે ।
૧ ૨ ૧ ૦૪૦૭c  તત્રાદદિષ્ટ પૌઁસ્યમ્ ॥ ૧૩૧
૧ ૨ ૧ ૦૪૦૮a  વયમિન્દ્ર ત્વાયવોऽભિ પ્ર નોનુમો વૃષન્ ।
૧ ૨ ૧ ૦૪૦૮c  વિદ્ધી ત્વાઽસ્ય નો વસો ॥ ૧૩૨
૧ ૨ ૧ ૦૪૦૯a  આ ઘા યે અગ્નિમિન્ધતે સ્તૃણન્તિ બર્હિરાનુષક્ ।

૧ ૨ ૧ ૦૪૦૯c  યેષામિન્દ્રો યુવા સખા ॥ ૧૩૩
૧ ૨ ૧ ૦૪૧૦a  ભિન્ધિ વિશ્વા અપ દ્વિષઃ પરિ બાધો જહી મૃધઃ ।
૧ ૨ ૧ ૦૪૧૦c  વસુ સ્પાર્હં તદા ભર ॥ ૧૩૪

૧ ૨ ૧ ૦૫૦૧a  ઇહેવ શ઼ૃણ્વ એષાં કશા હસ્તેષુ યદ્વદાન્ ।
૧ ૨ ૧ ૦૫૦૧c  નિ યામં ચિત્રમૃઞ્જતે ॥ ૧૩૫
૧ ૨ ૧ ૦૫૦૨a  ઇમ ઉ ત્વા વિ ચક્ષતે સખાય ઇન્દ્ર સોમિનઃ ।
૧ ૨ ૧ ૦૫૦૨c  પુષ્ટાવન્તો યથા પશુમ્ ॥ ૧૩૬
૧ ૨ ૧ ૦૫૦૩a  સમસ્ય મન્યવે વિશો વિશ્વા નમન્ત કૃષ્ટયઃ ।
૧ ૨ ૧ ૦૫૦૩c  સમુદ્રાયેવ સિન્ધવઃ ॥ ૧૩૭
૧ ૨ ૧ ૦૫૦૪a  દેવાનામિદવો મહત્તદા વૃણીમહે વયમ્ ।
૧ ૨ ૧ ૦૫૦૪c  વૃષ્ણામસ્મભ્યમૂતયે ॥ ૧૩૮
૧ ૨ ૧ ૦૫૦૫a  સોમાનાઁ સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે ।
૧ ૨ ૧ ૦૫૦૫c  કક્ષીવન્તં ય ઔશિજઃ ॥ ૧૩૯
૧ ૨ ૧ ૦૫૦૬a  બોધન્મના ઇદસ્તુ નો વૃત્રહા ભૂર્યાસુતિઃ ।
૧ ૨ ૧ ૦૫૦૬c  શ઼ૃણોતુ શક્ર આશિષમ્ ॥ ૧૪૦
૧ ૨ ૧ ૦૫૦૭a  અદ્ય નો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ ।
૧ ૨ ૧ ૦૫૦૭c  પરા દુઃષ્વપ્ન્યઁ સુવ ॥ ૧૪૧
૧ ૨ ૧ ૦૫૦૮a  ક્વાઽસ્ય વૃષભો યુવા તુવિગ્રીવો અનાનતઃ ।
૧ ૨ ૧ ૦૫૦૮c  બ્રહ્મા કસ્તઁ સપર્યતિ ॥ ૧૪૨
૧ ૨ ૧ ૦૫૦૯a  ઉપહ્વરે ગિરીણાઁ સઙ્ગમે ચ નદીનામ્ ।
૧ ૨ ૧ ૦૫૦૯c  ધિયા વિપ્રો અજાયત ॥ ૧૪૩
૧ ૨ ૧ ૦૫૧૦a  પ્ર સમ્રાજં ચર્ષણીનામિન્દ્રઁ સ્તોતા નવ્યં ગીર્ભિઃ ।
૧ ૨ ૧ ૦૫૧૦c  નરં નૃષાહં મઁહિષ્ઠમ્ ॥ ૧૪૪

દ્વિતીય પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૧ ૨ ૨ ૦૬૦૧a  અપાદુ શિપ્રયન્ધસઃ સુદક્ષસ્ય પ્રહોષિણઃ ।
૧ ૨ ૨ ૦૬૦૧c  ઇન્દ્રોરિન્દ્રો યવાશિરઃ ॥ ૧૪૫
૧ ૨ ૨ ૦૬૦૨a  ઇમા ઉ ત્વા પુરુવસોઽભિ પ્ર નોનવુર્ગિરઃ ।
૧ ૨ ૨ ૦૬૦૨c  ગાવો વત્સં ન ધેનવઃ ॥ ૧૪૬
૧ ૨ ૨ ૦૬૦૩a  અત્રાહ ગોરમન્વત નામ ત્વષ્ટુરપીચ્યમ્ ।
૧ ૨ ૨ ૦૬૦૩c  ઇત્થા ચન્દ્રમસો ગૃહે ॥ ૧૪૭
૧ ૨ ૨ ૦૬૦૪a  યદિન્દ્રો અનયદ્રિતો મહીરપો વૃષન્તમઃ ।

૧ ૨ ૨ ૦૬૦૪c તત્ર પૂષાભુવત્સચા ॥ ૧૪૮
૧ ૨ ૨ ૦૬૦૫a ગૌર્ધયતિ મરુતાઁ શ્રવસ્યુર્માતા મઘોનામ્
૧ ૨ ૨ ૦૬૦૫c યુક્તા વહ્ની રથાનામ્ ॥ ૧૪૯
૧ ૨ ૨ ૦૬૦૬a ઉપ નો હરિભિઃ સુતં યાહિ મદાનાં પતે ।
૧ ૨ ૨ ૦૬૦૬c ઉપ નો હરિભિઃ સુતમ્ ॥ ૧૫૦
૧ ૨ ૨ ૦૬૦૭a ઇષ્ટા હોત્રા અસૃક્ષતેન્દ્રં વૃધન્તો અધ્વરે ।
૧ ૨ ૨ ૦૬૦૭c અચ્છાવભૃથમોજસા ॥ ૧૫૧
૧ ૨ ૨ ૦૬૦૮a અહમિદ્ધિ પિતુષ્પરિ મેધામૃતસ્ય જગ્રહ ।
૧ ૨ ૨ ૦૬૦૮c અહઁ સૂર્ય ઇવાજનિ ॥ ૧૫૨
૧ ૨ ૨ ૦૬૦૯a રેવતીર્નઃ સધમાદ ઇન્દ્રે સન્તુ તુવિવાજાઃ ।
૧ ૨ ૨ ૦૬૦૯c ક્ષુમન્તો યાભિર્મદેમ ॥ ૧૫૩
૧ ૨ ૨ ૦૬૧૦a સોમઃ પૂષા ચ ચેતતુર્વિશ્વાસાઁ સુક્ષિતીનામ્ ।
૧ ૨ ૨ ૦૬૧૦c દેવત્રા રથ્યોર્હિતા ॥ ૧૫૪

૧ ૨ ૨ ૦૭૦૧a પાન્તમા વો અન્ધસ ઇન્દ્રમભિ પ્ર ગાયત ।
૧ ૨ ૨ ૦૭૦૧c વિશ્વાસાહઁ શતક્રતું મઁહિષ્ઠં ચર્ષણીનામ્ ॥ ૧૫૫
૧ ૨ ૨ ૦૭૦૨a પ્ર વ ઇન્દ્રાય માદનઁ હર્યશ્વાય ગાયત ।
૧ ૨ ૨ ૦૭૦૨c સખાયઃ સોમપાવ્ને ॥ ૧૫૬
૧ ૨ ૨ ૦૭૦૩a વયમુ ત્વા તદિદર્થા ઇન્દ્ર ત્વાયન્તઃ સખાયઃ ।
૧ ૨ ૨ ૦૭૦૩c કણ્વા ઉક્થેભિર્જરન્તે ॥ ૧૫૭
૧ ૨ ૨ ૦૭૦૪a ઇન્દ્રાય મદ્વને સુતં પરિ ષ્ટોભન્તુ નો ગિરઃ ।
૧ ૨ ૨ ૦૭૦૪c અર્કમર્ચન્તુ કારવઃ ॥ ૧૫૮
૧ ૨ ૨ ૦૭૦૫a અયં ત ઇન્દ્ર સોમો નિપૂતો અધિ બર્હિષિ ।
૧ ૨ ૨ ૦૭૦૫c એહીમસ્ય દ્રવા પિબ ॥ ૧૫૯
૧ ૨ ૨ ૦૭૦૬a સુરૂપકૃત્નુમૂતયે સુદુઘામિવ ગોદુહે ।
૧ ૨ ૨ ૦૭૦૬c જુહૂમસિ દ્યવિદ્યવિ ॥ ૧૬૦
૧ ૨ ૨ ૦૭૦૭a અભિ ત્વા વૃષભા સુતે સુતઁ સૃજામિ પીતયે ।
૧ ૨ ૨ ૦૭૦૭c તૃમ્પા વ્યશ્નુહી મદમ્ ॥ ૧૬૧
૧ ૨ ૨ ૦૭૦૮a ય ઇન્દ્ર ચમસેષ્વા સોમશ્ચમૂષુ તે સુતઃ ।
૧ ૨ ૨ ૦૭૦૮c પિબેદસ્ય ત્વમીશિષે ॥ ૧૬૨
૧ ૨ ૨ ૦૭૦૯a યોગેયોગે તવસ્તરં વાજેવાજે હવામહે ।
૧ ૨ ૨ ૦૭૦૯c સખાય ઇન્દ્રમૂતયે ॥ ૧૬૩

૧ ૨ ૨ ૦૭૧૦a  આ ત્વેતા નિ ષીદતેન્દ્રમભિ પ્ર ગાયત ।
૧ ૨ ૨ ૦૭૧૦c  સખાયઃ સ્તોમવાહસઃ ॥ ૧૬૪

૧ ૨ ૨ ૦૮૦૧a  ઇદઁ હ્યન્વોજસા સુતઁ રાધાનાં પતે ।
૧ ૨ ૨ ૦૮૦૧c  પિબા ત્વાઉસ્ય ગિર્વણઃ ॥ ૧૬૫
૧ ૨ ૨ ૦૮૦૨a  મહાઁ ઇન્દ્રઃ પુરશ્ચ નો મહિત્વમસ્તુ વજ્રિણે ।
૧ ૨ ૨ ૦૮૦૨c  દ્યૌર્ન પ્રથિના શવઃ ॥ ૧૬૬
૧ ૨ ૨ ૦૮૦૩a  આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભઁ સં ગૃભાય ।
૧ ૨ ૨ ૦૮૦૩c  મહાહસ્તી દક્ષિણેન ॥ ૧૬૭
૧ ૨ ૨ ૦૮૦૪a  અભિ પ્ર ગોપતિં ગિરેન્દ્રમર્ચ યથા વિદે ।
૧ ૨ ૨ ૦૮૦૪c  સૂનુઁ સત્યસ્ય સત્પતિમ્ ॥ ૧૬૮
૧ ૨ ૨ ૦૮૦૫a  કયા નશ્ચિત્ર આ ભુવદૂતી સદાવૃધઃ સખા ।
૧ ૨ ૨ ૦૮૦૫c  કયા શચિષ્ઠયા વૃતા ॥ ૧૬૯
૧ ૨ ૨ ૦૮૦૬a  ત્યમુ વઃ સત્રાસાહં વિશ્વાસુ ગીર્ષ્વાયતમ્ ।
૧ ૨ ૨ ૦૮૦૬c  આ ચ્યાવયસ્યૂતયે ॥ ૧૭૦
૧ ૨ ૨ ૦૮૦૭a  સદસસ્પતિમદ્ભુતં પ્રિયમિન્દ્રસ્ય કામ્યમ્ ।
૧ ૨ ૨ ૦૮૦૭c  સનિં મેધામયાસિષમ્ ॥ ૧૭૧
૧ ૨ ૨ ૦૮૦૮a  યે તે પન્થા અધો દિવો યેભિર્વ્યશ્વમૈરયઃ ।
૧ ૨ ૨ ૦૮૦૮c  ઉત શ્રોષન્તુ નો ભુવઃ ॥ ૧૭૨
૧ ૨ ૨ ૦૮૦૯a  ભદ્રમ્ભદ્રં ન આ ભરેષમૂર્જં શતક્રતો ।
૧ ૨ ૨ ૦૮૦૯c  યદિન્દ્ર મૃડયાસિ નઃ ॥ ૧૭૩
૧ ૨ ૨ ૦૮૧૦a  અસ્તિ સોમો અયઁ સુતઃ પિબન્ત્યસ્ય મરુતઃ ।
૧ ૨ ૨ ૦૮૧૦c  ઉત સ્વરાજો અશ્વિના ॥ ૧૭૪

૧ ૨ ૨ ૦૯૦૧a  ઈઙ્ખયન્તીરપસ્યુવ ઇન્દ્રં જાતમુપાસતે ।
૧ ૨ ૨ ૦૯૦૧c  વન્વાનાસઃ સુવીર્યમ્ ॥ ૧૭૫
૧ ૨ ૨ ૦૯૦૨a  ન કિ દેવા ઇનીમસિ ન ક્યા યોપયામસિ ।
૧ ૨ ૨ ૦૯૦૨c  મન્ત્રશ્રુત્યં ચરામસિ ॥ ૧૭૬
૧ ૨ ૨ ૦૯૦૩a  દોષો આગાદ્બૃહદ્ગાય દ્યુમદ્ગામન્નાથર્વણ ।
૧ ૨ ૨ ૦૯૦૩c  સ્તુહિ દેવઁ સવિતારમ્ ॥ ૧૭૭
૧ ૨ ૨ ૦૯૦૪a  એષો ઉષા અપૂર્વ્યા વ્યુચ્છતિ પ્રિયા દિવઃ ।
૧ ૨ ૨ ૦૯૦૪c  સ્તુષે વામશ્વિના બૃહત્ ॥ ૧૭૮
૧ ૨ ૨ ૦૯૦૫a  ઇન્દ્રો દધીચો અસ્થભિર્વૃત્રાણ્યપ્રતિષ્કુતઃ ।

૧ ૨ ૨ ૦૯૦૫c જઘાન નવતીર્નવ ॥ ૧૭૯
૧ ૨ ૨ ૦૯૦૬a ઇન્દ્રેહિ મત્સ્યન્ધસો વિશ્વેભિઃ સોમપર્વભિઃ ।
૧ ૨ ૨ ૦૯૦૬c મહાઁ અભિષ્ટિરોજસા ॥ ૧૮૦
૧ ૨ ૨ ૦૯૦૭a આ તૂ ન ઇન્દ્ર વૃત્રહન્નસ્માકમર્ધમા ગહિ ।
૧ ૨ ૨ ૦૯૦૭c મહાન્મહીભિરૂતિભિઃ ॥ ૧૮૧
૧ ૨ ૨ ૦૯૦૮a ઓજસ્તદસ્ય તિત્વિષ ઉભે યત્સમવર્તયત્ ।
૧ ૨ ૨ ૦૯૦૮c ઇન્દ્રશ્ચર્મેવ રોદસી ॥ ૧૮૨
૧ ૨ ૨ ૦૯૦૯a અયમુ તે સમતસિ કપોત ઇવ ગર્ભધિમ્ ।
૧ ૨ ૨ ૦૯૦૯c વચસ્તચ્ચિન્ન ઓહસે ॥ ૧૮૩
૧ ૨ ૨ ૦૯૧૦a વાત આ વાતુ ભેષજઁ શમ્ભુ મયોભુ નો હૃદે ।
૧ ૨ ૨ ૦૯૧૦c પ્ર ન અયૂઁષિ તારિષત્ ॥ ૧૮૪
૧ ૨ ૨ ૧૦૦૧a યઁ રક્ષન્તિ પ્રચેતસો વરુણો મિત્રો અર્યમા ।
૧ ૨ ૨ ૧૦૦૧c ન કિઃ સ દભ્યતે જનઃ ॥ ૧૮૫
૧ ૨ ૨ ૧૦૦૨a ગવ્યો ષુ ણો યથા પુરાશ્વયોત રથયા ।
૧ ૨ ૨ ૧૦૦૨c વરિવસ્યા મહોનામ્ ॥ ૧૮૬
૧ ૨ ૨ ૧૦૦૩a ઇમાસ્ત ઇન્દ્ર પૃશ્નયો ઘૃતં દુહત આશિરમ્ ।
૧ ૨ ૨ ૧૦૦૩c એનામૃતસ્ય પિપ્યુષીઃ ॥ ૧૮૭
૧ ૨ ૨ ૧૦૦૪a અયા ધિયા ચ ગવ્યયા પુરુણામન્પુરુષ્ટુત ।
૧ ૨ ૨ ૧૦૦૪c યત્સોમેસોમ આભુવઃ ॥ ૧૮૮
૧ ૨ ૨ ૧૦૦૫a પાવકા નઃ સરસ્વતી વાજેભિર્વાજિનીવતી ।
૧ ૨ ૨ ૧૦૦૫c યજ્ઞં વષ્ટુ ધિયાવસુઃ ॥ ૧૮૯
૧ ૨ ૨ ૧૦૦૬a ક ઇમં નાહુષીષ્વા ઇન્દ્રઁ સોમસ્ય તર્પયાત્ ।
૧ ૨ ૨ ૧૦૦૬c સ નો વસૂન્યા ભરાત્ ॥ ૧૯૦
૧ ૨ ૨ ૧૦૦૭a આ યાહિ સુષુમા હિ ત ઇન્દ્ર સોમં પિબા ઇમમ્ ।
૧ ૨ ૨ ૧૦૦૭c એદં બર્હિઃ સદો મમ ॥ ૧૯૧
૧ ૨ ૨ ૧૦૦૮a મહિ ત્રીણામવરસ્તુ દ્યુક્ષં મિત્રસ્યાર્યમ્ણઃ ।
૧ ૨ ૨ ૧૦૦૮c દુરાધર્ષં વરુણસ્ય ॥ ૧૯૨
૧ ૨ ૨ ૧૦૦૯a ત્વાવતઃ પુરૂવસો વયમિન્દ્ર પ્રણેતઃ ।
૧ ૨ ૨ ૧૦૦૯c સ્મસિ સ્થાતર્હરીણામ્ ॥ ૧૯૩

તૃતીય પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૧ ૩ ૧ ૦૧૦૧a ઉત્ત્વા મન્દન્તુ સોમાઃ કૃણુષ્વ રાધો અદ્રિવઃ ।

૧ ૩ ૧ ૦૧૦૧c અવ બ્રહ્મદ્વિષો જહિ ॥ ૧૯૪
૧ ૩ ૧ ૦૧૦૨a ગિર્વણઃ પાહિ નઃ સુતં મધોર્ધારાભિરજ્યસે ।
૧ ૩ ૧ ૦૧૦૨c ઇન્દ્ર ત્વાદાતમિદ્યશઃ ॥ ૧૯૫
૧ ૩ ૧ ૦૧૦૩a સદા વ ઇન્દ્રશ્ચર્કૃષદા ઉપો નુ સ સપર્યન્ ।
૧ ૩ ૧ ૦૧૦૩c ન દેવો વૃતઃ શૂર ઇન્દ્રઃ ॥ ૧૯૬
૧ ૩ ૧ ૦૧૦૪a આ ત્વા વિશન્ત્વિન્દવઃ સમુદ્રમિવ સિન્ધવઃ ।
૧ ૩ ૧ ૦૧૦૪c ન ત્વામિન્દ્રાતિ રિચ્યતે ॥ ૧૯૭
૧ ૩ ૧ ૦૧૦૫a ઇન્દ્રમિદ્ગાથિનો બૃહદિન્દ્રમર્કેભિરર્કિણઃ ।
૧ ૩ ૧ ૦૧૦૫c ઇન્દ્રં વાણીરનૂષત ॥ ૧૯૮
૧ ૩ ૧ ૦૧૦૬a ઇન્દ્ર ઇષે દદાતુ ન ઋભુક્ષણમૃભુઁ રયિમ્ ।
૧ ૩ ૧ ૦૧૦૬c વાજી દદાતુ વાજિનમ્ ॥ ૧૯૯
૧ ૩ ૧ ૦૧૦૭a ઇન્દ્રો અઙ્ગ મહદ્ભયમભી ષદપ ચુચ્યવત્ ।
૧ ૩ ૧ ૦૧૦૭c સ હિ સ્થિરો વિચર્ષણિઃ ॥ ૨૦૦
૧ ૩ ૧ ૦૧૦૮c ઇમા ઉ ત્વા સુતેસુતે નક્ષન્તે ગિર્વણો ગિરઃ ।
૧ ૩ ૧ ૦૧૦૮a ગાવો વત્સં ન ધેનવઃ ॥ ૨૦૧
૧ ૩ ૧ ૦૧૦૯a ઇન્દ્રા નુ પૂષણા વયઁ સખ્યાય સ્વસ્તયે ।
૧ ૩ ૧ ૦૧૦૯c હુવેમ વાજસાતયે ॥ ૨૦૨
૧ ૩ ૧ ૦૧૧૦a ન કિ ઇન્દ્ર ત્વદુત્તરં ન જ્યાયો અસ્તિ વૃત્રહન્ ।
૧ ૩ ૧ ૦૧૧૦c ન ક્યેવં યથા ત્વમ્ ॥ ૨૦૩

૧ ૩ ૧ ૦૨૦૧a તરણિં વો જનાનાં ત્રદં વાજસ્ય ગોમતઃ ।
૧ ૩ ૧ ૦૨૦૧c સમાનમુ પ્ર શઁસિષમ્ ॥ ૨૦૪
૧ ૩ ૧ ૦૨૦૨a અસૃગ્રમિન્દ્ર તે ગિરઃ પ્રતિ ત્વામુદહાસત ।
૧ ૩ ૧ ૦૨૦૨c સજોષા વૃષભં પતિમ્ ॥ ૨૦૫
૧ ૩ ૧ ૦૨૦૩a સુનીથો ઘા સ મર્ત્યો યં મરુતો યમર્યમા ।
૧ ૩ ૧ ૦૨૦૩c મિત્રાસ્પાન્ત્યદ્રુહઃ ॥ ૨૦૬
૧ ૩ ૧ ૦૨૦૪a યદ્વીડાવિન્દ્ર યત્સ્થિરે યત્પર્શાને પરાભૃતમ્ ।
૧ ૩ ૧ ૦૨૦૪c વસુ સ્પાર્હં તદા ભર ॥ ૨૦૭
૧ ૩ ૧ ૦૨૦૫a શ્રુતં વો વૃત્રહન્તમં પ્ર શર્ધં ચર્ષણીનામ્ ।
૧ ૩ ૧ ૦૨૦૫c આશિષે રાધસે મહે ॥ ૨૦૮
૧ ૩ ૧ ૦૨૦૬a અરં ત ઇન્દ્ર શ્રવસે ગમેમ શૂર ત્વાવતઃ ।
૧ ૩ ૧ ૦૨૦૬c અરઁ શક્ર પરેમણિ ॥ ૨૦૯

१ ३ १ ०२०७a ધાનાવન્તં કરમ્ભિણમપૂપવન્તમુક્થિનમ્ ।
१ ३ १ ०२०७c ઇન્દ્ર પ્રાતર્જુષસ્વ નઃ ॥ २१०
१ ३ १ ०२०८a અપાં ફેનેન નમુચેઃ શિર ઇન્દ્રોદવર્તયઃ ।
१ ३ १ ०२०८c વિશ્વા યદજય સ્પૃધઃ ॥ २११
१ ३ १ ०२०९a ઇમે ત ઇન્દ્ર સોમાઃ સુતાસો યે ચ સોત્વાઃ ।
१ ३ १ ०२०९c તેષાં મત્સ્વ પ્રભૂવસો ॥ २१२
१ ३ १ ०२१०a તુભ્યઁ સુતાસઃ સોમાઃ સ્તીર્ણં બર્હિર્વિભાવસો ।
१ ३ १ ०२१०c સ્તોતૃભ્ય ઇન્દ્ર મૃડય ॥ २१३

१ ३ १ ०३०१a આ વ ઇન્દ્ર કૃવિં યથા વાજયન્તઃ શતક્રતુમ્ ।
१ ३ १ ०३०१c મઁહિષ્ઠઁ સિઞ્ચ ઇન્દુભિઃ ॥ २१४
१ ३ १ ०३०२a અતશ્ચિદિન્દ્ર ન ઉપા યાહિ શતવાજયા ।
१ ३ १ ०३०२c ઇષા સહસ્રવાજયા ॥ २१५
१ ३ १ ०३०३a આ બુન્દં વૃત્રહા દદે જાતઃ પૃચ્છદ્વિ માતરમ્ ।
१ ३ १ ०३०३c ક ઉગ્રાઃ કે હ શ◌ૃણ્વિરે ॥ २१६
१ ३ १ ०३०४a બૃબદુક્થઁ હવામહે સૃપ્રકરસ્નમૂતયે ।
१ ३ १ ०३०४c સાધઃ કૃણ્વન્તમવસે ॥ २१७
१ ३ १ ०३०५a ઋજુનીતી નો વરુણો મિત્રો નયતિ વિદ્વાન્ ।
१ ३ १ ०३०५c અર્યમા દેવૈઃ સજોષાઃ ॥ २१८
१ ३ १ ०३०६a દૂરાદિહેવ યત્સતોઽરુણપ્સુરશિશ્વિતત્ ।
१ ३ १ ०३०६c વિ ભાનું વિશ્વથાતનત્ ॥ २१९
१ ३ १ ०३०७a આ નો મિત્રાવરુણા ઘૃતૈર્ગવ્યૂતિમુક્ષતમ્ ।
१ ३ १ ०३०७c મધ્વા રજાઁસિ સુક્રતૂ ॥ २२०
१ ३ १ ०३०८a ઉદુ ત્યે સૂનવો ગિરઃ કાષ્ઠા યજ્ઞેષ્વત્નત ।
१ ३ १ ०३०८c વાશ્રા અભિજ્ઞુ યાતવે ॥ २२१
१ ३ १ ०३०९a ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ ।
१ ३ १ ०३०९c સમૂઢમસ્ય પાઁસુલે ॥ २२२

१ ३ १ ०४०१a અતીહિ મન્યુષાવિણઁ સુષુવાઁસમુપેરય ।
१ ३ १ ०४०१c અસ્ય રાતૌ સુતં પિબ ॥ २२३
१ ३ १ ०४०२a કદુ પ્રચેતસે મહે વચો દેવાય શસ્યતે ।
१ ३ १ ०४०२c તદિધ્યસ્ય વર્ધનમ્ ॥ २२४
१ ३ १ ०४०३a ઉક્થં ચ ન શસ્યમાનં નાગો રયિરા ચિકેત ।

૧ ૩ ૧ ૦૪૦૩c ન ગાયત્રં ગીયમાનમ્ ॥ ૨૨૫
૧ ૩ ૧ ૦૪૦૪a ઇન્દ્ર ઉક્થેભિર્મન્દિષ્ઠો વાજાનાં ચ વાજપતિઃ ।
૧ ૩ ૧ ૦૪૦૪c હરિવાન્ત્સુતાનાઁ સખા ॥ ૨૨૬
૧ ૩ ૧ ૦૪૦૫a આ યાહ્યુપ નઃ સુતં વાજેભિર્મા હૃણીયથાઃ ।
૧ ૩ ૧ ૦૪૦૫c મહાઁ ઇવ યુવજાનિઃ ॥ ૨૨૭
૧ ૩ ૧ ૦૪૦૬a કદા વસો સ્તોત્રઁ હર્યત આ અવ શ્મશા રુધદ્વાઃ ।
૧ ૩ ૧ ૦૪૦૬c દીર્ઘં સુતમ્ વાતાપ્યાય ॥ ૨૨૮
૧ ૩ ૧ ૦૪૦૭a બ્રાહ્મણાદિન્દ્ર રાધસઃ પિબા સોમમૃતૂઁ રનુ ।
૧ ૩ ૧ ૦૪૦૭c તવેદઁ સખ્યમસ્તૃતમ્ ॥ ૨૨૯
૧ ૩ ૧ ૦૪૦૮a વયં ઘા તે અપિ સ્મસિ સ્તોતાર ઇન્દ્ર ગિર્વણઃ ।
૧ ૩ ૧ ૦૪૦૮c ત્વં નો જિન્વ સોમપાઃ ॥ ૨૩૦
૧ ૩ ૧ ૦૪૦૯a એન્દ્ર પૃક્ષુ કાસુ ચિન્નૃમ્ણં તનૂષુ ધેહિ નઃ ।
૧ ૩ ૧ ૦૪૦૯c સત્રાજિદુગ્ર પૌઁસ્યમ્ ॥ ૨૩૧
૧ ૩ ૧ ૦૪૧૦a એવા હ્યસિ વીરયુરેવા શૂર ઉત સ્થિરઃ ।
૧ ૩ ૧ ૦૪૧૦c એવા તે રાધ્યં મનઃ ॥ ૨૩૨

૧ ૩ ૧ ૦૫૦૧a અભિ ત્વા શૂર નોનુમોઽદુગ્ધા ઇવ ધેનવઃ ।
૧ ૩ ૧ ૦૫૦૧c ઈશાનમસ્ય જગતઃ સ્વર્દૃશમીશાનમિન્દ્ર તસ્થુષઃ ॥ ૨૩૩
૧ ૩ ૧ ૦૫૦૨a ત્વામિદ્ધિ હવામહે સાતૌ વાજસ્ય કાર્વઃ ।
૧ ૩ ૧ ૦૫૦૨c ત્વાં વૃત્રેષ્વિન્દ્ર સત્પતિં નરસ્ત્વાં કાષ્ઠાસ્વર્વતઃ ॥ ૨૩૪
૧ ૩ ૧ ૦૫૦૩a અભિ પ્ર વઃ સુરાધસમિન્દ્રમર્ચ યથા વિદે ।
૧ ૩ ૧ ૦૫૦૩c યો જરિતૃભ્યો મઘવા પુરૂવસુઃ સહસ્રેણેવ શિક્ષતિ ॥ ૨૩૫
૧ ૩ ૧ ૦૫૦૪a તં વો દસ્મમૃતીષહં વસોર્મન્દાનમન્ધસઃ ।
૧ ૩ ૧ ૦૫૦૪c અભિ વત્સં ન સ્વસરેષુ ધેનવ ઇન્દ્રં ગીર્ભિર્નવામહે ॥ ૨૩૬
૧ ૩ ૧ ૦૫૦૫a તરોભિર્વો વિદદ્વસુમિન્દ્રઁ સબાધ ઊતયે ।
૧ ૩ ૧ ૦૫૦૫c બૃહદ્ગાયન્તઃ સુતસોમે અધ્વરે હુવે ભરં ન કારિણમ્ ॥ ૨૩૭
૧ ૩ ૧ ૦૫૦૬a તરણિરિત્સિષાસતિ વાજં પુરન્ધ્યા યુજા ।
૧ ૩ ૧ ૦૫૦૬c આ વ ઇન્દ્રં પુરુહૂતં નમે ગિરા નેમિં તષ્ટેવ સુદ્રુવમ્ ॥ ૨૩૮
૧ ૩ ૧ ૦૫૦૭a પિબા સુતસ્ય રસિનો મત્સ્વા ન ઇન્દ્ર ગોમતઃ ।
૧ ૩ ૧ ૦૫૦૭c આપિર્નો બોધિ સધમાદ્યે વૃધેઽસ્માઁ અવન્તુ તે ધિયઃ ॥ ૨૩૯
૧ ૩ ૧ ૦૫૦૮a ત્વઁ હ્યેહિ ચેરવે વિદા ભગં વસુત્તયે ।
૧ ૩ ૧ ૦૫૦૮c ઉદ્વાવૃષસ્વ મઘવન્ગવિષ્ટય ઉદિન્દ્રાશ્વમિષ્ટયે ॥ ૨૪૦

૧ ૩ ૧ ૦૫૦૯a  ન હિ વશ્ચરમં ચ ન વસિષ્ઠઃ પરિમँસ્તે ।
૧ ૩ ૧ ૦૫૦૯c  અસ્માકમદ્ય મરુતઃ સુતે સચા વિશ્વે પિબન્તુ કામિનઃ ॥  ૨૪૧
૧ ૩ ૧ ૦૫૧૦a  મા ચિદન્યદ્વિ શँસત સખાયો મા રિષણ્યત ।
૧ ૩ ૧ ૦૫૧૦c  ઇન્દ્રમિત્સ્તોતા વૃષણँ સચા સુતે મુહુરુક્થા ચ શँસત ॥  ૨૪૨

તૃતીય પ્રપાઠકઃ ।  દ્વિતીયોઽર્ધઃ

૧ ૩ ૧ ૦૬૦૧a  ન કિષ્ટં કર્મણા નશદ્યશ્ચકાર સદાવૃધમ્ ।
૧ ૩ ૧ ૦૬૦૧c  ઇન્દ્રં ન યજ્ઞૈર્વિશ્વગૂર્તમૃભ્વસમધૃષ્ટં ધૃષ્ણુમોજસા ॥  ૨૪૩
૧ ૩ ૨ ૦૬૦૨a  ય ઋતે ચિદભિશ્રિષઃ પુરા જત્રુભ્ય આતૃદઃ ।
૧ ૩ ૨ ૦૬૦૨c  સન્ધાતા સન્ધિં મઘવા પુરૂવસુર્નિષ્કર્તા વિહ્રુતં પુનઃ ॥  ૨૪૪
૧ ૩ ૨ ૦૬૦૩a  આ ત્વા સહસ્રમા શતં યુક્તા રથે હિરણ્યયે ।
૧ ૩ ૨ ૦૬૦૩c  બ્રહ્મયુજો હરય ઇન્દ્ર કેશિનો વહન્તુ સોમપીતયે ॥  ૨૪૫
૧ ૩ ૨ ૦૬૦૪a  આ મન્દ્રૈરિન્દ્ર હરિભિર્યાહિ મયૂરરોમભિઃ ।
૧ ૩ ૨ ૦૬૦૪c  મા ત્વા કે ચિન્નિ યેમુરિન્ન પાશિનોઽતિ ધન્વેવ તાँ ઇહિ ॥  ૨૪૬
૧ ૩ ૨ ૦૬૦૫a  ત્વમઙ્ગ પ્ર શँસિષો દેવઃ શવિષ્ઠ મર્ત્યમ્ ।
૧ ૩ ૨ ૦૬૦૫c  ન ત્વદન્યો મઘવન્નસ્તિ મર્ડિતેન્દ્ર બ્રવીમિ તે વચઃ ॥  ૨૪૭
૧ ૩ ૨ ૦૬૦૬a  ત્વમિન્દ્ર યશા અસ્યૃજીષી શવસસ્પતિઃ ।
૧ ૩ ૨ ૦૬૦૬c  ત્વં વૃત્રાણિ હँસ્યપ્રતીન્યેક ઇત્પુર્વનુત્તશ્ચર્ષણીધૃતિઃ ॥  ૨૪૮
૧ ૩ ૨ ૦૬૦૭a  ઇન્દ્રમિદ્દેવતાતય ઇન્દ્રં પ્રયત્યધ્વરે ।
૧ ૩ ૨ ૦૬૦૭c  ઇન્દ્રँ સમીકે વનિનો હવામહ ઇન્દ્રં ધનસ્ય સાતયે ॥  ૨૪૯
૧ ૩ ૨ ૦૬૦૮a  ઇમા ઉ ત્વા પુરૂવસો ગિરો વર્ધન્તુ યા મમ ।
૧ ૩ ૨ ૦૬૦૮c  પાવકવર્ણાઃ શુચયો વિપશ્ચિતોઽભિ સ્તોમૈરનૂષત ॥  ૨૫૦
૧ ૩ ૨ ૦૬૦૯a  ઉદુ ત્યે મધુમત્તમા ગિર સ્તોમાસ ઈરતે ।
૧ ૩ ૨ ૦૬૦૯c  સત્રાજિતો ધનસા અક્ષિતોતયો વાજયન્તો રથા ઇવ ॥  ૨૫૧
૧ ૩ ૨ ૦૬૧૦a  યથા ગૌરો અપા કૃતં તૃષ્યન્નેત્યવેરિણમ્ ।
૧ ૩ ૨ ૦૬૧૦c  આપિત્વે નઃ પ્રપિત્વે તૂયમા ગહિ કણ્વેષુ સુ સચા પિબ ॥  ૨૫૨

૧ ૩ ૨ ૦૭૦૧a  શગ્ધ્યૂ૩ષુ શચીપત ઇન્દ્ર વિશ્વાભિરૂતિભિઃ ।
૧ ૩ ૨ ૦૭૦૧c  ભગં ન હિ ત્વા યશસં વસુવિદમનુ શૂર ચરામસિ ॥  ૨૫૩
૧ ૩ ૨ ૦૭૦૨a  યા ઇન્દ્ર ભુજ આભરઃ સ્વર્વા અસુરેભ્યઃ ।
૧ ૩ ૨ ૦૭૦૨c  સ્તોતારમિન્મઘવન્નસ્ય વર્ધય યે ચ ત્વે વૃક્તબર્હિષઃ ॥  ૨૫૪
૧ ૩ ૨ ૦૭૦૩a  પ્ર મિત્રાય પ્રાર્યમ્ણે સચથ્યમૃતાવસો ।
૧ ૩ ૨ ૦૭૦૩c  વરૂથ્યે૩ વરુણે છન્દ્યં વચઃ સ્તોત્રँ રાજસુ ગાયત ॥  ૨૫૫

૧ ૩ ૨ ૦૭૦૪a  અભિ ત્વા પૂર્વપીતય ઇન્દ્ર સ્તોમેભિરાયવઃ ।
૧ ૩ ૨ ૦૭૦૪c  સમીચીનાસ ઋભવઃ સમસ્વરન્રુદ્રા ગૃણન્ત પૂર્વ્યમ્ ॥ ૨૫૬
૧ ૩ ૨ ૦૭૦૫a  પ્ર વ ઇન્દ્રાય બૃહતે મરુતો બ્રહ્માર્ચત ।
૧ ૩ ૨ ૦૭૦૫c  વૃત્રઁ હનતિ વૃત્રહા શતક્રતુર્વજ્રેણ શતપર્વણા ॥ ૨૫૭
૧ ૩ ૨ ૦૭૦૬a  બૃહદિન્દ્રાય ગાયત મરુતો વૃત્રહન્તમમ્ ।
૧ ૩ ૨ ૦૭૦૬c  યેન જ્યોતિરજનયન્નૃતાવૃધો દેવં દેવાય જાગૃવિ ॥ ૨૫૮
૧ ૩ ૨ ૦૭૦૭a  ઇન્દ્ર ક્રતું ન આ ભર પિતા પુત્રેભ્યો યથા ।
૧ ૩ ૨ ૦૭૦૭c  શિક્ષા ણો અસ્મિન્પુરુહૂત યામનિ જીવા જ્યોતિરશીમહિ ॥ ૨૫૯
૧ ૩ ૨ ૦૭૦૮a  મા ન ઇન્દ્ર પરા વૃણગ્ભવા નઃ સધમાદ્યે ।
૧ ૩ ૨ ૦૭૦૮c  ત્વં ન ઊતી ત્વમિન્ન આપ્યમ્ મા ન ઇન્દ્ર પરા વૃણક્ ॥ ૨૬૦
૧ ૩ ૨ ૦૭૦૯a  વયં ઘ ત્વા સુતાવન્ત આપો ન વૃક્તબર્હિષઃ ।
૧ ૩ ૨ ૦૭૦૯c  પવિત્રસ્ય પ્રસ્રવણેષુ વૃત્રહન્પરિ સ્તોતાર આસતે ॥ ૨૬૧
૧ ૩ ૨ ૦૭૧૦a  યદિન્દ્ર નાહુષીષ્વા ઓજો નૃમ્ણં ચ કૃષ્ટિષુ ।
૧ ૩ ૨ ૦૭૧૦c  યદ્વા પઞ્ચ ક્ષિતીનાં દ્યુમ્નમા ભર સત્રા વિશ્વાનિ પૌઁસ્યા ॥ ૨૬૨

૧ ૩ ૨ ૦૮૦૧a  સત્યમિત્થા વૃષેદસિ વૃષજૂતિર્નોઽવિતા ।
૧ ૩ ૨ ૦૮૦૧c  વૃષા હ્યુગ્ર શ઼ૃણ્વિષે પરાવતિ વૃષો અર્વાવતિ શ્રુતઃ ॥ ૨૬૩
૧ ૩ ૨ ૦૮૦૨a  યચ્છક્રાસિ પરાવતિ યદર્વાવતિ વૃત્રહન્ ।
૧ ૩ ૨ ૦૮૦૨c  અતસ્ત્વા ગીર્ભિર્દ્યુગદિન્દ્ર કેશિભિઃ સુતાવાઁ આ વિવાસતિ ॥ ૨૬૪
૧ ૩ ૨ ૦૮૦૩a  અભિ વો વીરમન્ધસો મદેષુ ગાય ગિરા મહા વિચેતસમ્ ।
૧ ૩ ૨ ૦૮૦૩c  ઇન્દ્રં નામ શ્રુત્યઁ શાકિનં વચો યથા ॥ ૨૬૫
૧ ૩ ૨ ૦૮૦૪a  ઇન્દ્ર ત્રિધાતુ શરણં ત્રિવરૂથઁ સ્વસ્તયે ।
૧ ૩ ૨ ૦૮૦૪c  છર્દિર્યચ્છ મઘવદ્ભ્યશ્ચ મહ્યં ચ યાવયા દિદ્યુમેભ્યઃ ॥ ૨૬૬
૧ ૩ ૨ ૦૮૦૫a  શ્રાયન્ત ઇવ સૂર્યં વિશ્વેદિન્દ્રસ્ય ભક્ષત ।
૧ ૩ ૨ ૦૮૦૫c  વસૂનિ જાતો જનિમાન્યોજસા પ્રતિ ભાગં ન દીધિમઃ ॥ ૨૬૭
૧ ૩ ૨ ૦૮૦૬a  ન સીમદેવ આપ તદિષં દીર્ઘાયો મર્ત્યઃ ।
૧ ૩ ૨ ૦૮૦૬c  એતગ્વા ચિદ્ય એતશો યુયોજત ઇન્દ્રો હરી યુયોજતે ॥ ૨૬૮
૧ ૩ ૨ ૦૮૦૭a  આ નો વિશ્વાસુ હવ્યમિન્દ્રઁ સમત્સુ ભૂષત ।
૧ ૩ ૨ ૦૮૦૭c  ઉપ બ્રહ્માણિ સવનાનિ વૃત્રહન્પરમજ્યા ઋચીષમ ॥ ૨૬૯
૧ ૩ ૨ ૦૮૦૮a  તવેદિન્દ્રાવમં વસુ ત્વં પુષ્યસિ મધ્યમમ્ ।
૧ ૩ ૨ ૦૮૦૮c  સત્રા વિશ્વસ્ય પરમસ્ય રાજસિ ન કિષ્ટ્વા ગોષુ વૃણ્વતે ॥ ૨૭૦
૧ ૩ ૨ ૦૮૦૯a  ક્વેયથ ક્વેદસિ પુરુત્રા ચિદ્ધિ તે મનઃ ।

૧ ૩ ૨ ૦૮૦૯c અલર્ષિ યુધ્મ ખજકૃત્પુરન્દર પ્ર ગાયત્રા અગાસિષુઃ ॥ ૨૭૧
૧ ૩ ૨ ૦૮૧૦a વયમેનમિદા હ્યોપીપેમેહ વજ્રિણમ્ ।
૧ ૩ ૨ ૦૮૧૦c તસ્મા ઉ અદ્ય સવને સુતં ભરા નૂનં ભૂષત શ્રુતે ॥ ૨૭૨

૧ ૩ ૨ ૦૯૦૧a યો રાજા ચર્ષણીનાં યાતા રથેભિરધ્રિગુઃ ।
૧ ૩ ૨ ૦૯૦૧c વિશ્વાસાં તરુતા પૃતનાનાં જ્યેષ્ઠં યો વૃત્રહા ગૃણે ॥ ૨૭૩
૧ ૩ ૨ ૦૯૦૨a યત ઇન્દ્ર ભયામહે તતો નો અભયં કૃધિ ।
૧ ૩ ૨ ૦૯૦૨c મઘવઞ્છગ્ધિ તવ તન્ન ઊતયે વિ દ્વિષો વિ મૃધો જહિ ॥ ૨૭૪
૧ ૩ ૨ ૦૯૦૩a વાસ્તોષ્પતે ધ્રુવા સ્થૂણાँ સત્રँ સોમ્યાનામ્ ।
૧ ૩ ૨ ૦૯૦૩c દ્રપ્સઃ પુરાં ભેત્તા શશ્વતીનામિન્દ્રો મુનીનાँ સખા ॥ ૨૭૫
૧ ૩ ૨ ૦૯૦૪a બણ્મહાँ અસિ સૂર્ય બડાદિત્ય મહાँ અસિ ।
૧ ૩ ૨ ૦૯૦૪c મહસ્તે સતો મહિમા પનિષ્ટમ મહ્ના દેવ મહાँ અસિ ॥ ૨૭૬
૧ ૩ ૨ ૦૯૦૫a અશ્વી રથી સુરૂપ ઇદ્ગોમાँ યદિન્દ્ર તે સખા ।
૧ ૩ ૨ ૦૯૦૫c શ્વાત્રભાજા વયસા સચતે સદા ચન્દ્રૈર્યાતિ સભામુપ ॥ ૨૭૭
૧ ૩ ૨ ૦૯૦૬a યદ્દ્યાવ ઇન્દ્ર તે શતँ શતં ભૂમીરુત સ્યુઃ ।
૧ ૩ ૨ ૦૯૦૬c ન ત્વા વજ્રિન્ત્સહસ્રँ સૂર્યા અનુ ન જાતમષ્ટ રોદસી ॥ ૨૭૮
૧ ૩ ૨ ૦૯૦૭a યદિન્દ્ર પ્રાગપાગુદઙ્ન્યગ્વા હૂયસે નૃભિઃ ।
૧ ૩ ૨ ૦૯૦૭c સિમા પુરૂ નૃષૂતો અસ્યાનવેઽસિ પ્રશર્ધ તુર્વશે ॥ ૨૭૯
૧ ૩ ૨ ૦૯૦૮a કસ્તમિન્દ્ર ત્વા વસવા મર્ત્યો દધર્ષતિ ।
૧ ૩ ૨ ૦૯૦૮c શ્રદ્ધા હિ તે મઘવન્પાર્યે દિવિ વાજી વાજँ સિષાસતિ ॥ ૨૮૦
૧ ૩ ૨ ૦૯૦૯a ઇન્દ્રાગ્ની અપાદિયં પૂર્વાગાત્પદ્વતીભ્યઃ ।
૧ ૩ ૨ ૦૯૦૯c હિત્વા શિરો જિહ્વયા રારપચ્ચરત્ત્રિँશત્પદા ન્યક્રમીત્ ॥ ૨૮૧
૧ ૩ ૨ ૦૯૧૦a ઇન્દ્ર નેદીય એદિહિ મિતમેધાભિરૂતિભિઃ ।
૧ ૩ ૨ ૦૯૧૦c આ શં તમ શં તમાભિરભિષ્ટિભિરા સ્વાપે સ્વાપિભિઃ ॥ ૨૮૨

૧ ૩ ૨ ૧૦૦૧a ઇત ઊતી વો અજરં પ્રહેતારમપ્રહિતમ્ ।
૧ ૩ ૨ ૧૦૦૧c આશું જેતારँ હેતારँ રથીતમમતૂર્તં તુગ્રિયાવૃધમ્ ॥ ૨૮૩
૧ ૩ ૨ ૧૦૦૨a મો ષુ ત્વા વાઘતશ્ચ નારે અસ્મન્નિ રીરમન્ ।
૧ ૩ ૨ ૧૦૦૨c આરાત્તાદ્વા સધમાદં ન આ ગહીહ વા સન્નુપ શ્રુધિ ॥ ૨૮૪
૧ ૩ ૨ ૧૦૦૩a સુનોત સોમપાવ્ને સોમમિન્દ્રાય વજ્રિણે ।
૧ ૩ ૨ ૧૦૦૩c પચતા પક્તીરવસે કૃણુધ્વમિત્પૃણન્નિત્પૃણતે મયઃ ॥ ૨૮૫
૧ ૩ ૨ ૧૦૦૪a યઃ સત્રાહા વિચર્ષણિરિન્દ્રં તँ હૂમહે વયમ્ ।
૧ ૩ ૨ ૧૦૦૪c સહસ્રમન્યો તુવિનૃમ્ણ સત્પતે ભવા સમત્સુ નો વૃધે ॥ ૨૮૬

૧ ૩ ૨ ૧૦૦૫a શચીભિર્નઃ શચીવસૂ દિવાનક્તં દિશસ્યતમ્ ।
૧ ૩ ૨ ૧૦૦૫c મા વાઁ રાતિરુપ દસત્કદા ચ નાસ્મદ્રાતિઃ કદા ચ ન ॥ ૨૮૭
૧ ૩ ૨ ૧૦૦૬a યદા કદા ચ મીઢુષે સ્તોતા જરેત મર્ત્યઃ ।
૧ ૩ ૨ ૧૦૦૬c આદિદ્વન્દેત વરુણં વિપા ગિરા ધર્ત્તારં વિવ્રતાનામ્ ॥ ૨૮૮
૧ ૩ ૨ ૧૦૦૭a પાહિ ગા અન્ધસો મદ ઇન્દ્રાય મેધ્યાતિથે ।
૧ ૩ ૨ ૧૦૦૭c યઃ સમ્મિશ્વો હર્યોર્યો હિરણ્યય ઇન્દ્રો વજ્રી હિરણ્યયઃ ॥ ૨૮૯
૧ ૩ ૨ ૧૦૦૮a ઉભયઁ શ્ૃણવચ્ચ ન ઇન્દ્રો અર્વાગિદં વચઃ ।
૧ ૩ ૨ ૧૦૦૮c સત્રાચ્યા મઘવાન્ત્સોમપીતયે ધિયા શવિષ્ઠ આ ગમત્ ॥ ૨૯૦
૧ ૩ ૨ ૧૦૦૯a મહે ચ ન ત્વાદ્રિવઃ પરા શુલ્કાય દીયસે ।
૧ ૩ ૨ ૧૦૦૯c ન સહસ્રાય નાયુતાયે વજ્રિવો ન શતાય શતામઘ ॥ ૨૯૧
૧ ૩ ૨ ૧૦૧૦a વસ્યાઁ ઇન્દ્રાસિ મે પિતુરુત ભ્રાતુરભુઞ્જતઃ ।
૧ ૩ ૨ ૧૦૧૦c માતા ચ મે છદયથઃ સમા વસો વસુત્વનાય રાધસે ॥ ૨૯૨

ચતુર્થ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

૧ ૪ ૧ ૦૧૦૧a ઇમ ઇન્દ્રાય સુન્વિરે સોમાસો દધ્યાશિરઃ ।
૧ ૪ ૧ ૦૧૦૧c તાઁ આ મદાય વજ્રહસ્ત પીતયે હરિભ્યાં યાહ્યોક આ ॥ ૨૯૩
૧ ૪ ૧ ૦૧૦૨a ઇમ ઇન્દ્ર મદાય તે સોમાશ્ચિકિત્ર ઉકિથનઃ ।
૧ ૪ ૧ ૦૧૦૨c મધોઃ પપાન ઉપ નો ગિરઃ શ્ૃણુ રાસ્વ સ્તોત્રાય ગિર્વણઃ ॥ ૨૯૪
૧ ૪ ૧ ૦૧૦૩a આ ત્વાઉદ્ય સબર્દુઘાઁ હુવે ગાયત્રવેપસમ્ ।
૧ ૪ ૧ ૦૧૦૩c ઇન્દ્રં ધેનું સુદુઘામન્યામિષમુરુધારામરઙ્કૃતમ્ ॥ ૨૯૫
૧ ૪ ૧ ૦૧૦૪a ન ત્વા બૃહન્તો અદ્રયો વરન્ત ઇન્દ્ર વીડવઃ ।
૧ ૪ ૧ ૦૧૦૪c યચ્છિક્ષસિ સ્તુવતે માવતે વસુ ન કિષ્ટદા મિનાતિ તે ॥ ૨૯૬
૧ ૪ ૧ ૦૧૦૫a ક ઈં વેદ સુતે સચા પિબન્તં કદ્વયો દધે ।
૧ ૪ ૧ ૦૧૦૫c અયં યઃ પુરો વિભિનત્યોજસા મન્દાનઃ શિપ્ર્યન્ધસઃ ॥ ૨૯૭
૧ ૪ ૧ ૦૧૦૬a યદિન્દ્ર શાસો અવ્રતં ચ્યાવયા સદસસ્પરિ ।
૧ ૪ ૧ ૦૧૦૬c અસ્માકમઁશું મઘવન્પુરુસ્પૃહં વસવ્યે અધિ બર્હય ॥ ૨૯૮
૧ ૪ ૧ ૦૧૦૭a ત્વષ્ટા નો દૈવ્યં વચઃ પર્જન્યો બ્રહ્મણસ્પતિઃ ।
૧ ૪ ૧ ૦૧૦૭c પુત્રૈર્ભ્રાતૃભિરદિતિર્નુ પાતુ નો દુષ્ટરં ત્રામણં વચઃ ॥ ૨૯૯
૧ ૪ ૧ ૦૧૦૮a કદા ચ ન સ્તરીરસિ નેન્દ્ર સશ્ચસિ દાશુષે ।
૧ ૪ ૧ ૦૧૦૮c ઉપોપેન્નુ મઘવન્ભૂય ઇન્નુ તે દાનં દેવસ્ય પૃચ્યતે ॥ ૩૦૦
૧ ૪ ૧ ૦૧૦૯a યુઙ્ક્ષ્વા હિ વૃત્રહન્તમ હરી ઇન્દ્ર પરાવતઃ ।
૧ ૪ ૧ ૦૧૦૯c અર્વાચીનો મઘવન્ત્સોમપીતય ઉગ્ર ઋષ્વેભિરા ગહિ ॥ ૩૦૧

૧ ૪ ૧ ૦૧૧૦a  ત્વામિદા હ્યો નરોऽપીપ્યન્વજ્રિન્ભૂર્ણયઃ ।
૧ ૪ ૧ ૦૧૧૦c  સ ઇન્દ્ર સ્તોમવાહસ ઇહ શ્રુધ્યુપ સ્વસરમા ગહિ ॥ ૩૦૨

૧ ૪ ૧ ૦૨૦૧a  પ્રત્યુ અદર્શ્યાયત્યૂ૩ચ્છન્તી દુહિતા દિવઃ ।
૧ ૪ ૧ ૦૨૦૧c  અપો મહી વૃણુતે ચક્ષુષા તમો જ્યોતિષ્કૃણોતિ સૂનરિ ॥ ૩૦૩
૧ ૪ ૧ ૦૨૦૨a  ઇમા ઉ વાં દિવિષ્ટય ઉસ્રા હવન્તે અશ્વિના ।
૧ ૪ ૧ ૦૨૦૨c  અયં વામહ્વેऽવસે શચીવસૂ વિશંવિશઁ હિ ગચ્છથઃ ॥ ૩૦૪
૧ ૪ ૧ ૦૨૦૩a  કુ ષ્ઠઃ કો વામશ્વિના તપાનો દેવા મર્ત્યઃ ।
૧ ૪ ૧ ૦૨૦૩c  ઘ્નતા વામશ્મયા ક્ષપમાણોઁશુનેત્થમુ આદ્વન્યથા ॥ ૩૦૫
૧ ૪ ૧ ૦૨૦૪a  અયં વાં મધુમત્તમઃ સુતઃ સોમો દિવિષ્ટિષુ ।
૧ ૪ ૧ ૦૨૦૪c  તમશ્વિના પિબતં તિરો અહ્ન્યં ધત્તઁ રત્નાનિ દાશુષે ॥ ૩૦૬
૧ ૪ ૧ ૦૨૦૫a  આ ત્વા સોમસ્ય ગલ્દયા સદા યાચન્નહં જ્યા ।
૧ ૪ ૧ ૦૨૦૫c  ભૂર્ણિં મૃગં ન સવનેષુ ચુક્રુધં ક ઈશાનં ન યાચિષત્ ॥ ૩૦૭
૧ ૪ ૧ ૦૨૦૬a  અધ્વર્યો દ્રાવયા ત્વઁ સોમમિન્દ્રઃ પિપાસતિ ।
૧ ૪ ૧ ૦૨૦૬c  ઉપો નૂનં યુયુજે વૃષણા હરી આ ચ જગામ વૃત્રહા ॥ ૩૦૮
૧ ૪ ૧ ૦૨૦૭a  અભી ષતસ્તદા ભરેન્દ્ર જ્યાયઃ કનીયસઃ ।
૧ ૪ ૧ ૦૨૦૭c  પુરૂવસુર્હિ મઘવન્બભૂવિથ ભરેભરે ચ હવ્યઃ ॥ ૩૦૯
૧ ૪ ૧ ૦૨૦૮a  યદિન્દ્ર યાવતસ્ત્વમેતાવદહમીશીય ।
૧ ૪ ૧ ૦૨૦૮c  સ્તોતારમિદ્દધિષે રદાવસો ન પાપત્વાય રઁસિષમ્ ॥ ૩૧૦
૧ ૪ ૧ ૦૨૦૯a  ત્વમિન્દ્ર પ્રતૂર્તિષ્વભિ વિશ્વા અસિ સ્પૃધઃ ।
૧ ૪ ૧ ૦૨૦૯c  અશસ્તિહા જનિતા વૃત્રતૂરસિ ત્વં તૂર્ય તરુષ્યતઃ ॥ ૩૧૧
૧ ૪ ૧ ૦૨૧૦a  પ્ર યો રિરિક્ષ ઓજસા દિવઃ સદોભ્યસ્પરિ ।
૧ ૪ ૧ ૦૨૧૦c  ન ત્વા વિવ્યાચ રજ ઇન્દ્ર પાર્થિવમતિ વિશ્વં વવક્ષિથ ॥ ૩૧૨

૧ ૪ ૧ ૦૩૦૧a  અસાવિ દેવં ગોઋજીકમન્ધો ન્યસ્મિન્નિન્દ્રો જનુષેમુવોચ ।
૧ ૪ ૧ ૦૩૦૧c  બોધામસિ ત્વા હર્યશ્વ યજ્ઞૈર્બોધા ન સ્તોમમન્ધસો મદેષુ ॥ ૩૧૩
૧ ૪ ૧ ૦૩૦૨a  યોનિષ્ટ ઇન્દ્ર સદને અકારિ તમા નૃભિઃ પુરૂહૂત પ્ર યાહિ ।
૧ ૪ ૧ ૦૩૦૨c  અસો યથા નોऽવિતા વૃધશ્ચિદ્દદો વસૂનિ મમદશ્ચ સોમૈઃ ॥ ૩૧૪
૧ ૪ ૧ ૦૩૦૩a  અદર્દરુત્સમસૃજો વિ ખાનિ ત્વમર્ણવાન્બદ્બધાનાઁ અરમ્ણાઃ ।
૧ ૪ ૧ ૦૩૦૩c  મહાન્તમિન્દ્ર પર્વતં વિ યદ્વઃ સૃજદ્ધારા અવ યદ્દાનવાન્હન્ ॥ ૩૧૫
૧ ૪ ૧ ૦૩૦૪a  સુષ્વાણાસ ઇન્દ્ર સ્તુમસિ ત્વા સનિષ્યન્તશ્ચિત્તુવિનૃમ્ણ વાજમ્ ।
૧ ૪ ૧ ૦૩૦૪c  આ નો ભર સુવિતં યસ્ય કોના તના ત્મના સહ્યામા ત્વોતાઃ ॥ ૩૧૬
૧ ૪ ૧ ૦૩૦૫a  જગૃહ્મા તે દક્ષિણમિન્દ્ર હસ્તં વસૂયવો વસુપતે વસૂનામ્ ।

૧ ૪ ૧ ૦૩૦૫c વિદ્મા હિ ત્વા ગોપતિઁ શૂર ગોનામસ્મભ્યં ચિત્રં વૃષણઁ રયિન્દાઃ ॥ ૩૧૭
૧ ૪ ૧ ૦૩૦૬a ઇન્દ્રં નરો નેમધિતા હવન્તિ યત્પાર્યા યુનજતે ધિયસ્તાઃ ।
૧ ૪ ૧ ૦૩૦૬c શૂરો નૃષાતા શ્રવસશ્ચ કામ આ ગોમતિ વ્રજે ભજા ત્વં નઃ ॥ ૩૧૮
૧ ૪ ૧ ૦૩૦૭a વયઃ સુપર્ણા ઉપ સેદુરિન્દ્રં પ્રિયમેધા ઋષયો નાધમાનાઃ ।
૧ ૪ ૧ ૦૩૦૭c અપ ધ્વાન્તમૂર્ણુહિ પૂર્ધિ ચક્ષુર્મુમુગ્ધ્યાઽસ્માન્નિધયેવ બદ્ધાન્ ॥ ૩૧૯
૧ ૪ ૧ ૦૩૦૮a નાકે સુપર્ણમુપ યત્પતન્તઁ હૃદા વેનન્તો અભ્યચક્ષત ત્વા ।
૧ ૪ ૧ ૦૩૦૮c હિરણ્યપક્ષં વરુણસ્ય દૂતં યમસ્ય યોનૌ શકુનં ભુરણ્યુમ્ ॥ ૩૨૦
૧ ૪ ૧ ૦૩૦૯a બ્રહ્મ જજ્ઞાનં પ્રથમં પુરસ્તાદ્વિ સીમતઃ સુરુચો વેન આવઃ ।
૧ ૪ ૧ ૦૩૦૯c સ બુધ્ન્યા ઉપમા અસ્ય વિષ્ઠાઃ સતશ્ચ યોનિમસતશ્ચ વિવઃ ॥ ૩૨૧
૧ ૪ ૧ ૦૩૧૦a અપૂર્વ્યા પુરુતમાન્યસ્મૈ મહે વીરાય તવસે તુરાય ।
૧ ૪ ૧ ૦૩૧૦c વિરપ્શિને વજ્રિણે શન્તમાનિ વચાઁસ્યાસ્મૈ સ્થવિરાય તક્ષુઃ ॥ ૩૨૨

૧ ૪ ૧ ૦૪૦૧a અવ દ્રપ્સો અઁશુમતીમતિષ્ઠદીયાનઃ કૃષ્ણો દશભિઃ સહસ્રૈઃ ।
૧ ૪ ૧ ૦૪૦૧c આવત્તમિન્દ્રઃ શચ્યા ધમન્તમપ સ્નીહિતિં નૃમણા અધદ્રાઃ ॥ ૩૨૩
૧ ૪ ૧ ૦૪૦૨a વૃત્રસ્ય ત્વા શ્વસથાદીષમાણા વિશ્વે દેવા અજહુર્યે સખાયઃ ।
૧ ૪ ૧ ૦૪૦૨c મરુદ્ભિરિન્દ્ર સખ્યં તે અસ્ત્વથેમા વિશ્વાઃ પૃતના જયાસિ ॥ ૩૨૪
૧ ૪ ૧ ૦૪૦૩a વિધું દદ્રાણઁ સમને બહૂનાઁ યુવાનઁ સન્તં પલિતો જગાર ।
૧ ૪ ૧ ૦૪૦૩c દેવસ્ય પશ્ય કાવ્યં મહિત્વાદ્યા મમાર સ હ્યઃ સમાન ॥ ૩૨૫
૧ ૪ ૧ ૦૪૦૪a ત્વઁ હ ત્યત્સપ્તભ્યો જાયમાનોઽશત્રુભ્યો અભવઃ શત્રુરિન્દ્ર ।
૧ ૪ ૧ ૦૪૦૪c ગૂઢે દ્યાવાપૃથિવી અન્વવિન્દો વિભુમદ્ભ્યો ભુવનેભ્યો રણં ધાઃ ॥ ૩૨૬
૧ ૪ ૧ ૦૪૦૫a મેડિં ન ત્વા વજ્રિણં ભૃષ્ટિમન્તં પુરુધસ્માનં વૃષભઁ સ્થિરપ્સ્નુમ્ ।
૧ ૪ ૧ ૦૪૦૫c કરોષ્યર્યસ્તરુષીર્દુવસ્યુરિન્દ્ર દ્યુક્ષં વૃત્રહણં ગૃણીષે ॥ ૩૨૭
૧ ૪ ૧ ૦૪૦૬a પ્ર વો મહે મહેવૃધે ભરધ્વં પ્રચેતસે પ્ર સુમતિં કૃણુધ્વમ્ ।
૧ ૪ ૧ ૦૪૦૬a વિશઃ પૂર્વીઃ પ્ર ચર ચર્ષણિપ્રાઃ ॥ ૩૨૮
૧ ૪ ૧ ૦૪૦૭a શુનઁ હુવેમ મઘવાનમિન્દ્રમસ્મિન્ભરે નૃતમં વાજસાતૌ ।
૧ ૪ ૧ ૦૪૦૭c શ◌ૃણ્વન્તમુગ્રમૂતયે સમત્સુ ઘ્નન્તં વૃત્રાણિ સઞ્જિતં ધનાનિ ॥ ૩૨૯
૧ ૪ ૧ ૦૪૦૮a ઉદ્ઉ બ્રહ્માણ્યૈરત શ્રવસ્યેન્દ્રઁ સમર્યે મહયા વસિષ્ઠ ।
૧ ૪ ૧ ૦૪૦૮c આ યો વિશ્વાનિ શ્રવસા તતાનોપશ્રોતા મ ઈવતો વચાઁસિ ॥ ૩૩૦
૧ ૪ ૧ ૦૪૦૯a ચક્રં યદસ્યાપ્સ્વા નિષત્તમુતો તદસ્મૈ મધ્વિચ્ચચ્છદ્યાત્ ।
૧ ૪ ૧ ૦૪૦૯c પૃથિવ્યામતિષિતં યદૂધઃ પયો ગોષ્વદધા ઓષધીષુ ॥ ૩૩૧

૧ ૪ ૧ ૦૫૦૧a ત્યમૂ ષુ વાજિનં દેવજૂતઁ સહોવાનં તરુતારઁ રથાનામ્ ।
૧ ૪ ૧ ૦૫૦૧c અરિષ્ટનેમિં પૃતનાજમાશુઁ સ્વસ્તયે તાર્ક્ષ્યમિહા હુવેમ ॥ ૩૩૨

૧ ૪ ૧ ૦૫૦૨a ત્રાતારમિન્દ્રમવિતારમિન્દ્રઁ હવેહવે સુહવઁ શૂરમિન્દ્રમ્ ।
૧ ૪ ૧ ૦૫૦૨c હુવે નુ શક્રં પુરુહૂતમિન્દ્રમિદઁ હવિર્મઘવા વેત્વિન્દ્રઃ ॥ ૩૩૩
૧ ૪ ૧ ૦૫૦૩a યજામહ ઇન્દ્રં વજ્રદક્ષિણઁ હરીણાઁ રથ્યઁ વિવ્રતાનામ્ ।
૧ ૪ ૧ ૦૫૦૩c પ્ર શ્મશ્રુભિર્દોધુવદૂર્ધ્વધા ભુવદ્વિ સેનાભિર્ભયમાનો વિ રાધસા ॥ ૩૩૪
૧ ૪ ૧ ૦૫૦૪a સત્રાહણં દાધૃષિં તુમ્રમિન્દ્રં મહામપારં વૃષભઁ સુવજ્રમ્ ।
૧ ૪ ૧ ૦૫૦૪c હન્તા યો વૃત્રઁ સનિતોત વાજં દાતા મઘાનિ મઘવા સુરાધાઃ ॥ ૩૩૫
૧ ૪ ૧ ૦૫૦૫a યો નો વનુષ્યન્નભિદાતિ મર્ત ઉગણા વા મન્યમાનસ્તુરો વા ।
૧ ૪ ૧ ૦૫૦૫c ક્ષિધી યુધા શવસા વા તમિન્દ્રાભી ષ્યામ વૃષમણસ્ત્વોતાઃ ॥ ૩૩૬
૧ ૪ ૧ ૦૫૦૬a યં વૃત્રેષુ ક્ષિતય સ્પર્ધમાના યં યુક્તેષુ તુરયન્તો હવન્તે ।
૧ ૪ ૧ ૦૫૦૬c યઁ શૂરસાતૌ યમપામુપજ્મન્યં વિપ્રાસો વાજયન્તે સ ઇન્દ્રઃ ॥ ૩૩૭
૧ ૪ ૧ ૦૫૦૭a ઇન્દ્રાપર્વતા બૃહતા રથેન વામીરિષ આ વહતઁ સુવીરાઃ ।
૧ ૪ ૧ ૦૫૦૭c વીતઁ હવ્યાન્યધ્વરેષુ દેવા વર્ધેથાં ગીર્ભીરિડયા મદન્તા ॥ ૩૩૮
૧ ૪ ૧ ૦૫૦૮a ઇન્દ્રાય ગિરો અનિશિતસર્ગા અપઃ પ્રૈરયત્સગરસ્ય બુધ્નાત્ ।
૧ ૪ ૧ ૦૫૦૮c યો અક્ષેણેવ ચક્રિયૌ શચીભિર્વિષ્વક્તસ્તમ્ભ પૃથિવીમુત દ્યામ્ ॥ ૩૩૯
૧ ૪ ૧ ૦૫૦૯a આ ત્વા સખાયઃ સખ્યા વવૃત્યુસ્તિરઃ પુરૂ ચિદર્ણવાં જગમ્યાઃ ।
૧ ૪ ૧ ૦૫૦૯c પિતુર્નપાતમા દધિત વેધા અસ્મિન્ક્ષયે પ્રતરાં દીદ્યાનઃ ॥ ૩૪૦
૧ ૪ ૧ ૦૫૧૦a કો અદ્ય યુઙ્ક્તે ધુરિ ગા ઋતસ્ય શિમીવતો ભામિનો દુર્હૃણાયૂન્ ।
૧ ૪ ૧ ૦૫૧૦c આસન્નેષામપ્સુવાહો મયોભૂન્ય એષાં ભૃત્યામૃણધત્સ જીવાત્ ॥ ૩૪૧

ચતુર્થ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૧ ૪ ૨ ૦૬૦૧a ગાયન્તિ ત્વા ગાયત્રિણોઽર્ચન્ત્યર્કમર્કિણઃ ।
૧ ૪ ૨ ૦૬૦૧c બ્રહ્માણસ્ત્વા શતક્રત ઉદ્વઁશમિવ યેમિરે ॥ ૩૪૨
૧ ૪ ૨ ૦૬૦૨a ઇન્દ્રં વિશ્વા અવીવૃધન્ત્સમુદ્રવ્યચસં ગિરઃ ।
૧ ૪ ૨ ૦૬૦૨c રથીતમઁ રથીનાં વાજાનાઁ સત્પતિં પતિમ્ ॥ ૩૪૩
૧ ૪ ૨ ૦૬૦૩a ઇમમિન્દ્ર સુતં પિબ જ્યેષ્ઠમમર્ત્યં મદમ્ ।
૧ ૪ ૨ ૦૬૦૩c શુક્રસ્ય ત્વાભ્યક્ષરન્ધારા ઋતસ્ય સાદને ॥ ૩૪૪
૧ ૪ ૨ ૦૬૦૪a યદિન્દ્ર ચિત્ર મ ઇહ નાસ્તિ ત્વાદાતમદ્રિવઃ ।
૧ ૪ ૨ ૦૬૦૪c રાધસ્તન્નો વિદદ્વસ ઉભયાહસ્ત્યા ભર ॥ ૩૪૫
૧ ૪ ૨ ૦૬૦૫a શ્રુદી હવં તિરશ્ચ્યા ઇન્દ્ર યસ્ત્વા સપર્યતિ ।
૧ ૪ ૨ ૦૬૦૫c સુવીર્યસ્ય ગોમતો રાયસ્પૂર્ધિ મહાઁ અસિ ॥ ૩૪૬
૧ ૪ ૨ ૦૬૦૬a અસાવિ સોમ ઇન્દ્ર તે શવિષ્ઠ ધૃષ્ણવા ગહિ ।
૧ ૪ ૨ ૦૬૦૬c આ ત્વા પૃણક્ત્વિન્દ્રિયઁ રજઃ સૂર્યો ન રશ્મિભિઃ ॥ ૩૪૭

૧ ૪ ૨ ૦૬૦૭a  એન્દ્ર યાહિ હરિભિરુપ કણ્વસ્ય સુષ્ટુતિમ્ ।
૧ ૪ ૨ ૦૬૦૭c  દિવો અમુષ્ય શાસતો દિવં યય દિવાવસો ॥ ૩૪૮
૧ ૪ ૨ ૦૬૦૮a  આ ત્વા ગિરો રથીરિવાસ્થુઃ સુતેષુ ગિર્વણઃ ।
૧ ૪ ૨ ૦૬૦૮c  અભિ ત્વા સમનૂષત ગાવો વત્સં ન ધેનવઃ ॥ ૩૪૯
૧ ૪ ૨ ૦૬૦૯a  એતો ન્વિન્દ્રઁ સ્તવામ શુદ્ધઁ શુદ્ધેન સામ્ના ।
૧ ૪ ૨ ૦૬૦૯c  શુદ્ધૈરુક્થૈર્વાવૃધ્વાઁસઁ શુદ્ધૈરાશીર્વાન્મમત્તુ ॥ ૩૫૦
૧ ૪ ૨ ૦૬૧૦a  યો રયિં વો રયિન્તમો યો દ્યુમ્નૈર્દ્યુમ્નવત્તમઃ ।
૧ ૪ ૨ ૦૬૧૦c  સોમઃ સુતઃ સ ઇન્દ્ર તેઽસ્તિ સ્વધાપતે મદઃ ॥ ૩૫૧

૧ ૪ ૨ ૦૭૦૧a  પ્રત્યસ્મૈ પિપીષતે વિશ્વાનિ વિદુષે ભર ।
૧ ૪ ૨ ૦૭૦૧c  અરઙ્ગમાય જગ્મયેઽપશ્ચાદધ્વને નરઃ ॥ ૩૫૨
૧ ૪ ૨ ૦૭૦૨a  આ નો વયોવયઃશયં મહાન્તં ગહ્વરેષ્ઠાં મહાન્તં પૂર્વિનેષ્ઠામ્ ।
૧ ૪ ૨ ૦૭૦૨c  ઉગ્રં વચો અપાવધીઃ ॥ ૩૫૩
૧ ૪ ૨ ૦૭૦૩a  આ ત્વા રથં યથોતયે સુમ્નાય વર્તયામસિ ।
૧ ૪ ૨ ૦૭૦૩c  તુવિકૂર્મિમૃતીષહમિન્દ્રઁ શવિષ્ઠ સત્પતિમ્ ॥ ૩૫૪
૧ ૪ ૨ ૦૭૦૪a  સ પૂર્વ્યો મહોનાં વેનઃ ક્રતુભિરાનજે ।
૧ ૪ ૨ ૦૭૦૪c  યસ્ય દ્વારા મનુઃ પિતા દેવેષુ ધિય આનજે ॥ ૩૫૫
૧ ૪ ૨ ૦૭૦૫a  યદી વહન્ત્યાશવો ભ્રાજમાના રથેષ્વા ।
૧ ૪ ૨ ૦૭૦૫c  પિબન્તો મદિરં મધુ તત્ર શ્રવાઁસિ કૃણ્વતે ॥ ૩૫૬
૧ ૪ ૨ ૦૭૦૬a  ત્યમુ વો અપ્રહણં ગૃણીષે શવસસ્પતિમ્ ।
૧ ૪ ૨ ૦૭૦૬c  ઇન્દ્રં વિશ્વાસાહં નરઁ શચિષ્ઠં વિશ્વવેદસમ્ ॥ ૩૫૭
૧ ૪ ૨ ૦૭૦૭a  દધિક્રાવ્ણો અકારિષં જિષ્ણોરશ્વસ્ય વાજિનઃ ।
૧ ૪ ૨ ૦૭૦૭c  સુરભિ નો મુખા કરત્પ્ર ન આયૂઁષિ તારિષત્ ॥ ૩૫૮
૧ ૪ ૨ ૦૭૦૮a  પુરાં ભિન્દુર્યુવા કવિરમિતૌજા અજાયત ।
૧ ૪ ૨ ૦૭૦૮c  ઇન્દ્રો વિશ્વસ્ય કર્મણો ધર્ત્તા વજ્રી પુરુષ્ટુતઃ ॥ ૩૫૯

૧ ૪ ૨ ૦૮૦૧a  પ્રપ્ર વસ્ત્રિષ્ટુભમિષં વન્દદ્વીરાયેન્દવે ।
૧ ૪ ૨ ૦૮૦૧c  ધિયા વો મેધસાતયે પુરન્ધ્યા વિવાસતિ ॥ ૩૬૦
૧ ૪ ૨ ૦૮૦૨a  કશ્યપસ્ય સ્વર્વિદો યાવાહુઃ સયુજાવિતિ ।
૧ ૪ ૨ ૦૮૦૨c  યયોર્વિશ્વમપિ વ્રતં યજ્ઞં ધીરા નિચાય્ય ॥ ૩૬૧
૧ ૪ ૨ ૦૮૦૩a  અર્ચત પ્રાર્ચતા નરઃ પ્રિયમેધાસો અર્ચત ।
૧ ૪ ૨ ૦૮૦૩c  અર્ચન્તુ પુત્રકા ઉત પુરમિદ્ધૃષ્ણ્વર્ચત ॥ ૩૬૨
૧ ૪ ૨ ૦૮૦૪a  ઉક્થમિન્દ્રાય શઁસ્યં વર્ધનં પુરુનિઃષિધે ।

૧ ૪ ૨ ૦૮૦૪c શક્રો યથા સુતેષુ નો રારણત્સખ્યેષુ ચ ॥ ૩૬૩
૧ ૪ ૨ ૦૮૦૫a વિશ્વાનરસ્ય વસ્પતિમનાનતસ્ય શવસઃ ।
૧ ૪ ૨ ૦૮૦૫c એવૈશ્ચ ચર્ષણીનામૂતી હુવે રથાનામ્ ॥ ૩૬૪
૧ ૪ ૨ ૦૮૦૬a સ ઘા યસ્તે દિવો નરો ધિયા મર્તસ્ય શમતઃ ।
૧ ૪ ૨ ૦૮૦૬c ઊતી સ બૃહતો દિવો દ્વિષો અँહો ન તરતિ ॥ ૩૬૫
૧ ૪ ૨ ૦૮૦૭a વિભોષ્ટ ઇન્દ્ર રાધસો વિભ્વી રાતિઃ શતક્રતો ।
૧ ૪ ૨ ૦૮૦૭c અથા નો વિશ્વચર્ષણે દ્યુમ્નँ સુદત્ર મँહય ॥ ૩૬૬
૧ ૪ ૨ ૦૮૦૮a વયશ્ચિત્તે પતત્રિણો દ્વિપાચ્ચતુષ્પાદર્જુનિ ।
૧ ૪ ૨ ૦૮૦૮c ઉષઃ પ્રારન્નૃતૂँરનુ દિવો અન્તેભ્યસ્પરિ ॥ ૩૬૭
૧ ૪ ૨ ૦૮૦૯a અમી યે દેવા સ્થન મધ્ય આ રોચને દિવઃ ।
૧ ૪ ૨ ૦૮૦૯c કદ્ધ ઋતં કદમૃતં કા પ્રત્ના વ આહુતિઃ ॥ ૩૬૮
૧ ૪ ૨ ૦૮૧૦a ઋચँ સામ યજામહે યાભ્યાં કર્માણિ કૃણ્વતે ।
૧ ૪ ૨ ૦૮૧૦c વિ તે સદસિ રાજતો યજ્ઞં દેવેષુ વક્ષતઃ ॥ ૩૬૯

૧ ૪ ૨ ૦૯૦૧a વિશ્વાઃ પૃતના અભિભૂતરં નરઃ સજૂસ્તતક્ષુરિન્દ્રં જજનુશ્ચ રાજસે ।
૧ ૪ ૨ ૦૯૦૧c ક્રત્વે વરે સ્થેમન્યામુરીમુતોગ્રમોજિષ્ઠં તરસં તરસ્વિનમ્ ॥ ૩૭૦
૧ ૪ ૨ ૦૯૦૨a શ્રત્તે દધામિ પ્રથમાય મન્યવેઽહન્યદ્દસ્યું નર્યં વિવેરપઃ ।
૧ ૪ ૨ ૦૯૦૨c ઉભે યત્વા રોદસી ધાવતામનુ ભ્યસાત્તે શુષ્માત્પૃથિવી ચિદદ્રિવઃ ॥ ૩૭૧
૧ ૪ ૨ ૦૯૦૩a સમેત વિશ્વા ઓજસા પતિં દિવો ય એક ઇદ્ભૂરતિથિર્જનાનામ્
૧ ૪ ૨ ૦૯૦૩c સ પૂર્વ્યો નૂતનમાજિગીષં તં વર્ત્તનીરનુ વાવૃત એક ઇત્ ॥ ૩૭૨
૧ ૪ ૨ ૦૯૦૪a ઇમે ત ઇન્દ્ર તે વયં પુરુષ્ટુત યે ત્વારભ્ય ચરામસિ પ્રભૂવસો ।
૧ ૪ ૨ ૦૯૦૪c ન હિ ત્વદન્યો ગિર્વણો ગિરઃ સઘત્ક્ષોણીરિવ પ્રતિ તદ્ધર્ય નો વચઃ ॥ ૩૭૩
૧ ૪ ૨ ૦૯૦૫a ચર્ષણીધૃતં મઘવાનમુક્થ્યાઉમિન્દ્રં ગિરો બૃહતીરભ્યનૂષત ।
૧ ૪ ૨ ૦૯૦૫c વાવૃધાનં પુરુહૂતँ સુવૃક્તિભિરમર્ત્યં જરમાણં દિવેદિવે ॥ ૩૭૪
૧ ૪ ૨ ૦૯૦૬a અચ્છા વ ઇન્દ્રં મતયઃ સ્વર્યુવઃ સધ્રીચીર્વિશ્વા ઉશતીરનૂષત ।
૧ ૪ ૨ ૦૯૦૬c પરિ ષ્વજન્ત જનયો યથા પતિં મર્યં ન શુન્ધ્યું મઘવાનમૂતયે ॥ ૩૭૫
૧ ૪ ૨ ૦૯૦૭a અભિ ત્યં મેષં પુરુહૂતમૃગ્મિયમિન્દ્રં ગીર્ભિર્મદતા વસ્વો અર્ણવમ્ ।
૧ ૪ ૨ ૦૯૦૭c યસ્ય દ્યાવો ન વિચરન્તિ માનુષં ભુજે મँહિષ્ઠમભિ વિપ્રમર્ચત ॥ ૩૭૬
૧ ૪ ૨ ૦૯૦૮a ત્યँ સુ મેષં મહયા સ્વર્વિદँ શતં યસ્ય સુભુવઃ સાકમીરતે ।
૧ ૪ ૨ ૦૯૦૮c અત્યં ન વાજँ હવનસ્યદँ રથમેન્દ્રં વવૃત્યામવસે સુવૃક્તિભિઃ ॥ ૩૭૭
૧ ૪ ૨ ૦૯૦૯a ઘૃતવતી ભુવનાનામભિશ્રિયોર્વી પૃથ્વી મધુદુઘે સુપેશસા ।
૧ ૪ ૨ ૦૯૦૯c દ્યાવાપૃથિવી વરુણસ્ય ધર્મણા વિષ્કભિતે અજરે ભૂરિરેતસા ॥ ૩૭૮

૧ ૪ ૨ ૦૯૧૦a ઉભે યદિન્દ્ર રોદસી આપપ્રાથોષા ઇવ ।
૧ ૪ ૨ ૦૯૧૦c મહાન્તં ત્વા મહીનાઁ સમ્રાજં ચર્ષણીનામ્ ।
૧ ૪ ૨ ૦૯૧૦e દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૩૭૯
૧ ૪ ૨ ૦૯૧૧a પ્ર મન્દિને પિતુમદર્ચતા વચો યઃ કૃષ્ણગર્ભા નિરહન્નૃજિશ્વના ।
૧ ૪ ૨ ૦૯૧૧c અવસ્યવો વૃષણં વજ્રદક્ષિણં મરુત્વન્તઁ સખ્યાય હુવેમહિ ॥ ૩૮૦

૧ ૪ ૨ ૧૦૦૧a ઇન્દ્ર સુતેષુ સોમેષુ ક્રતું પુનીષ ઉક્થ્યમ્ ।
૧ ૪ ૨ ૧૦૦૧c વિદે વૃધસ્ય દક્ષસ્ય મહાઁ હિ ષઃ ॥ ૩૮૧
૧ ૪ ૨ ૧૦૦૨a તમુ અભિ પ્ર ગાયત પુરુહૂતં પુરુષ્ટુતમ્ ।
૧ ૪ ૨ ૧૦૦૨c ઇન્દ્રં ગીર્ભિસ્તવિષમા વિવાસત ॥ ૩૮૨
૧ ૪ ૨ ૧૦૦૩a તં તે મદં ગૃણીમસિ વૃષણં પૃક્ષુ સાસહિમ્ ।
૧ ૪ ૨ ૧૦૦૩c ઉ લોકકૃત્નુમદ્રિવો હરિશ્રિયમ્ ॥ ૩૮૩
૧ ૪ ૨ ૧૦૦૪a યત્સોમમિન્દ્ર વિષ્ણવિ યદ્વા ઘ ત્રિત આપ્ત્યે ।
૧ ૪ ૨ ૧૦૦૪c યદ્વા મરુત્સુ મન્દસે સમિન્દુભિઃ ॥ ૩૮૪
૧ ૪ ૨ ૧૦૦૫a એદુ મધોર્મદિન્તરઁ સિઞ્ચાધ્વર્યો અન્ધસઃ ।
૧ ૪ ૨ ૧૦૦૫c એવા હિ વીરસ્તવતે સદાવૃધઃ ॥ ૩૮૫
૧ ૪ ૨ ૧૦૦૬a એન્દુમિન્દ્રાય સિઞ્ચત પિબાતિ સોમ્યં મધુ ।
૧ ૪ ૨ ૧૦૦૬c પ્ર રાધાઁસિ ચોદયતે મહિત્વના ॥ ૩૮૬
૧ ૪ ૨ ૧૦૦૭a એતો ન્વિન્દ્રઁ સ્તવામ સખાયઃ સ્તોમ્યં નરમ્ ।
૧ ૪ ૨ ૧૦૦૭c કૃષ્ટીર્યો વિશ્વા અભ્યસ્ત્યેક ઇત્ ॥ ૩૮૭
૧ ૪ ૨ ૧૦૦૮a ઇન્દ્રાય સામ ગાયત વિપ્રાય બૃહતે બૃહત્ ।
૧ ૪ ૨ ૧૦૦૮c બ્રહ્મકૃતે વિપશ્ચિતે પનસ્યવે ॥ ૩૮૮
૧ ૪ ૨ ૧૦૦૯a ય એક ઇદ્વિદયતે વસુ મર્તાય દાશુષે ।
૧ ૪ ૨ ૧૦૦૯c ઈશાનો અપ્રતિષ્કુત ઇન્દ્રો અઙ્ગ ॥ ૩૮૯
૧ ૪ ૨ ૧૦૧૦a સખાય આ શિષામહે બ્રહ્મેન્દ્રાય વજ્રિણે ।
૧ ૪ ૨ ૧૦૧૦c સ્તુષ ઊ ષુ વો નૃતમાય ધૃષ્ણવે ॥ ૩૯૦

પઞ્ચમ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૧ ૫ ૧ ૦૧૦૧a ગૃણે તદિન્દ્ર તે શવ ઉપમાં દેવતાતયે ।
૧ ૫ ૧ ૦૧૦૧c યદ્ધઁસિ વૃત્રમોજસા શચીપતે ॥ ૩૯૧
૧ ૫ ૧ ૦૧૦૨a યસ્ય ત્યચ્છમ્બરં મદે દિવોદાસાય રન્ધયન્ ।
૧ ૫ ૧ ૦૧૦૨c અયઁ સ સોમ ઇન્દ્ર તે સુતઃ પિબ ॥ ૩૯૨
૧ ૫ ૧ ૦૧૦૩a એન્દ્ર નો ગધિ પ્રિય સત્રાજિદગોહ્ય ।

૧ ૫ ૧ ૦૧૦૩c ગિરિર્ન વિશ્વતઃ પૃથુઃ પતિર્દિવઃ ॥ ૩૯૩
૧ ૫ ૧ ૦૧૦૪a ય ઇન્દ્ર સોમપાતમો મદઃ શવિષ્ઠ ચેતતિ ।
૧ ૫ ૧ ૦૧૦૪c યેના હઁસિ ન્યાઉત્રિણં તમીમહે ॥ ૩૯૪
૧ ૫ ૧ ૦૧૦૫a તુચે તુનાય તત્સુ નો દ્રાઘીય આયુર્જીવસે ।
૧ ૫ ૧ ૦૧૦૫c આદિત્યાસઃ સમહસઃ કૃણોતન ॥ ૩૯૫
૧ ૫ ૧ ૦૧૦૬a વેત્થા હિ નિરૃતીનાં વજ્રહસ્ત પરિવૃજમ્ ।
૧ ૫ ૧ ૦૧૦૬c અહરહઃ શુન્ધ્યુઃ પરિપદામિવ ॥ ૩૯૬
૧ ૫ ૧ ૦૧૦૭a અપામીવામપ સ્ત્રિધમપ સેધત દુર્મતિમ્ ।
૧ ૫ ૧ ૦૧૦૭c આદિત્યાસો યુયોતના નો અઁહસઃ ॥ ૩૯૭
૧ ૫ ૧ ૦૧૦૮a પિબા સોમમિન્દ્ર મન્દતુ ત્વા યં તે સુષાવ હર્યશ્વાદ્રિઃ ।
૧ ૫ ૧ ૦૧૦૮c સોતુર્બાહુભ્યાઁ સુયતો નાર્વા ॥ ૩૯૮

૧ ૫ ૧ ૦૨૦૧a અભ્રાતૃવ્યો અના ત્વમનાપિરિન્દ્ર જનુષા સનાદસિ ।
૧ ૫ ૧ ૦૨૦૧c યુધેદાપિત્વમિચ્છસે ॥ ૩૯૯
૧ ૫ ૧ ૦૨૦૨a યો ન ઇદમિદં પુરા પ્ર વસ્ય આનિનાય તમુ વ સ્તુષે ।
૧ ૫ ૧ ૦૨૦૨c સખાય ઇન્દ્રમૂતયે ॥ ૪૦૦
૧ ૫ ૧ ૦૨૦૩a આ ગન્તા મા રિષણ્યત પ્રસ્થાવાનો માપ સ્થાત સમન્યવઃ ।
૧ ૫ ૧ ૦૨૦૩c દૃઢા ચિદ્યમયિષ્ણવઃ ॥ ૪૦૧
૧ ૫ ૧ ૦૨૦૪a આ યાહ્યયમિન્દવેઽશ્વપતે ગોપત ઉર્વરાપતે ।
૧ ૫ ૧ ૦૨૦૪c સોમઁ સોમપતે પિબ ॥ ૪૦૨
૧ ૫ ૧ ૦૨૦૫a ત્વયા હ સ્વિદ્યુજા વયં પ્રતિ શ્વસન્તં વૃષભ બ્રુવીમહિ ।
૧ ૫ ૧ ૦૨૦૫c સઁસ્થે જનસ્ય ગોમતઃ ॥ ૪૦૩
૧ ૫ ૧ ૦૨૦૬a ગાવશ્ચિદ્ઘા સમન્યવઃ સજાત્યેન મરુતઃ સબન્ધવઃ ।
૧ ૫ ૧ ૦૨૦૬c રિહતે કકુભો મિથઃ ॥ ૪૦૪
૧ ૫ ૧ ૦૨૦૭a ત્વં ન ઇન્દ્રા ભર ઓજો નૃમ્ણઁ શતક્રતો વિચર્ષણે ।
૧ ૫ ૧ ૦૨૦૭c આ વીરં પૃતનાસહમ્ ॥ ૪૦૫
૧ ૫ ૧ ૦૨૦૮a અધા હીન્દ્ર ગિર્વણ ઉપ ત્વા કામ ઈમહે સસૃગ્મહે ।
૧ ૫ ૧ ૦૨૦૮c ઉદેવ ગ્મન્ત ઉદભિઃ ॥ ૪૦૬
૧ ૫ ૧ ૦૨૦૯a સીદન્તસ્તે વયો યથા ગોશ્રીતે મધૌ મદિરે વિવક્ષણે ।
૧ ૫ ૧ ૦૨૦૯c અભિ ત્વામિન્દ્ર નોનુમઃ ॥ ૪૦૭
૧ ૫ ૧ ૦૨૧૦a વયમુ ત્વામપૂર્વ્ય સ્થૂરં ન કચ્ચિદ્ભરન્તોઽવસ્યવઃ ।
૧ ૫ ૧ ૦૨૧૦c વજ્રિઞ્ચિત્રઁ હવામહે ॥ ૪૦૮

૧ ૫ ૧ ૦૩૦૧a  સ્વાદોરિત્થા વિષૂવતો મધોઃ પિબન્તિ ગૌર્યઃ ।
૧ ૫ ૧ ૦૩૦૧c  યા ઇન્દ્રેણ સયાવરીર્વૃષ્ણા મદન્તિ શોભથા વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૪૦૯
૧ ૫ ૧ ૦૩૦૨a  ઇત્થા હિ સોમ ઇન્મદો બ્રહ્મ ચકાર વર્ધનમ્ ।
૧ ૫ ૧ ૦૩૦૨c  શવિષ્ઠ વજ્રિન્નોજસા પૃથિવ્યા નિઃ શશા અહિમર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૪૧૦
૧ ૫ ૧ ૦૩૦૩a  ઇન્દ્રો મદાય વાવૃધે શવસે વૃત્રહા નૃભિઃ ।
૧ ૫ ૧ ૦૩૦૩c  તમિન્મહત્સ્વાજિષૂતિમર્ભે હવામહે સ વાજેષુ પ્ર નોઽવિષત્ ॥ ૪૧૧
૧ ૫ ૧ ૦૩૦૪a  ઇન્દ્ર તુભ્યમિદદ્રિવોઽનુત્તં વજ્રિન્વીર્યમ્ ।
૧ ૫ ૧ ૦૩૦૪c  યદ્ધ ત્યં માયિનં મૃગં તવ ત્યન્માયયાવધીરર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૪૧૨
૧ ૫ ૧ ૦૩૦૫a  પ્રેહ્યભીહિ ધૃષ્ણુહિ ન તે વજ્રો નિ યँસતે ।
૧ ૫ ૧ ૦૩૦૫c  ઇન્દ્ર નૃમ્ણँ હિ તે શવો હનો વૃત્રં જયા અપોઽર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૪૧૩
૧ ૫ ૧ ૦૩૦૬a  યદુદીરત આજયો ધૃષ્ણવે ધીયતે ધનમ્ ।
૧ ૫ ૧ ૦૩૦૬c  યુઙ્ક્ષ્વા મદચ્યુતા હરી કँ હનઃ કં વસૌ દધોઽસ્માँ ઇન્દ્ર વસૌ દધઃ ॥ ૪૧૪
૧ ૫ ૧ ૦૩૦૭a  અક્ષન્નમીમદન્ત હ્યવ પ્રિયા અધૂષત ।
૧ ૫ ૧ ૦૩૦૭c  અસ્તોષત સ્વભાનવો વિપ્રા નવિષ્ઠયા મતી યોજા ન્વિન્દ્ર તે હરી ॥ ૪૧૫
૧ ૫ ૧ ૦૩૦૮a  ઉપો ષુ શ◌ृણુહી ગિરો મઘવન્માતથા ઇવ ।
૧ ૫ ૧ ૦૩૦૮c  કદા નઃ સૂનૃતાવતઃ કર ઇદર્થયાસ ઇદ્યોજા ન્વિન્દ્ર તે હરી ॥ ૪૧૬
૧ ૫ ૧ ૦૩૦૯a  ચન્દ્રમા અપ્સ્વાઉન્તરા સુપર્ણો ધાવતે દિવિ ।
૧ ૫ ૧ ૦૩૦૯c  ન વો હિરણ્યનેમયઃ પદં વિન્દન્તિ વિદ્યુતો વિત્તં મે અસ્ય રોદસી ॥ ૪૧૭
૧ ૫ ૧ ૦૩૧૦a  પ્રતિ પ્રિયતમँ રથં વૃષણં વસુવાહનમ્ ।
૧ ૫ ૧ ૦૩૧૦c  સ્તોતા વામશ્વિનાવૃશિ સ્તોમેભિર્ભૂષતિ પ્રતિ માધ્વી મમ શ્રુતँ હવમ્ ॥ ૪૧૮

૧ ૫ ૧ ૦૪૦૧a  આ તે અગ્ન ઇધીમહિ દ્યુમન્તં દેવાજરમ્ ।
૧ ૫ ૧ ૦૪૦૧c  યુદ્ધ સ્યા તે પનીયસી સમિદ્દીદયતિ દ્યવીષँ સ્તોતૃભ્ય આ ભર ॥ ૪૧૯
૧ ૫ ૧ ૦૪૦૨a  આગ્નિં ન સ્વવૃક્તિભિર્હોતારં ત્વા વૃણીમહે ।
૧ ૫ ૧ ૦૪૦૨c  શીરં પાવકશોચિષં વિ વો મદે યજ્ઞેષુ સ્તીર્ણબર્હિષં વિવક્ષસે ॥ ૪૨૦
૧ ૫ ૧ ૦૪૦૩a  મહે નો અદ્ય બોધયોષો રાયે દિવિત્મતી ।
૧ ૫ ૧ ૦૪૦૩c  યથા ચિન્નો અબોધયઃ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૪૨૧
૧ ૫ ૧ ૦૪૦૪a  ભદ્રં નો અપિ વાતય મનો દક્ષમુત ક્રતુમ્ ।
૧ ૫ ૧ ૦૪૦૪c  અથા તે સખ્યે અન્ધસો વિ વો મદે રણા ગાવો ન યવસે વિવક્ષસે ॥ ૪૨૨
૧ ૫ ૧ ૦૪૦૫a  ક્રત્વા મહાँ અનુષ્વધં ભીમ આ વાવૃતે શવઃ ।
૧ ૫ ૧ ૦૪૦૫c  શ્રિય ઋષ્વ ઉપાકયોર્નિ શિપ્રી હરિવાં દધે હસ્તયોર્વજ્રમાયસમ્ ॥ ૪૨૩
૧ ૫ ૧ ૦૪૦૬a  સ ઘા તં વૃષણँ રથમધિ તિષ્ઠાતિ ગોવિદમ્ ।

૧ ૫ ૧ ૦૪૦૬c યઃ પાત્રઁ હારિયોજનં પૂર્ણમિન્દ્રા ચિકેતતિ યોજા ન્વિન્દ્ર તે હરી ॥ ૪૨૪
૧ ૫ ૧ ૦૪૦૭a અગ્નિં તં મન્યે યો વસુરસ્તં યં યન્તિ ધેનવઃ ।
૧ ૫ ૧ ૦૪૦૭c અસ્તમર્વન્ત આશવોઽસ્તં નિત્યાસો વાજિન ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૪૨૫
૧ ૫ ૧ ૦૪૦૮a ન તમઁહો ન દુરિતં દેવાસો અષ્ટ મર્ત્યમ્ ।
૧ ૫ ૧ ૦૪૦૮c સજોષસો યમર્યમા મિત્રો નયતિ વરુણો અતિ દ્વિષઃ ॥ ૪૨૬

૧ ૫ ૧ ૦૫૦૧a પરિ પ્ર ધન્વેન્દ્રાય સોમ સ્વાદુર્મિત્રાય પૂષ્ણે ભગાય ॥ ૪૨૭
૧ ૫ ૧ ૦૫૦૨a પર્યૂ ષુ પ્ર ધન્વ વાજસાતયે પરિ વૃત્રાણિ સક્ષણિઃ ।
૧ ૫ ૧ ૦૫૦૨c દ્વિષસ્તરધ્યા ઋણયા ન ઈરસે ॥ ૪૨૮
૧ ૫ ૧ ૦૫૦૩a પવસ્વ સોમ મહાન્ત્સમુદ્રઃ પિતા દેવાનાં વિશ્વાભિ ધામ ॥ ૪૨૯
૧ ૫ ૧ ૦૫૦૪a પવસ્વ સોમ મહે દક્ષાયાશ્વો ન નિક્તો વાજી ધનાય ॥ ૪૩૦
૧ ૫ ૧ ૦૫૦૫a ઇન્દુઃ પવિષ્ટ ચારુર્મદાયાપામુપસ્થે કવિર્ભગાય ॥ ૪૩૧
૧ ૫ ૧ ૦૫૦૬a અનુ હિ ત્વા સુતઁ સોમ મદામસિ મહે સમર્યરાજ્યે ।
૧ ૫ ૧ ૦૫૦૬c વાજાઁ અભિ પવમાન પ્ર ગાહસે ॥ ૪૩૨
૧ ૫ ૧ ૦૫૦૭a ક ઈં વ્યક્તા નરઃ સનીડા રુદ્રસ્ય મર્યા અથ સ્વશ્વાઃ ॥ ૪૩૩
૧ ૫ ૧ ૦૫૦૮a અગ્ને તમદ્યાશ્વં ન સ્તોમૈઃ ક્રતું ન ભદ્રઁ હૃદિસ્પૃશમ્ ।
૧ ૫ ૧ ૦૫૦૮c ઋધ્યામા ત ઓહૈઃ ॥ ૪૩૪
૧ ૫ ૧ ૦૫૦૯a આવિર્મર્યા આ વાજં વાજિનો અગ્મં દેવસ્ય સવિતુઃ સવમ્ ।
૧ ૫ ૧ ૦૫૦૯c સ્વર્ગાં અર્વન્તો જયત ॥ ૪૩૫
૧ ૫ ૧ ૦૫૧૦a પવસ્વ સોમ દ્યુમ્ની સુધારો મહાઁ અવીનામનુપૂર્વ્યઃ ॥ ૪૩૬

પઞ્ચમ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૧ ૫ ૨ ૦૬૦૧a વિશ્વતોદાવન્વિશ્વતો ન આ ભર યં ત્વા શવિષ્ઠમીમહે ॥ ૪૩૭
૧ ૫ ૨ ૦૬૦૨a એષ બ્રહ્મા ય ઋત્વિય ઇન્દ્રો નામ શ્રુતો ગૃણે ॥ ૪૩૮
૧ ૫ ૨ ૦૬૦૩a બ્રહ્માણ ઇન્દ્રં મહયન્તો અર્કૈરવર્ધયન્નહયે હન્તવા ઉ ॥ ૪૩૯
૧ ૫ ૨ ૦૬૦૪a અનવસ્તે રથમશ્વાય તક્ષુસ્ત્વષ્ટા વજ્રં પુરુહૂત દ્યુમન્તમ્ ॥ ૪૪૦
૧ ૫ ૨ ૦૬૦૫a શં પદં મઘઁ રયીષિણો ન કામમવ્રતો હિનોતિ ન સ્પૃશદ્રયિમ્ ॥ ૪૪૧
૧ ૫ ૨ ૦૬૦૬a સદા ગાવઃ શુચયો વિશ્વધાયસઃ સદા દેવા અરેપસઃ ॥ ૪૪૨
૧ ૫ ૨ ૦૬૦૭a આ યાહિ વનસા સહ ગાવઃ સચન્ત વર્ત્તનિં યદૂધભિઃ ॥ ૪૪૩
૧ ૫ ૨ ૦૬૦૮a ઉપ પ્રક્ષે મધુમતિ ક્ષિયન્તઃ પુષ્યેમ રયિં ધીમહે ત ઇન્દ્ર ॥ ૪૪૪
૧ ૫ ૨ ૦૬૦૯a અર્ચન્ત્યર્કં મરુતઃ સ્વર્કા આ સ્તોભતિ શ્રુતો યુવા સ ઇન્દ્રઃ ॥ ૪૪૫
૧ ૫ ૨ ૦૬૧૦a પ્ર વ ઇન્દ્રાય વૃત્રહન્તમાય વિપ્રાય ગાથં ગાયત યં જુજોષતે ॥ ૪૪૬

૧ ૫ ૨ ૦૭૦૧a અચેત્યગ્નિશ્ચિકિતિર્હવ્યવાડ્ન સુમદ્રથઃ ॥ ૪૪૭

૧ ૫ ૨ ૦૭૦૨a  અગ્ને ત્વં નો અન્તમ ઉત ત્રાતા શિવો ભુવો વરૂથ્યઃ ॥ ૪૪૮
૧ ૫ ૨ ૦૭૦૩a  ભગો ન ચિત્રો અગ્નિર્મહોનાં દધાતિ રત્નમ્ ॥ ૪૪૯
૧ ૫ ૨ ૦૭૦૪a  વિશ્વસ્ય પ્ર સ્તોભ પુરો વા સન્યદિ વેહ નૂનમ્ ॥ ૪૫૦
૧ ૫ ૨ ૦૭૦૫a  ઉષા અપ સ્વસુષ્ટમઃ સં વર્ત્તયતિ વર્ત્તનિઁ સુજાતતા ॥ ૪૫૧
૧ ૫ ૨ ૦૭૦૬a  ઇમા નુ કં ભુવના સીષધેમેન્દ્રશ્ચ વિશ્વે ચ દેવાઃ ॥ ૪૫૨
૧ ૫ ૨ ૦૭૦૭a  વિ સ્રુતયો યથા પથ ઇન્દ્ર ત્વદ્યન્તુ રાતયઃ ॥ ૪૫૩
૧ ૫ ૨ ૦૭૦૮a  અયા વાજં દેવહિતઁ સનેમ મદેમ શતહિમાઃ સુવીરાઃ ॥ ૪૫૪
૧ ૫ ૨ ૦૭૦૯a  ઊર્જા મિત્રો વરુણઃ પિન્વતેડાઃ પીવરીમિષં કૃણુહી ન ઇન્દ્ર ॥ ૪૫૫
૧ ૫ ૨ ૦૭૧૦a  ઇન્દ્રો વિશ્વસ્ય રાજતિ ॥ ૪૫૬

૧ ૫ ૨ ૦૮૦૧a  ત્રિકદ્રુકેષુ મહિષો યવાશિરં તુવિશુષ્મસ્તૃમ્પત્સોમમપિબદ્વિષ્ણુના સુતં યથાવશમ્ ।
૧ ૫ ૨ ૦૮૦૧c  સ ઈં મમાદ મહિ કર્મ કર્ત્તવે મહામુરુઁ સૈનઁ સશ્ચદ્દેવો દેવઁ સત્ય ઇન્દુઃ સત્યમિન્દ્રમ્ ॥ ૪૫૭
૧ ૫ ૨ ૦૮૦૨a  અયઁ સહસ્રમાનવો દૃશઃ કવીનાં મતિર્જ્યોતિર્વિધર્મ ।
૧ ૫ ૨ ૦૮૦૨c  બ્રધ્નઃ સમીચીરુષસઃ સમૈરયદરેપસઃ સોચેતસઃ સ્વસરે મન્યુમન્તશ્ચિતા ગોઃ ॥ ૪૫૮
૧ ૫ ૨ ૦૮૦૩a  એન્દ્ર યાહ્યુપ નઃ પરાવતો નાયમચ્છા વિદથાનીવ સત્પતિરસ્તા રાજેવ સત્પતિઃ ।
૧ ૫ ૨ ૦૮૦૩c  હવામહે ત્વા પ્રયસ્વન્તઃ સુતેષ્વા પુત્રાસો ન પિતરં વાજસાતયે મઁહિષ્ઠં વાજસાતયે ॥ ૪૫૯
૧ ૫ ૨ ૦૮૦૪a  તમિન્દ્રં જોહવીમિ મઘવાનમુગ્રઁ સત્રા દધાનમપ્રતિષ્કુતઁ શ્રવાઁસિ ભૂરિઃ ।
૧ ૫ ૨ ૦૮૦૪c  મઁહિષ્ઠો ગીર્ભિરા ચ યજ્ઞિયો વવર્ત્ત રાયે નો વિશ્વા સુપથા કૃણોતુ વજ્રી ॥ ૪૬૦
૧ ૫ ૨ ૦૮૦૫a  અસ્તુ શ્રૌષ્ટ્પુરો અગ્નિં ધિયા દધ આ નુ ત્યચ્છર્ધો દિવ્યં વૃણીમહ ઇન્દ્રવાયૂ વૃણીમહે ।
૧ ૫ ૨ ૦૮૦૫c  યદ્ધ ક્રાણા વિવસ્વતે નાભા સન્દાય નવ્યસે ।
૧ ૫ ૨ ૦૮૦૫e  અધ પ્ર નૂનમુપ યન્તિ ધીતયો દેવાઁઅચ્છા ન ધીતયઃ ॥ ૪૬૧
૧ ૫ ૨ ૦૮૦૬a  પ્ર વો મહે મતયો યન્તુ વિષ્ણવે મરુત્વતે ગિરિજા એવયામરુત્ ।
૧ ૫ ૨ ૦૮૦૬c  પ્ર શર્ધાય પ્ર યજ્યવે સુખાદયે તવસે ભન્દદિષ્ટયે ધુનિવ્રતાય શવસે ॥ ૪૬૨
૧ ૫ ૨ ૦૮૦૭a  અયા રુચા હરિણ્યા પુનાનો વિશ્વા દ્વેષાઁસિ તરતિ સયુગ્વભિઃ સૂરો ન સયુગ્વભિઃ ।
૧ ૫ ૨ ૦૮૦૭c  ધારા પૃષ્ઠસ્ય રોચતે પુનાનો અરુષો હરિઃ ।
૧ ૫ ૨ ૦૮૦૭e  વિશ્વા યદ્રૂપા પરિયાસ્યૃક્વભિઃ સપ્તાસ્યેભિરૃક્વભિઃ ॥ ૪૬૩
૧ ૫ ૨ ૦૮૦૮a  અભિ ત્યં દેવઁ સવિતારમોણ્યોઃ કવિક્રતુમર્ચામિ સત્યસવઁ રત્નધામભિ પ્રિયં મતિમ્
૧ ૫ ૨ ૦૮૦૮c  ઊર્ધ્વા યસ્યામતિર્ભા અદિદ્યુતત્સવીમનિ હિરણ્યપાણિરમિમીત સુક્રતુઃ કૃપા સ્વઃ ॥ ૪૬૪
૧ ૫ ૨ ૦૮૦૯a  અગ્નિઁ હોતારં મન્યે દાસ્વન્તં વસોઃ સૂનુઁ સહસો જાતવેદસં વિપ્રં ન જાતવેદસમ્ ।
૧ ૫ ૨ ૦૮૦૯c  ય ઊર્ધ્વયા સ્વધ્વરો દેવો દેવાચ્યા કૃપા ।
૧ ૫ ૨ ૦૮૦૯c  ઘૃતસ્ય વિભ્રાષ્ટિમનુ શુક્રશોચિષ આજુહ્વાનસ્ય સર્પિષઃ ॥ ૪૬૫
૧ ૫ ૨ ૦૮૧૦a  તવ ત્યન્નર્યં નૃતોઽપ ઇન્દ્ર પ્રથમં પૂર્વ્યં દિવિ પ્રવાચ્યં કૃતમ્ ।

૧ ૫ ૨ ૦૮૧૦c યો દેવસ્ય શવસા પ્રારિણા અસુ રિણન્નપઃ ।
૧ ૫ ૨ ૦૮૧૦e ભુવો વિશ્વમભ્યદેવમોજસા વિદેદૂર્જં શતક્રતુર્વિદેદિષમ્ ॥ ૪૬૬

॥ ઇત્યૈન્દ્રં પર્વ કાણ્ડમ્ ॥

પાવમાન કાણ્ડમ્

૧ ૫ ૨ ૦૯૦૧a ઉચ્ચા તે જાતમન્ધસો દિવિ સદ્ભૂમ્યા દદે ।
૧ ૫ ૨ ૦૯૦૧c ઉગ્રँ શર્મ મહિ શ્રવઃ ॥ ૪૬૭
૧ ૫ ૨ ૦૯૦૨a સ્વાદિષ્ઠયા મદિષ્ઠયા પવસ્વ સોમ ધારયા ।
૧ ૫ ૨ ૦૯૦૨c ઇન્દ્રાય પાતવે સુતઃ ॥ ૪૬૮
૧ ૫ ૨ ૦૯૦3a વૃષા પવસ્વ ધારયા મરુત્વતે ચ મત્સરઃ ।
૧ ૫ ૨ ૦૯૦3c વિશ્વા દધાન ઓજસા ॥ ૪૬૯
૧ ૫ ૨ ૦૯૦૪a યસ્તે મદો વરેણ્યસ્તેના પવસ્વાન્ધસા ।
૧ ૫ ૨ ૦૯૦૪c દેવાવીરઘશँસહા ॥ ૪૭૦
૧ ૫ ૨ ૦૯૦૫a તિસ્રો વાચ ઉદીરતે ગાવો મિમન્તિ ધેનવઃ ।
૧ ૫ ૨ ૦૯૦૫c હરિરેતિ કનિક્રદત્ ॥ ૪૭૧
૧ ૫ ૨ ૦૯૦૬a ઇન્દ્રાયેન્દો મરુત્વતે પવસ્વ મધુમત્તમઃ ।
૧ ૫ ૨ ૦૯૦૬c અર્કસ્ય યોનિમાસદમ્ ॥ ૪૭૨
૧ ૫ ૨ ૦૯૦૭a અસાવ્યँશુર્મદાયાપ્સુ દક્ષો ગિરિષ્ઠાઃ ।
૧ ૫ ૨ ૦૯૦૭c શ્યેનો ન યોનિમાસદત્ ॥ ૪૭૩
૧ ૫ ૨ ૦૯૦૮a પવસ્વ દક્ષસાધનો દેવેભ્યઃ પીતયે હરે ।
૧ ૫ ૨ ૦૯૦૮c મરુદ્ભ્યો વાયવે મદઃ ॥ ૪૭૪
૧ ૫ ૨ ૦૯૦૯a પરિ સ્વાનો ગિરિષ્ઠાઃ પવિત્રે સોમો અક્ષરત્ ।
૧ ૫ ૨ ૦૯૦૯c મદેષુ સર્વધા અસિ ॥ ૪૭૫
૧ ૫ ૨ ૦૯૧૦a પરિ પ્રિયા દિવઃ કવિર્વયાँસિ નપ્ત્યોર્હિતઃ ।
૧ ૫ ૨ ૦૯૧૦c સ્વાનૈર્યાતિ કવિક્રતુઃ ॥ ૪૭૬

૧ ૫ ૨ ૧૦૦૧a પ્ર સોમાસો મદચ્યુતઃ શ્રવસે નો મઘોનઃ ।
૧ ૫ ૨ ૧૦૦૧c સુતા વિદથે અક્રમુઃ ॥ ૪૭૭
૧ ૫ ૨ ૧૦૦૨a પ્ર સોમાસો વિપશ્ચિતોઽપો નયન્ત ઊર્મયઃ ।
૧ ૫ ૨ ૧૦૦૨c વનાનિ મહિષા ઇવ ॥ ૪૭૮
૧ ૫ ૨ ૧૦૦3a પવસ્વેન્દો વૃષા સુતઃ કૃધી નો યશસો જને ।
૧ ૫ ૨ ૧૦૦3c વિશ્વા અપ દ્વિષો જહિ ॥ ૪૭૯
૧ ૫ ૨ ૧૦૦૪a વૃષા હ્યસિ ભાનુના દ્યુમન્તં ત્વા હવામહે ।

૧ ૫ ૨ ૧૦૦૪c પવમાન સ્વર્દૃશમ્ ॥ ૪૮૦
૧ ૫ ૨ ૧૦૦૫a ઇન્દુઃ પવિષ્ટ ચેતનઃ પ્રિયઃ કવીનાં મતિઃ ।
૧ ૫ ૨ ૧૦૦૫c સૃજદશ્વઁ રથીરિવ ॥ ૪૮૧
૧ ૫ ૨ ૧૦૦૬a અસૃક્ષત પ્ર વાજિનો ગવ્યા સોમાસો અશ્વયા ।
૧ ૫ ૨ ૧૦૦૬c શુક્રાસો વીરયાશવઃ ॥ ૪૮૨
૧ ૫ ૨ ૧૦૦૭a પવસ્વ દેવ આયુષગિન્દ્રં ગચ્છતુ તે મદઃ ।
૧ ૫ ૨ ૧૦૦૭c વાયુમા રોહ ધર્મણા ॥ ૪૮૩
૧ ૫ ૨ ૧૦૦૮a પવમાનો અજીજનદ્દિવશ્ચિત્રં ન તન્યતુમ્ ।
૧ ૫ ૨ ૧૦૦૮c જ્યોતિર્વૈશ્વાનરં બૃહત્ ॥ ૪૮૪
૧ ૫ ૨ ૧૦૦૯a પરિ સ્વાનાસ ઇન્દવો મદાય બર્હણા ગિરા ।
૧ ૫ ૨ ૧૦૦૯c મધો અર્ષન્તિ ધારયા ॥ ૪૮૫
૧ ૫ ૨ ૧૦૧૦a પરિ પ્રાસિષ્યદત્કવિઃ સિન્ધોરૂર્માવધિ શ્રિતઃ ।
૧ ૫ ૨ ૧૦૧૦c કારું બિભ્રત્પુરુસ્પૃહમ્ ॥ ૪૮૬

ષષ્ઠ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

૧ ૬ ૧ ૦૧૦૧a ઉપો ષુ જાતમપ્તુરં ગોભિર્ભઙ્ગં પરિષ્કૃતમ્ ।
૧ ૬ ૧ ૦૧૦૧c ઇન્દું દેવા અયાસિષુઃ ॥ ૪૮૭
૧ ૬ ૧ ૦૧૦૨a પુનાનો અક્રમીદભિ વિશ્વા મૃધો વિચર્ષણિઃ ।
૧ ૬ ૧ ૦૧૦૨c શુમ્ભન્તિ વિપ્રં ધીતિભિઃ ॥ ૪૮૮
૧ ૬ ૧ ૦૧૦૩a આવિશન્કલશઁ સુતો વિશ્વા અર્ષન્નભિ શ્રિયઃ ।
૧ ૬ ૧ ૦૧૦૩c ઇન્દુરિન્દ્રાય ધીયતે ॥ ૪૮૯
૧ ૬ ૧ ૦૧૦૪a અસર્જિ રથ્યો યથા પવિત્રે ચમ્વોઃ સુતઃ ।
૧ ૬ ૧ ૦૧૦૪c કાર્ષ્મન્વાજી ન્યક્રમીત્ ॥ ૪૯૦
૧ ૬ ૧ ૦૧૦૫a પ્ર યદ્ગાવો ન ભૂર્ણયસ્ત્વેષા અયાસો અક્રમુઃ ।
૧ ૬ ૧ ૦૧૦૫c ઘ્નન્તઃ કૃષ્ણામપ ત્વચમ્ ॥ ૪૯૧
૧ ૬ ૧ ૦૧૦૬a અપઘ્નન્પવસે મૃધઃ ક્રતુવિત્સોમ મત્સરઃ ।
૧ ૬ ૧ ૦૧૦૬c નુદસ્વાદેવયું જનમ્ ॥ ૪૯૨
૧ ૬ ૧ ૦૧૦૭a અયા પવસ્વ ધારયા યયા સૂર્યમરોચયઃ ।
૧ ૬ ૧ ૦૧૦૭c હિન્વાનો માનુષીરપઃ ॥ ૪૯૩
૧ ૬ ૧ ૦૧૦૮a સ પવસ્વ ય આવિથેન્દ્રં વૃત્રાય હન્તવે ।
૧ ૬ ૧ ૦૧૦૮c વવ્રિવાઁસં મહીરપઃ ॥ ૪૯૪
૧ ૬ ૧ ૦૧૦૯a અયા વીતી પરિ સ્રવ યસ્ત ઇન્દો મદેષ્વા ।

૧ ૬ ૧ ૦૧૦૯c અવાહન્નવતીર્નવ ॥ ૪૯૫
૧ ૬ ૧ ૦૧૧૦a પરિ દ્યુક્ષઁ સનદ્રયિં ભરદ્વાજં નો અન્ધસા ।
૧ ૬ ૧ ૦૧૧૦c સ્વાનો અર્ષ પવિત્ર આ ॥ ૪૯૬

૧ ૬ ૧ ૦૨૦૧a અચિક્રદદ્વૃષા હરિર્મહાન્મિત્રો ન દર્શતઃ ।
૧ ૬ ૧ ૦૨૦૧c સઁ સૂર્યેણ દિદ્યુતે ॥ ૪૯૭
૧ ૬ ૧ ૦૨૦૨a આ તે દક્ષં મયોભુવં વહ્નિમદ્યા વૃણીમહે ।
૧ ૬ ૧ ૦૨૦૨c પાન્તમા પુરુસ્પૃહમ્ ॥ ૪૯૮
૧ ૬ ૧ ૦૨૦૩a અધ્વર્યો અદ્રિભિઃ સુતઁ સોમં પવિત્ર આ નય ।
૧ ૬ ૧ ૦૨૦૩c પુનીહીન્દ્રાય પાતવે ॥ ૪૯૯
૧ ૬ ૧ ૦૨૦૪a તરત્સ મન્દી ધાવતિ ધારા સુતસ્યાન્ધસઃ ।
૧ ૬ ૧ ૦૨૦૪c તરત્સ મન્દી ધાવતિ ॥ ૫૦૦
૧ ૬ ૧ ૦૨૦૫a આ પવસ્વ સહસ્રિણઁ રયિઁ સોમ સુવીર્યમ્ ।
૧ ૬ ૧ ૦૨૦૫c અસ્મે શ્રવાઁસિ ધારય ॥ ૫૦૧
૧ ૬ ૧ ૦૨૦૬a અનુ પ્રત્નાસ આયવઃ પદં નવીયો અક્રમુઃ ।
૧ ૬ ૧ ૦૨૦૬c રુચે જનન્ત સૂર્યમ્ ॥ ૫૦૨
૧ ૬ ૧ ૦૨૦૭a અર્ષા સોમ દ્યુમત્તમોઽભિ દ્રોણાનિ રોરુવત્ ।
૧ ૬ ૧ ૦૨૦૭c સીદન્યોનૌ યોનેષ્વા ॥ ૫૦૩
૧ ૬ ૧ ૦૨૦૮a વૃષા સોમ દ્યુમાઁ અસિ વૃષા દેવ વૃષવ્રતઃ ।
૧ ૬ ૧ ૦૨૦૮c વૃષા ધર્માણિ દધ્રિષે ॥ ૫૦૪
૧ ૬ ૧ ૦૨૦૯a ઇષે પવસ્વ ધારયા મૃજ્યમાનો મનીષિભિઃ ।
૧ ૬ ૧ ૦૨૦૯c ઇન્દો રુચાભિ ગા ઇહિ ॥ ૫૦૫
૧ ૬ ૧ ૦૨૧૦a મન્દ્રયા સોમ ધારયા વૃષા પવસ્વ દેવયુઃ ।
૧ ૬ ૧ ૦૨૧૦c અવ્યો વારેભિરસ્મયુઃ ॥ ૫૦૬
૧ ૬ ૧ ૦૨૧૧a અયા સોમ સુકૃત્યયા મહાન્ત્સન્નભ્યવર્ધથાઃ ।
૧ ૬ ૧ ૦૨૧૧c હિન્દાન ઇદ્વૃષાયસે ॥ ૫૦૭
૧ ૬ ૧ ૦૨૧૨a અયં વિચર્ષણિર્હિતઃ પવમાનઃ સ ચેતતિ ।
૧ ૬ ૧ ૦૨૧૨c હિન્વાન આપ્યં બૃહત્ ॥ ૫૦૮
૧ ૬ ૧ ૦૨૧૩a પ્ર ણ ઇન્દો મહે તુ ન ઊર્મિં ન બિભ્રદર્ષસિ ।
૧ ૬ ૧ ૦૨૧૩c અભિ દેવાઁ અયાસ્યઃ ॥ ૫૦૯
૧ ૬ ૧ ૦૨૧૪a અપઘ્નન્પવતે મૃધોઽપ સોમો અરાવ્ણઃ ।
૧ ૬ ૧ ૦૨૧૪c ગચ્છન્નિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૫૧૦

૧ ૬ ૧ ૦૩૦૧a  પુનાનઃ સોમ ધારયાપો વસાનો અર્ષસિ ।
૧ ૬ ૧ ૦૩૦૧c  આ રત્નધા યોનિમૃતસ્ય સીદસ્યુત્સો દેવો હિરણ્યયઃ ॥ ૫૧૧
૧ ૬ ૧ ૦૩૦૨a  પરીતો ષિઞ્ચતા સુતઁ સોમો ય ઉત્તમઁ હવિઃ ।
૧ ૬ ૧ ૦૩૦૨c  દધન્વાઁ યો નર્યો અપ્સ્વાઉન્તરા સુષાવ સોમમદ્રિભિઃ ॥ ૫૧૨
૧ ૬ ૧ ૦૩૦૩a  આ સોમ સ્વાનો અદ્રિભિસ્તિરો વારાણ્યવ્યયા ।
૧ ૬ ૧ ૦૩૦૩c  જનો ન પુરિ ચમ્વોર્વિશદ્ધરિઃ સદો વનેષુ દધ્રિષે ॥ ૫૧૩
૧ ૬ ૧ ૦૩૦૪a  પ્ર સોમ દેવવીતયે સિન્ધુર્ન પિપ્યે અર્ણસા ।
૧ ૬ ૧ ૦૩૦૪c  અઁશોઃ પયસા મદિરો ન જાગૃવિરચ્છા કોશં મધુશ્ચુતમ્ ॥ ૫૧૪
૧ ૬ ૧ ૦૩૦૫a  સોમ ઉ ષ્વાણઃ સોતૃભિરધિ ષ્ણુભિરવીનામ્ ।
૧ ૬ ૧ ૦૩૦૫c  અશ્વયેવ હરિતા યાતિ ધારયા મન્દ્રયા યાતિ ધારયા ॥ ૫૧૫
૧ ૬ ૧ ૦૩૦૬a  તવાહઁ સોમ રારણ સખ્ય ઇન્દો દિવેદિવે ।
૧ ૬ ૧ ૦૩૦૬c  પુરૂણિ બભ્રો નિ ચરન્તિ મામવ પરિધીઁરતિ તાઁ ઇહિ ॥ ૫૧૬
૧ ૬ ૧ ૦૩૦૭a  મૃજ્યમાનઃ સુહસ્ત્યા સમુદ્રે વાચમિન્વસિ ।
૧ ૬ ૧ ૦૩૦૭c  રયિં પિશઙ્ગં બહુલં પુરુસ્પૃહં પવમાનાભ્યર્ષસિ ॥ ૫૧૭
૧ ૬ ૧ ૦૩૦૮a  અભિ સોમાસ આયવઃ પવન્તે મદ્યં મદમ્ ।
૧ ૬ ૧ ૦૩૦૮c  સમુદ્રસ્યાધિ વિષ્ટપે મનીષિણો મત્સરાસો મદચ્યુતઃ ॥ ૫૧૮
૧ ૬ ૧ ૦૩૦૯a  પુનાનઃ સોમ જાગૃવિરવ્યા વારૈઃ પરિ પ્રિયઃ ।
૧ ૬ ૧ ૦૩૦૯c  ત્વં વિપ્રો અભવોઽઙ્ગિરસ્તમ મધ્વા યજ્ઞં મિમિક્ષ ણઃ ॥ ૫૧૯
૧ ૬ ૧ ૦૩૧૦a  ઇન્દ્રાય પવતે મદઃ સોમો મરુત્વતે સુતઃ ।
૧ ૬ ૧ ૦૩૧૦c  સહસ્રધારો અત્યવ્યમર્ષતિ તમી મૃજન્ત્યાયવઃ ॥ ૫૨૦
૧ ૬ ૧ ૦૩૧૧a  પવસ્વ વાજસાતમોઽભિ વિશ્વાનિ વાર્યા ।
૧ ૬ ૧ ૦૩૧૧c  ત્વઁ સમુદ્રઃ પ્રથમે વિધર્મં દેવેભ્યં સોમ મત્સરઃ ॥ ૫૨૧
૧ ૬ ૧ ૦૩૧૨a  પવમાના અસૃક્ષત પવિત્રમતિ ધારયા ।
૧ ૬ ૧ ૦૩૧૨c  મરુત્વન્તો મત્સરા ઇન્દ્રિયા હયા મેધામભિ પ્રયાઁસિ ચ ॥ ૫૨૨

૧ ૬ ૧ ૦૪૦૧a  પ્ર તુ દ્રવ પરિ કોશં નિ ષીદ નૃભિઃ પુનાનો અભિ વાજમર્ષ ।
૧ ૬ ૧ ૦૪૦૧c  અશ્વં ન ત્વા વાજિનં મર્જયન્તોઽચ્છા બર્હી રશનાભિર્નયન્તિ ॥ ૫૨૩
૧ ૬ ૧ ૦૪૦૨a  પ્ર કાવ્યમુશનેવ બ્રુવાણો દેવો દેવાનાં જનિમા વિવક્તિ ।
૧ ૬ ૧ ૦૪૦૨c  મહિવ્રતઃ શુચિબન્ધુઃ પાવકઃ પદા વરાહો અભ્યેતિ રેભન્ ॥ ૫૨૪
૧ ૬ ૧ ૦૪૦૩a  તિસ્રો વાચ ઈરયતિ પ્ર વહ્નિરૃતસ્ય ધીતિં બ્રહ્મણો મનીષામ્ ।
૧ ૬ ૧ ૦૪૦૩c  ગાવો યન્તિ ગોપતિં પૃચ્છમાનાઃ સોમં યન્તિ મતયો વાવશાનાઃ ॥ ૫૨૫
૧ ૬ ૧ ૦૪૦૪a  અસ્ય પ્રેષા હેમના પૂયમાનો દેવો દેવેભિઃ સમપૃક્ત રસમ્ ।

૧ ૬ ૧ ૦૪૦૪c સુતઃ પવિત્રં પર્યેતિ રેભન્મિતેવ સદ્મ પશુમન્તિ હોતા ॥ ૫૨૬
૧ ૬ ૧ ૦૪૦૫a સોમઃ પવતે જનિતા મતીનાં જનિતા દિવો જનિતા પૃથિવ્યાઃ ।
૧ ૬ ૧ ૦૪૦૫c જનિતાગ્નેર્જનિતા સૂર્યસ્ય જનિતેન્દ્રસ્ય જનિતોત વિષ્ણોઃ ॥ ૫૨૭
૧ ૬ ૧ ૦૪૦૬a અભિ ત્રિપૃષ્ઠં વૃષણં વયોધામાઙ્ગોષિણમવાવશન્ત વાણીઃ ।
૧ ૬ ૧ ૦૪૦૬c વના વસાનો વરુણો ન સિન્ધૂર્વિ રત્નધા દયતે વાર્યાણિ ॥ ૫૨૮
૧ ૬ ૧ ૦૪૦૭a અક્રાન્ત્સમુદ્રઃ પ્રથમે વિધર્મં જનયન્પ્રજા ભુવનસ્ય ગોપાઃ ।
૧ ૬ ૧ ૦૪૦૭c વૃષા પવિત્રે અધિ સાનો અવ્યે બૃહત્સોમો વાવૃધે સ્વાનો અદ્રિઃ ॥ ૫૨૯
૧ ૬ ૧ ૦૪૦૮a કનિક્રન્તિ હરિરા સૃજ્યમાનઃ સીદન્વનસ્ય જઠરે પુનાનઃ ।
૧ ૬ ૧ ૦૪૦૮c નૃભિર્યતઃ કૃણુતે નિર્ણિજં ગામતો મતિં જનયત સ્વધાભિઃ ॥ ૫૩૦
૧ ૬ ૧ ૦૪૦૯a એષ સ્ય તે મધુમાઁ ઇન્દ્ર સોમો વૃષા વૃષ્ણઃ પરિ પવિત્રે અક્ષાઃ ।
૧ ૬ ૧ ૦૪૦૯c સહસ્રદાઃ શતદા ભૂરિદાવા શશ્વત્તમં બર્હિરા વાજ્યસ્થાત્ ॥ ૫૩૧
૧ ૬ ૧ ૦૪૧૦a પવસ્વ સોમ મધુમાઁ ઋતાવાપો વસાનો અધિ સાનો અવ્યે ।
૧ ૬ ૧ ૦૪૧૦c અવ દ્રોણાનિ ઘૃતવન્તિ રોહ મદિન્તમો મત્સર ઇન્દ્રપાનઃ ॥ ૫૩૨

૧ ૬ ૧ ૦૫૦૧a પ્ર સેનાનીઃ શૂરો અગ્રે રથાનાં ગવ્યન્નેતિ હર્ષતે અસ્ય સેના ।
૧ ૬ ૧ ૦૫૦૧c ભદ્રાન્કૃણ્વન્નિન્દ્રહવાન્ત્સખિભ્ય આ સોમો વસ્ત્રા રભસાનિ દત્તે ॥ ૫૩૩
૧ ૬ ૧ ૦૫૦૨a પ્ર તે ધારા મધુમતીરસૃગ્રન્વારં યત્પૂતો અત્યેષ્યવ્યમ્ ।
૧ ૬ ૧ ૦૫૦૨c પવમાન પવસે ધામ ગોનાં જનયન્ત્સૂર્યમપિન્વો અર્કૈઃ ॥ ૫૩૪
૧ ૬ ૧ ૦૫૦૩a પ્ર ગાયતાભ્યર્ચામ દેવાન્ત્સોમઁ હિનોત મહતે ધનાય ।
૧ ૬ ૧ ૦૫૦૩c સ્વાદુઃ પવતામતિ વારમવ્યમા સીદતુ કલશં દેવ ઇન્દુઃ ॥ ૫૩૫
૧ ૬ ૧ ૦૫૦૪a પ્ર હિન્વાનો જનિતા રોદસ્યો રથો ન વાજઁ સનિષન્નયાસીત્ ।
૧ ૬ ૧ ૦૫૦૪c ઇન્દ્રં ગચ્છન્નાયુધા સઁશિશાનો વિશ્વા વસુ હસ્તયોરાદધાનઃ ॥ ૫૩૬
૧ ૬ ૧ ૦૫૦૫a તક્ષદ્યદી મનસો વેનતો વાગ્જ્યેષ્ઠસ્ય ધર્મં દ્યુક્ષોરનીકે ।
૧ ૬ ૧ ૦૫૦૫c આદીમાયન્વરમા વાવશાના જુષ્ટં પતિં કલશે ગાવ ઇન્દુમ્ ॥ ૫૩૭
૧ ૬ ૧ ૦૫૦૬a સાકમુક્ષો મર્જયન્ત સ્વસારો દશ ધીરસ્ય ધીતયો ધનુત્રીઃ ।
૧ ૬ ૧ ૦૫૦૬c હરિઃ પર્યદ્રવજ્જાઃ સૂર્યસ્ય દ્રોણં નનક્ષે અત્યો ન વાજી ॥ ૫૩૮
૧ ૬ ૧ ૦૫૦૭a અધિ યદસ્મિન્વાજિનીવ શુભઃ સ્પર્ધન્તે ધિયઃ સૂરે ન વિશઃ ।
૧ ૬ ૧ ૦૫૦૭c અપો વૃણાનઃ પવતે કવીયન્વ્રજં ન પશુવર્ધનાય મન્મ ॥ ૫૩૯
૧ ૬ ૧ ૦૫૦૮a ઇન્દુર્વાજી પવતે ગોન્યોઘા ઇન્દ્રે સોમઃ સહ ઇન્વન્મદાય ।
૧ ૬ ૧ ૦૫૦૮c હન્તિ રક્ષો બાધતે પર્યરાતિં વરિવસ્કૃણ્વન્વૃજનસ્ય રાજા ॥ ૫૪૦
૧ ૬ ૧ ૦૫૦૯a અયા પવા પવસ્વૈના વસૂનિ માઁશ્ચત્વ ઇન્દ્રો સરસિ પ્ર ધન્વ ।
૧ ૬ ૧ ૦૫૦૯c બ્રધ્નશ્ચિદ્યસ્ય વાતો ન જૂતિં પુરુમેધાશ્ચિત્તકવે નરં ધાત્ ॥ ૫૪૧

૧ ૬ ૧ ૦૫૧૦a મહત્તત્સોમો મહિષશ્ચકારાપાં યદ્ગર્ભોઽવૃણીત દેવાન્ ।
૧ ૬ ૧ ૦૫૧૦c અદધાદિન્દ્રે પવમાન ઓજોઽજનયત્સૂર્યે જ્યોતિરિન્દુઃ ॥ ૫૪૨
૧ ૬ ૧ ૦૫૧૧a અસર્જિ વક્વા રથ્યે યથાજૌ ધિયા મનોતા પ્રથમા મનીષ ।
૧ ૬ ૧ ૦૫૧૧c દશ સ્વસારો અધિ સાનો અવ્યે મૃજન્તિ વહ્નિઁ સદનેષ્વચ્છ ॥ ૫૪૩
૧ ૬ ૧ ૦૫૧૨a અપામિવેદૂર્મયસ્તર્ત્તુરાણાઃ પ્ર મનીષા ઈરતે સોમમચ્છ ।
૧ ૬ ૧ ૦૫૧૨c નમસ્યન્તીરુપ ચ યન્તિ સં ચાચ વિશન્ત્યુશતીરુશન્તમ્ ॥ ૫૪૪

ષષ્ઠ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ
૧ ૬ ૨ ૦૬૦૧a પુરોજિતી વો અન્ધસઃ સુતાય માદયિત્નવે ।
૧ ૬ ૨ ૦૬૦૧c અપ શ્વાનઁ શ્નથિષ્ટન સખાયો દીર્ઘજિહ્વ્યમ્ ॥ ૫૪૫
૧ ૬ ૨ ૦૬૦૨a અયં પૂષા રયિર્ભગઃ સોમઃ પુનાનો અર્ષતિ ।
૧ ૬ ૨ ૦૬૦૨c પતિર્વિશ્વસ્ય ભૂમનો વ્યખ્યદ્રોદસી ઉભે ॥ ૫૪૬
૧ ૬ ૨ ૦૬૦૩a સુતાસો મધુમત્તમાઃ સોમા ઇન્દ્રાય મન્દિનઃ ।
૧ ૬ ૨ ૦૬૦૩c પવિત્રવન્તો અક્ષરન્દેવાન્ગચ્છન્તુ વો મદાઃ ॥ ૫૪૭
૧ ૬ ૨ ૦૬૦૪a સોમાઃ પવન્ત ઇન્દવોઽસ્મભ્યં ગાતુવિત્તમાઃ ।
૧ ૬ ૨ ૦૬૦૪c મિત્રાઃ સ્વાના અરેપસઃ સ્વાધ્યઃ સ્વર્વિદઃ ॥ ૫૪૮
૧ ૬ ૨ ૦૬૦૫a અભી નો વાજસાતમઁ રયિમર્ષ શતસ્પૃહમ્ ।
૧ ૬ ૨ ૦૬૦૫c ઇન્દો સહસ્રભર્ણસં તુવિદ્યુમ્નં વિભાસહમ્ ॥ ૫૪૯
૧ ૬ ૨ ૦૬૦૬a અભી નવન્તે અદ્રુહઃ પ્રિયમિન્દ્રસ્ય કામ્યમ્ ।
૧ ૬ ૨ ૦૬૦૬c વત્સં ન પૂર્વ આયુનિ જાતઁ રિહન્તિ માતરઃ ॥ ૫૫૦
૧ ૬ ૨ ૦૬૦૭a આ હર્યતાય ધૃષ્ણવે ધનુષ્ટન્વન્તિ પૌઁસ્યમ્ ।
૧ ૬ ૨ ૦૬૦૭c શુક્રા વિ યન્ત્યસુરાય નિર્ણિજે વિપામગ્રે મહીયુવઃ ॥ ૫૫૧
૧ ૬ ૨ ૦૬૦૮a પરિ ત્યઁ હર્યતઁ હરિં બભ્રું પુનન્તિ વારેણ ।
૧ ૬ ૨ ૦૬૦૮c યો દેવાન્વિશ્વાઁ ઇત્પરિ મદેન સહ ગચ્છતિ ॥ ૫૫૨
૧ ૬ ૨ ૦૬૦૯a પ્ર સુન્વાનાસ્યાન્ધસો મર્તો ન વષ્ટ તદ્વચઃ ।
૧ ૬ ૨ ૦૬૦૯c અપ શ્વાનમરાધસઁ હતા મખં ન ભૃગવઃ ॥ ૫૫૩

૧ ૬ ૨ ૦૭૦૧a અભિ પ્રિયાણિ પવતે ચનોહિતો નામાનિ યહ્વો અધિ યેષુ વર્ધતે ।
૧ ૬ ૨ ૦૭૦૧c આ સૂર્યસ્ય બૃહતો બૃહન્નધિ રથં વિષ્વઞ્ચમરુહદ્વિચક્ષણઃ ॥ ૫૫૪
૧ ૬ ૨ ૦૭૦૨a અચોદસો નો ધન્વન્ત્વિન્દવઃ પ્ર સ્વાનાસો બૃહદ્દેવેષુ હરયઃ ।
૧ ૬ ૨ ૦૭૦૨c વિ ચિદશ્નાના ઇષયો અરાતયોઽર્યો નઃ સન્તુ સનિષન્તુ નો ધિયઃ ॥ ૫૫૫
૧ ૬ ૨ ૦૭૦૩a એષ પ્ર કોશે મધુમાઁ અચિક્રદદિન્દ્રસ્ય વજ્રો વપુષો વપુષ્ટમઃ ।
૧ ૬ ૨ ૦૭૦૩c અભ્યૃઉતસ્ય સુદુઘા ઘૃતશ્ચુતો વાશ્રા અર્ષન્તિ પયસા ચ ધેનવઃ ॥ ૫૫૬

૧ ૬ ૨ ૦૭૦૪a પ્રો અયાસીદિન્દુરિન્દ્રસ્ય નિષ્કૃતઁ સખા સખ્યુર્ન પ્ર મિનાતિ સઙ્ગિરમ્ ।
૧ ૬ ૨ ૦૭૦૪c મર્ય ઇવ યુવતિભિઃ સમર્ષતિ સોમઃ કલશે શતયામના પથા ॥ ૫૫૭
૧ ૬ ૨ ૦૭૦૫a ધર્તા દિવઃ પવતે કૃત્વ્યો રસો દક્ષો દેવાનામનુમાદ્યો નૃભિઃ ।
૧ ૬ ૨ ૦૭૦૫c હરિઃ સૃજાનો અત્યો ન સત્વભિર્વૃથા પાજાઁસિ કૃણુષે નદીષ્વા ॥ ૫૫૮
૧ ૬ ૨ ૦૭૦૬a વૃષા મતીનાં પવતે વિચક્ષણઃ સોમો અહ્નાં પ્રતરીતોષસાં દિવઃ ।
૧ ૬ ૨ ૦૭૦૬c પ્રાણા સિન્ધૂનાં કલશાઁ અચિક્રદદિન્દ્રસ્ય હાર્દ્યાવિશન્મનીષિભિઃ ॥ ૫૫૯
૧ ૬ ૨ ૦૭૦૭a ત્રિરસ્મૈ સપ્ત ધેનવો દુદુહ્રિરે સત્યામાશિરં પરમે વ્યોમનિ ।
૧ ૬ ૨ ૦૭૦૭c ચત્વાર્યન્યા ભુવનાનિ નિર્ણિજે ચારૂણિ ચક્રે યદૃતૈરવર્ધત ॥ ૫૬૦
૧ ૬ ૨ ૦૭૦૮a ઇન્દ્રાય સોમ સુષુતઃ પરિ સ્રવાપામીવા ભવતુ રક્ષસા સહ ।
૧ ૬ ૨ ૦૭૦૮c મા તે રસસ્ય મત્સત દ્વયાવિનો દ્રવિણસ્વન્ત ઇહ સન્ત્વિન્દવઃ ॥ ૫૬૧
૧ ૬ ૨ ૦૭૦૯a અસાવિ સોમો અરુષો વૃષા હરી રાજેવ દસ્મો અભિ ગા અચિક્રદત્ ।
૧ ૬ ૨ ૦૭૦૯c પુનાનો વારમત્યેષ્યવ્યયઁ શ્યેનો ન યોનિં ઘૃતવન્તમાસદત્ ॥ ૫૬૨
૧ ૬ ૨ ૦૭૧૦a પ્ર દેવમચ્છા મધુમન્ત ઇન્દવોઽસિષ્યદન્ત ગાવ આ ન ધેનવઃ ।
૧ ૬ ૨ ૦૭૧૦c બર્હિષદો વચનાવન્ત ઊધભિઃ પરિસ્રુતમુસ્રિયા નિર્ણિજં ધિરે ॥ ૫૬૩
૧ ૬ ૨ ૦૭૧૧a અઞ્જતે વ્યઞ્જતે સમઞ્જતે ક્રતું રિહન્તિ મધ્વાભ્યઞ્જતે ।
૧ ૬ ૨ ૦૭૧૧c સિન્ધોરુઽચ્છ્વાસે પતયન્તમુક્ષણઁ હિરણ્યપાવાઃ પશુમપ્સુ ગૃભ્ણતે ॥ ૫૬૪
૧ ૬ ૨ ૦૭૧૨a પવિત્રં તે વિતતં બ્રહ્મણસ્પતે પ્રભુર્ગાત્રાણિ પર્યેષિ વિશ્વતઃ ।
૧ ૬ ૨ ૦૭૧૨c અતપ્તતનૂર્ન તદામો અશ્નુતે શ્‌ૃતાસ ઇદ્વહન્તઃ સં તદાશત ॥ ૫૬૫

૧ ૬ ૨ ૦૮૦૧a ઇન્દ્રમચ્છ સુતા ઇમે વૃષણં યન્તુ હરયઃ ।
૧ ૬ ૨ ૦૮૦૧c શ્રુષ્ટે જાતાસ ઇન્દવઃ સ્વર્વિદઃ ॥ ૫૬૬
૧ ૬ ૨ ૦૮૦૨a પ્ર ધન્વા સોમ જાગૃવિરિન્દ્રાયેન્દો પરિ સ્રવ ।
૧ ૬ ૨ ૦૮૦૨c દ્યુમન્તઁ શુષ્મમા ભર સ્વર્વિદમ્ ॥ ૫૬૭
૧ ૬ ૨ ૦૮૦૩a સખાય આ નિ ષીદત પુનાનાય પ્ર ગાયત ।
૧ ૬ ૨ ૦૮૦૩c શિશું ન યજ્ઞૈઃ પરિ ભૂષત શ્રિયે ॥ ૫૬૮
૧ ૬ ૨ ૦૮૦૪a તં વઃ સખાયો મદાય પુનાનમભિ ગાયત ।
૧ ૬ ૨ ૦૮૦૪c શિશું ન હવ્યૈઃ સ્વદયન્ત ગૂર્તિભિઃ ॥ ૫૬૯
૧ ૬ ૨ ૦૮૦૫a પ્રાણા શિશુર્મહીનાઁ હિન્વન્નૃતસ્ય દીધિતિમ્ ।
૧ ૬ ૨ ૦૮૦૫c વિશ્વા પરિ પ્રિયા ભુવદધ દ્વિતા ॥ ૫૭૦
૧ ૬ ૨ ૦૮૦૬a પવસ્વ દેવવીતય ઇન્દો ધારાભિરોજસા ।
૧ ૬ ૨ ૦૮૦૬c આ કલશં મધુમાન્ત્સોમ નઃ સદઃ ॥ ૫૭૧
૧ ૬ ૨ ૦૮૦૭a સોમઃ પુનાન ઊર્મિણાવ્યં વારં વિ ધાવતિ ।

૧ ૬ ૨ ૦૮૦૭c  અગ્રે વાચઃ પવમાનઃ કનિક્રદત્ ॥ ૫૭૨
૧ ૬ ૨ ૦૮૦૮a  પ્ર પુનાનાય વેધસે સોમાય વચ ઉચ્યતે ।
૧ ૬ ૨ ૦૮૦૮c  ભૃતિં ન ભરા મતિભિર્જુજોષતે ॥ ૫૭૩
૧ ૬ ૨ ૦૮૦૯a  ગોમન્ન ઇન્દો અશ્વવત્સુતઃ સુદક્ષ ધનિવ ।
૧ ૬ ૨ ૦૮૦૯c  શુચિં ચ વર્ણમધિ ગોષુ ધાર્ય ॥ ૫૭૪
૧ ૬ ૨ ૦૮૧૦a  અસ્મભ્યં ત્વા વસુવિદમભિ વાણીરનૂષત ।
૧ ૬ ૨ ૦૮૧૦c  ગોભિષ્ટે વર્ણમભિ વાસયામસિ ॥ ૫૭૫
૧ ૬ ૨ ૦૮૧૧a  પવતે હર્યતો હરિરતિ હ્વરાँસિ રँહ્યા ।
૧ ૬ ૨ ૦૮૧૧c  અભ્યર્ષ સ્તોતૃભ્યો વીરવદ્યશઃ ॥ ૫૭૬
૧ ૬ ૨ ૦૮૧૨a  પરિ કોશં મધુશ્ચુતँ સોમઃ પુનાનો અર્ષતિ ।
૧ ૬ ૨ ૦૮૧૨c  અભિ વાણીરૃષીણાँ સપ્તા નૂષત ॥ ૫૭૭

૧ ૬ ૨ ૦૯૦૧a  પવસ્વ મધુમત્તમ ઇન્દ્રાય સોમ ક્રતુવિત્તમો મદઃ ।
૧ ૬ ૨ ૦૯૦૧c  મહિ દ્યુક્ષતમો મદઃ ॥ ૫૭૮
૧ ૬ ૨ ૦૯૦૨a  અભિ દ્યુમ્નં બૃહદ્યશ ઇષસ્પતે દિદીહિ દેવ દેવયુમ્ ।
૧ ૬ ૨ ૦૯૦૨c  વિ કોશં મધ્યમં યુવ ॥ ૫૭૯
૧ ૬ ૨ ૦૯૦૩a  આ સોતા પરિ ષિઞ્ચતાશ્વં ન સ્તોમમપ્તુરँ રજસ્તુરમ્ ।
૧ ૬ ૨ ૦૯૦૩c  વનપ્રક્ષમુદપ્રુતમ્ ॥ ૫૮૦
૧ ૬ ૨ ૦૯૦૪a  એતમુ ત્યં મદચ્યુતँ સહસ્રધારં વૃષભં દિવોદુહમ્ ।
૧ ૬ ૨ ૦૯૦૪c  વિશ્વા વસૂનિ બિભ્રતમ્ ॥ ૫૮૧
૧ ૬ ૨ ૦૯૦૫a  સ સુન્વે યો વસૂનાં યો રાયામાનેતા ય ઇડાનામ્ ।
૧ ૬ ૨ ૦૯૦૫c  સોમો યઃ સુક્ષિતીનામ્ ॥ ૫૮૨
૧ ૬ ૨ ૦૯૦૬a  ત્વँ હ્યાઽઙ્ગ દૈવ્યા પવમાન જનિમાનિ દ્યુમત્તમઃ ।
૧ ૬ ૨ ૦૯૦૬c  અમૃતત્વાય ઘોષયન્ ॥ ૫૮૩
૧ ૬ ૨ ૦૯૦૭a  એષ સ્ય ધારયા સુતોઽવ્યો વારેભિઃ પવતે મદિન્તમઃ ।
૧ ૬ ૨ ૦૯૦૭c  ક્રીડન્નૂર્મિરપામિવ ॥ ૫૮૪
૧ ૬ ૨ ૦૯૦૮a  ય ઉસ્રિયા અપિ યા અન્તરશ્મનિ નિર્ગા અકૃન્તદોજસા ।
૧ ૬ ૨ ૦૯૦૮c  અભિ વ્રજં તત્નિષે ગવ્યમશ્વ્યં વર્મીવ ધૃષ્ણવા રુજ ।
૧ ૬ ૨ ૦૯૦૮e  ૐ વર્મીવ ધૃષ્ણવા રુજ ॥ ૫૮૫

॥ ઇતિ સૌમ્યં પાવમાનં પર્વ કાણ્ડમ્ ॥

॥ ઇતિ પૂર્વાર્ચિકઃ ॥

આરણ્ય આર્ચિકઃ

આરણ્ય કાણ્ડમ્

૨ ૦ ૦ ૦૧૦૧a ઇન્દ્ર જ્યેષ્ઠં ન આ ભર ઓજિષ્ઠં પુપુરિ શ્રવઃ ।

૨ ૦ ૦ ૦૧૦૧c યદ્દિધૃક્ષેમ વજ્રહસ્ત રોદસી ઓભે સુશિપ્ર પપ્રાઃ ॥ ૫૮૬

૨ ૦ ૦ ૦૧૦૨a ઇન્દ્રો રાજા જગતશ્ચર્ષણીનામધિક્ષમા વિશ્વરૂપં યદસ્ય ।

૨ ૦ ૦ ૦૧૦૨c તતો દદાતિ દાશુષે વસૂનિ ચોદદ્રાધ ઉપસ્તુતં ચિદર્વાક્ ॥ ૫૮૭

૨ ૦ ૦ ૦૧૦૩a યસ્યેદમા રજોયુજસ્તુજે જને વનઁ સ્વઃ ।

૨ ૦ ૦ ૦૧૦૩c ઇન્દ્રસ્ય રન્ત્યં બૃહત્ ॥ ૫૮૮

૨ ૦ ૦ ૦૧૦૪a ઉદુત્તમં વરુણ પાશમસ્મદવાધમં વિ મધ્યમઁ શ્રથાય ।

૨ ૦ ૦ ૦૧૦૪c અથાદિત્ય વ્રતે વયં તવાનાગસો અદિતયે સ્યામ ॥ ૫૮૯

૨ ૦ ૦ ૦૧૦૫a ત્વયા વયં પવમાનેન સોમ ભરે કૃતં વિ ચિનુયામ શશ્વત્ ।

૨ ૦ ૦ ૦૧૦૫c તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૫૯૦

૨ ૦ ૦ ૦૧૦૬a ઇમં વૃષણં કૃણુતૈકમિન્મામ્ ॥ ૫૯૧

૨ ૦ ૦ ૦૧૦૭a સ ન ઇન્દ્રાય યજ્યવે વરુણાય મરુદ્ભ્યઃ ।

૨ ૦ ૦ ૦૧૦૭c વરિવોવિત્પરિસ્રવ ॥ ૫૯૨

૨ ૦ ૦ ૦૧૦૮a એના વિશ્વાન્યર્ય આ દ્યુમ્નાનિ માનુષાણામ્ ।

૨ ૦ ૦ ૦૧૦૮c સિષાસન્તો વનામહે ॥ ૫૯૩

૨ ૦ ૦ ૦૧૦૯a અહમસ્મિ પ્રથમજા ઋતસ્ય પૂર્વં દેવેભ્યો અમૃતસ્ય નામ ।

૨ ૦ ૦ ૦૧૦૯c યો મા દદાતિ સ ઇદેવમાવદહમન્નમન્નમદન્તમદ્મિ ॥ ૫૯૪

૨ ૦ ૦ ૦૨૦૧a ત્વમેતદધારયઃ કૃષ્ણાસુ રોહિણીષુ ચ ।

૨ ૦ ૦ ૦૨૦૧c પરુષ્ણીષુ રુશત્પયઃ ॥ ૫૯૫

૨ ૦ ૦ ૦૨૦૨a અરૂરુચદુષસઃ પૃશ્નિરગ્રિય ઉક્ષા મિમેતિ ભુવનેષુ વાજયુઃ ।

૨ ૦ ૦ ૦૨૦૨c માયાવિનો મમિરે અસ્ય માયયા નૃચક્ષસઃ પિતરો ગર્ભમાદધુઃ ॥ ૫૯૬

૨ ૦ ૦ ૦૨૦૩a ઇન્દ્ર ઇદ્ધર્યોઃ સચા સમ્મિશ્લ આ વચોયુજા ।

૨ ૦ ૦ ૦૨૦૩c ઇન્દ્રો વજ્રી હિરણ્યયઃ ॥ ૫૯૭

૨ ૦ ૦ ૦૨૦૪a ઇન્દ્ર વાજેષુ નોઽવ સહસ્રપ્રધનેષુ ચ ।

૨ ૦ ૦ ૦૨૦૪c ઉગ્ર ઉગ્રાભિરૂતિભિઃ ॥ ૫૯૮

૨ ૦ ૦ ૦૨૦૫a પ્રથશ્ચ યસ્ય સપ્રથશ્ચ નામાનુષ્ટુભસ્ય હવિષો હવિર્યત્ ।

૨ ૦ ૦ ૦૨૦૫c ધાતુર્દ્યુતાનાત્સવિતુશ્ચ વિષ્ણો રથન્તરમા જભારા વસિષ્ઠઃ ॥ ૫૯૯

૨ ૦ ૦ ૦૨૦૬a નિયુત્વાન્વાયવા ગહ્યયઁ શુક્રો અયામિ તે ।

૨ ૦ ૦ ૦૨૦૬c ગન્તાસિ સુન્વતો ગૃહમ્ ॥ ૬૦૦

૨ ૦ ૦ ૦૨૦૭a  યજ્જાયથા અપૂર્વ્ય મઘવન્વૃત્રહત્યાય ।
૨ ૦ ૦ ૦૨૦૭c  તત્પૃથિવીમપ્રથયસ્તદસ્તભ્ના ઉતો દિવમ્ ॥  ૬૦૧

૨ ૦ ૦ ૦૩૦૧a  મયિ વર્ચો અથો યશોઽથો યજ્ઞસ્ય યત્પયઃ ।
૨ ૦ ૦ ૦૩૦૧c  પરમેષ્ઠી પ્રજાપતિર્દિવિ દ્યામિવ દૃંહતુ ॥  ૬૦૨
૨ ૦ ૦ ૦૩૦૨a  સં તે પયાँસિ સમુ યન્તુ વાજાઃ સં વૃષ્ણ્યાન્યભિમાતિષાહઃ ।
૨ ૦ ૦ ૦૩૦૨c  આપ્યાયમાનો અમૃતાય સોમ દિવિ શ્રવાँસ્યુત્તમાનિ ધિષ્વ ॥  ૬૦૩
૨ ૦ ૦ ૦૩૦૩a  ત્વમિમા ઓષધીઃ સોમ વિશ્વાસ્ત્વમપો અજનયસ્ત્વં ગાઃ ।
૨ ૦ ૦ ૦૩૦૩c  ત્વમાતનોરુર્વાઉન્તરિક્ષં ત્વં જ્યોતિષા વિ તમો વવર્થ ॥  ૬૦૪
૨ ૦ ૦ ૦૩૦૪a  અગ્નિમીડે પુરોહિતં યજ્ઞસ્ય દેવમૃત્વિજમ્ ।
૨ ૦ ૦ ૦૩૦૪c  હોતારં રત્નધાતમમ્ ॥  ૬૦૫
૨ ૦ ૦ ૦૩૦૫a  તે મન્વત પ્રથમં નામ ગોનાં ત્રિઃ સપ્ત પરમં નામ જનાન્ ।
૨ ૦ ૦ ૦૩૦૫c  તા જાનતીરભ્યનૂષત ક્ષા આવિર્ભુવન્નરુણીર્યશસા ગાવઃ ॥  ૬૦૬
૨ ૦ ૦ ૦૩૦૬a  સમન્યા યન્ત્યુપયન્ત્યન્યાઃ સમાનમૂર્વં નદ્યસ્પૃણન્તિ ।
૨ ૦ ૦ ૦૩૦૬c  તમૂ શુચિँ શુચયો દીદિવાँસમપાન્નપાતમુપ યન્ત્યાપઃ ॥  ૬૦૭
૨ ૦ ૦ ૦૩૦૭a  આ પ્રાગાદ્ભદ્રા યુવતિરહ્નઃ કેતૂન્ત્સમીર્ત્સતિ ।
૨ ૦ ૦ ૦૩૦૭c  અભૂદ્ભદ્રા નિવેશની વિશ્વસ્ય જગતો રાત્રી ॥  ૬૦૮
૨ ૦ ૦ ૦૩૦૮a  પ્રક્ષસ્ય વૃષ્ણો અરુષસ્ય નૂ મહઃ પ્ર નો વચો વિદથા જાતવેદસે ।
૨ ૦ ૦ ૦૩૦૮c  વૈશ્વાનરાય મતિર્નવ્યસે શુચિઃ સોમ ઇવ પવતે ચારુરગ્નયે ॥  ૬૦૯
૨ ૦ ૦ ૦૩૦૯a  વિશ્વે દેવા મમ શૃણ્વન્તુ યજ્ઞમુભે રોદસી અપાં નપાચ્ચ મન્મ ।
૨ ૦ ૦ ૦૩૦૯c  મા વો વચાँસિ પરિચક્ષ્યાણિ વોચँ સુમ્નેષ્વિદ્વો અન્તમા મદેમ ॥  ૬૧૦
૨ ૦ ૦ ૦૩૧૦a  યશો મા દ્યાવાપૃથિવી યશો મેન્દ્રબૃહસ્પતી ।
૨ ૦ ૦ ૦૩૧૦c  યશો ભગસ્ય વિન્દતુ યશો મા પ્રતિમુચ્યતામ્ ।
૨ ૦ ૦ ૦૩૧૦e  યશસ્વ્યાઉસ્યાઃ સँ સદોઽહં પ્રવદિતા સ્યામ્ ॥  ૬૧૧
૨ ૦ ૦ ૦૩૧૧a  ઇન્દ્રસ્ય નુ વીર્યાણિ પ્રવોચં યાનિ ચકાર પ્રથમાનિ વજ્રી ।
૨ ૦ ૦ ૦૩૧૧c  અહન્નહિમન્વપસ્તતર્દ પ્ર વક્ષણા અભિનત્પર્વતાનામ્ ॥  ૬૧૨
૨ ૦ ૦ ૦૩૧૨a  અગ્નિરસ્મિ જન્મના જાતવેદા ઘૃતં મે ચક્ષુરમૃતં મ આસન્ ।
૨ ૦ ૦ ૦૩૧૨c  ત્રિધાતુરર્કો રજસો વિમાનોઽજસ્રં જ્યોતિર્હવિરસ્મિ સર્વમ્ ॥  ૬૧૩
૨ ૦ ૦ ૦૩૧૩a  પાત્યગ્નિર્વિપો અગ્રં પદં વેઃ પાતિ યહ્વશ્ચરણँ સૂર્યસ્ય ।
૨ ૦ ૦ ૦૩૧૩c  પાતિ નાભા સપ્તશીર્ષાણમગ્નિઃ ॥  ૬૧૪

૨ ૦ ૦ ૦૪૦૧a  ભ્રાજન્ત્યગ્ને સમિધાન દીદિવો જિહ્વા ચરત્યન્તરાસનિ ।
૨ ૦ ૦ ૦૪૦૧c  સ ત્વં નો અગ્ને પયસા વસુવિદ્રયિં વર્ચો દૃશેઽદાઃ ॥  ૬૧૫

૨ ૦ ૦ ૦૪૦૨a વસન્ત ઇન્નુ રન્ત્યો ગ્રીષ્મ ઇન્નુ રન્ત્યઃ ।
૨ ૦ ૦ ૦૪૦૨c વર્ષાણ્યનુ શરદો હેમન્તઃ શિશિર ઇન્નુ રન્ત્યઃ ॥ ૬૧૬
૨ ૦ ૦ ૦૪૦૩a સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
૨ ૦ ૦ ૦૪૦૩c સ ભૂમિँ સર્વતો વૃત્વાત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૬૧૭
૨ ૦ ૦ ૦૪૦૪a ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પદોઽસ્યેહાભવત્પુનઃ ।
૨ ૦ ૦ ૦૪૦૪c તથા વિષ્વઙ્ વ્યક્રામદશનાનશને અભિ ॥ ૬૧૮
૨ ૦ ૦ ૦૪૦૫a પુરુષ એવેદँ સર્વં યદ્ભૂતં યચ્ચ ભાવ્યમ્ ।
૨ ૦ ૦ ૦૪૦૫c પાદોઽસ્ય સર્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥ ૬૧૯
૨ ૦ ૦ ૦૪૦૬a તાવાનસ્ય મહિમા તતો જ્યાયાँશ્ચ પૂરુષઃ ।
૨ ૦ ૦ ૦૪૦૬c ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ ૬૨૦
૨ ૦ ૦ ૦૪૦૭a તતો વિરાડજાયત વિરાજો અધિ પૂરુષઃ ।
૨ ૦ ૦ ૦૪૦૭c સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિમથો પુરઃ ॥ ૬૨૧
૨ ૦ ૦ ૦૪૦૮a મન્યે વાँ દ્યાવાપૃથિવી સુભોજસૌ યે અપ્રથેથામમિતમભિ યોજનમ્ ।
૨ ૦ ૦ ૦૪૦૮c દ્યાવાપૃથિવી ભવતँ સ્યોને તે નો મુઞ્ચતમँહસઃ ॥ ૬૨૨
૨ ૦ ૦ ૦૪૦૯a હરી ત ઇન્દ્ર શ્મશ્રૂણ્યુતો તે હરિતૌ હરિ ।
૨ ૦ ૦ ૦૪૦૯c તં ત્વા સ્તુવન્તિ કવયઃ પુરુષાસો વનર્ગવઃ ॥ ૬૨૩
૨ ૦ ૦ ૦૪૧૦a યદ્વર્ચો હિરણ્યસ્ય યદ્વા વર્ચો ગવામુત ।
૨ ૦ ૦ ૦૪૧૦c સત્યસ્ય બ્રહ્મણો વર્ચસ્તેન મા સँ સૃજામસિ ॥ ૬૨૪
૨ ૦ ૦ ૦૪૧૧a સહસ્તન્ન ઇન્દ્ર દદ્ધ્યોજ ઈશે હ્યસ્ય મહતો વિરપ્શિન્ ।
૨ ૦ ૦ ૦૪૧૧c ક્રતું ન નૃમ્ણँ સ્થવિરં ચ વાજં વૃત્રેષુ શત્રૂન્ત્સુહના કૃધી નઃ ॥ ૬૨૫
૨ ૦ ૦ ૦૪૧૨a સહર્ષભાઃ સહવત્સા ઉદેત વિશ્વા રૂપાણી બિભ્રતીર્દ્વ્યૂધ્નીઃ ।
૨ ૦ ૦ ૦૪૧૨c ઉરુઃ પૃથુરયં વો અસ્તુ લોક ઇમા આપઃ સુપ્રપાણા ઇહ સ્ત ॥ ૬૨૬

૨ ૦ ૦ ૦૫૦૧a અગ્ન આયूँષિ પવસ આસુવોર્જમિષં ચ નઃ ।
૨ ૦ ૦ ૦૫૦૧c આરે બાધસ્વ દુચ્છુનામ્ ॥ ૬૨૭
૨ ૦ ૦ ૦૫૦૨a વિભ્રાડ્બૃહત્પિબતુ સોમ્યં મધ્વાયુર્દધદ્યજ્ઞપતાવવિહ્રુતમ્ ।
૨ ૦ ૦ ૦૫૦૨c વાતજૂતો યો અભિરક્ષતિ ત્મના પ્રજાઃ પિપર્તિ બહુધા વિ રાજતિ ॥ ૬૨૮
૨ ૦ ૦ ૦૫૦૩a ચિત્રં દેવાનામુદગાદનીકં ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ ।
૨ ૦ ૦ ૦૫૦૩c આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષँ સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ ॥ ૬૨૯
૨ ૦ ૦ ૦૫૦૪a આયં ગૌઃ પૃશ્નિરક્રમીદસદન્માતરં પુરઃ ।
૨ ૦ ૦ ૦૫૦૪c પિતરં ચ પ્રયન્ત્સ્વઃ ॥ ૬૩૦
૨ ૦ ૦ ૦૫૦૫a અન્તશ્ચરતિ રોચનાસ્ય પ્રાણાદપાનતી ।

૨ ૦ ૦ ૦૫૦૫c વ્યખ્યન્મહિષો દિવમ્ ॥ ૬૩૧
૨ ૦ ૦ ૦૫૦૬a ત્રિઁષદ્ધામ વિ રાજતિ વાક્પતઙ્ગાય ધીયતે ।
૨ ૦ ૦ ૦૫૦૬c પ્રતિ વસ્તોરહ દ્યુભિઃ ॥ ૬૩૨
૨ ૦ ૦ ૦૫૦૭a અપ ત્યે તાયવો યથા નક્ષત્રા યન્ત્યક્તુભિઃ ।
૨ ૦ ૦ ૦૫૦૭c સૂરાય વિશ્વચક્ષસે ॥ ૬૩૩
૨ ૦ ૦ ૦૫૦૮a અદૃશ્રન્નસ્ય કેતવો વિ રશ્મયો જનાઁ અનુ ।
૨ ૦ ૦ ૦૫૦૮c ભ્રાજન્તો અગ્નયો યથા ॥ ૬૩૪
૨ ૦ ૦ ૦૫૦૯a તરણિર્વિશ્વદર્શતો જ્યોતિષ્કૃદસિ સૂર્ય ।
૨ ૦ ૦ ૦૫૦૯c વિશ્વમાભાસિ રોચનમ્ ॥ ૬૩૫
૨ ૦ ૦ ૦૫૧૦a પ્રત્યઙ્ દેવાનાં વિશઃ પ્રત્યઙ્ઙુદેષિ માનુષાન્ ।
૨ ૦ ૦ ૦૫૧૦c પ્રત્યઙ્ વિશ્વઁ સ્વર્દૃશે ॥ ૬૩૬
૨ ૦ ૦ ૦૫૧૧a યેના પાવક ચક્ષસા ભુરણ્યન્તં જનાઁ અનુ ।
૨ ૦ ૦ ૦૫૧૧c ત્વં વરુણ પશ્યસિ ॥ ૬૩૭
૨ ૦ ૦ ૦૫૧૨a ઉદ્દ્યામેષિ રજઃ પૃથ્વહા મિમાનો અક્તુભિઃ ।
૨ ૦ ૦ ૦૫૧૨c પશ્યઞ્જન્માનિ સૂર્ય ॥ ૬૩૮
૨ ૦ ૦ ૦૫૧૩a અયુક્ત સપ્ત શુન્ધ્યુવઃ સૂરો રથસ્ય નપ્ત્ર્યઃ ।
૨ ૦ ૦ ૦૫૧૩c તાભિર્યાતિ સ્વયુક્તિભિઃ ॥ ૬૩૯
૨ ૦ ૦ ૦૫૧૪a સપ્ત ત્વા હરિતો રથે વહન્તિ દેવ સૂર્ય ।
૨ ૦ ૦ ૦૫૧૪c શોચિષ્કેશં વિચક્ષણ ॥ ૬૪૦
॥ ઇત્યારણ્યં પર્વ કાણ્ડમ્ ॥

મહાનામ્ન્ય આર્ચિકઃ

૩ ૦ ૦ ૦૦૦૧a વિદા મઘવન્ વિદા ગાતુમનુશઁસિષો દિશઃ ।
૩ ૦ ૦ ૦૦૦૧c શિક્ષા શચીનાં પતે પૂર્વીણાં પુરૂવસો ॥ ૬૪૧
૩ ૦ ૦ ૦૦૦૨a આભિષ્ટ્વમભિષ્ટિભિઃ સ્વાઽઽન્નાંશુઃ ।
૩ ૦ ૦ ૦૦૦૨c પ્રચેતન પ્રચેતયેન્દ્ર દ્યુમ્નાય ન ઇષે ॥ ૬૪૨
૩ ૦ ૦ ૦૦૦૩a એવા હિ શક્રો રાયે વાજાય વજ્રિવઃ ।
૩ ૦ ૦ ૦૦૦૩c શવિષ્ઠ વજ્રિન્નૃઞ્જસે મઁહિષ્ઠ વજ્રિન્નૃઞ્જસ ।
૩ ૦ ૦ ૦૦૦૩e આ યાહિ પિબ મત્સ્વ ॥ ૬૪૩
૩ ૦ ૦ ૦૦૦૪a વિદા રાયે સુવીર્યં ભવો વાજાનાં પતિર્વશાઁ અનુ ।
૩ ૦ ૦ ૦૦૦૪c મઁહિષ્ઠ વજ્રિન્નૃઞ્જસે યઃ શવિષ્ઠઃ શૂરાણામ્ ॥ ૬૪૪
૩ ૦ ૦ ૦૦૦૫a યો મઁહિષ્ઠો મઘોનામઁશુર્ન્ન શોચિઃ ।

૩ ૦ ૦ ૦૦૦૫c ચિકિત્વો અભિ નો નયેન્દ્રો વિદે તમુ સ્તુહિ ॥ ૬૪૫
૩ ૦ ૦ ૦૦૦૬a ઈશે હિ શક્રસ્તમૂતયે હવામહે જેતારમપરાજિતમ્ ।
૩ ૦ ૦ ૦૦૦૬c સ નઃ સ્વર્ષદતિ દ્વિષઃ ક્રતુશ્છન્દ ઋતં બૃહત્ ॥ ૬૪૬
૩ ૦ ૦ ૦૦૦૭a ઇન્દ્રં ધનસ્ય સાતયે હવામહે જેતારમપરાજિતમ્ ।
૩ ૦ ૦ ૦૦૦૭c સ નઃ સ્વર્ષદતિ દ્વિષઃ સ નઃ સ્વર્ષદતિ દ્વિષઃ ॥ ૬૪૭
૩ ૦ ૦ ૦૦૦૮a પૂર્વસ્ય યત્તે અદ્રિવોઁઽશુર્મદાય ।
૩ ૦ ૦ ૦૦૦૮c સુમ્ન આ ધેહિ નો વસો પૂર્તિઃ શવિષ્ઠ શસ્યતે ।
૩ ૦ ૦ ૦૦૦૮e વશી હિ શક્રો નૂનં તન્નવ્યઁ સંન્યસે ॥ ૬૪૮
૩ ૦ ૦ ૦૦૦૯a પ્રભો જનસ્ય વૃત્રહન્ત્સમર્યેષુ બ્રવાવહૈ ।
૩ ૦ ૦ ૦૦૦૯c શૂરો યો ગોષુ ગચ્છતિ સખા સુશેવો અદ્વયુઃ ॥ ૬૪૯

અથ પઞ્ચ પુરીષપદાનિ

૩ ૦ ૦ ૦૦૧૦a એવાહ્યોઽ૩ઽ૩ઽ૩ઽ૩વા । એવા હ્યગ્ને । એવાહીન્દ્ર ।
૩ ૦ ૦ ૦૦૧૦c એવા હિ પૂષન્ । એવા હિ દેવાઃ ૐ એવાહિ દેવાઃ ॥ ૬૫૦

॥ ઇતિ પઞ્ચ પુરીષપદાનિ ॥

॥ ઇતિ મહાનામ્ન્યાર્ચિકઃ ॥

ઉત્તર આર્ચિકઃ

પ્રથમ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

અસિતઃ કાશ્યપો દેવલો વા। ગાયત્રી। પવમાનઃ સોમઃ।

૪ ૧ ૧ ૦૧ ૦૧a ઉપાસ્મૈ ગાયતા નરઃ પવમાનાયેન્દવે ।
૪ ૧ ૧ ૦૧ ૦૧c અભિ દેવાઁ ઇયક્ષતે ॥ ૬૫૧
૪ ૧ ૧ ૦૧ ૦૨a અભિ તે મધુના પયોઽથર્વાણો અશિશ્રયુઃ ।
૪ ૧ ૧ ૦૧ ૦૨c દેવં દેવાય દેવયુ ॥ ૬૫૨
૪ ૧ ૧ ૦૧ ૦૩a સ નઃ પવસ્વ શં ગવે શં જનાય શમર્વતે ।
૪ ૧ ૧ ૦૧ ૦૩c શઁ રાજન્નોષધીભ્યઃ ॥ ૬૫૩

કશ્યપો મારીચઃ। ગાયત્રી। પવમાનઃ સોમઃ।

૪ ૧ ૧ ૦૨ ૦૧a દવિદ્યુતત્યા રુચા પરિષ્ટોભન્ત્યા કૃપા ।
૪ ૧ ૧ ૦૨ ૦૧c સોમાઃ શુક્રા ગવાશિરઃ ॥ ૬૫૪
૪ ૧ ૧ ૦૨ ૦૨a હિન્વાનો હેતૃભિર્હિત આ વાજં વાજ્યક્રમીત્ ।
૪ ૧ ૧ ૦૨ ૦૨c સીદન્તો વનુષો યથા ॥ ૬૫૫
૪ ૧ ૧ ૦૨ ૦૩a ઋધક્સોમ સ્વસ્તયે સઞ્જગ્માનો દિવા કવે ।
૪ ૧ ૧ ૦૨ ૦૩c પવસ્વ સૂર્યો દૃશે ॥ ૬૫૬

શતં વૈખાનસાઃ, ગાયત્રી, પવમાનઃ સોમઃ।
૪ ૧ ૧ ૦૩ ૦૧a પવમાનસ્ય તે કવે વાજિન્ત્સર્ગા અસૃક્ષતે ।
૪ ૧ ૧ ૦૩ ૦૧c અર્વન્તો ન શ્રવસ્યવઃ ॥ ૬૫૭
૪ ૧ ૧ ૦૩ ૦૨a અચ્છા કોશં મધુશ્ચુતમસૃગ્રં વારે અવ્યયે ।
૪ ૧ ૧ ૦૩ ૦૨c અવાવશન્ત ધીતયઃ ॥ ૬૫૮
૪ ૧ ૧ ૦૩ ૦૩a અચ્છા સમુદ્રમિન્દવોઽસ્તં ગાવો ન ધેનવઃ ।
૪ ૧ ૧ ૦૩ ૦૩c અગ્મન્નૃતસ્ય યોનિમા ॥ ૬૫૯

ભરદ્વાજો બાર્હસ્પત્યઃ, ગાયત્રી, અગ્નિઃ।
૪ ૧ ૧ ૦૪ ૦૧a અગ્ન આ યાહિ વીતયે ગૃણાનો હવ્યદાતયે ।
૪ ૧ ૧ ૦૪ ૦૧c નિ હોતા સત્સિ બર્હિષિ ॥ ૬૬૦
૪ ૧ ૧ ૦૪ ૦૨a તં ત્વા સમિદ્ભિરઙ્ગિરો ઘૃતેન વર્ધયામસિ ।
૪ ૧ ૧ ૦૪ ૦૨c બૃહચ્છોચા યવિષ્ઠ્ય ॥ ૬૬૧
૪ ૧ ૧ ૦૪ ૦૩a સ નઃ પૃથુ શ્રવાય્યમચ્છા દેવ વિવાસસિ ।
૪ ૧ ૧ ૦૪ ૦૩c બૃહદગ્ને સુવીર્યમ્ ॥ ૬૬૨

વિશ્વામિત્રો ગાથિનઃ જમદગ્નિર્વા, ગાયત્રી, મિત્રાવરુણૌ।
૪ ૧ ૧ ૦૫ ૦૧a આ નો મિત્રાવરુણા ઘૃતૈર્ગવ્યૂતિમુક્ષતમ્ ।
૪ ૧ ૧ ૦૫ ૦૧c મધ્વા રજાँસિ સુક્રતૂ ॥ ૬૬૩
૪ ૧ ૧ ૦૫ ૦૨a ઉરુશँસા નમોવૃધા મહ્ના દક્ષસ્ય રાજથઃ ।
૪ ૧ ૧ ૦૫ ૦૨c દ્રાઘિષ્ઠાભિઃ શુચિવ્રતા ॥ ૬૬૪
૪ ૧ ૧ ૦૫ ૦૩a ગૃણાના જમદગ્નિના યોનાવૃતસ્ય સીદતમ્ ।
૪ ૧ ૧ ૦૫ ૦૩c પાતँ સોમમૃતાવૃધા ॥ ૬૬૫

ઇરીમ્બિઠિઃ કાણ્વઃ। ગાયત્રી। ઇન્દ્રઃ।
૪ ૧ ૧ ૦૬ ૦૩a આ યાહિ સુષુમા હિ ત ઇન્દ્ર સોમં પિબા ઇમમ્ ।
૪ ૧ ૧ ૦૬ ૦૩c એદં બર્હિઃ સદો મમ ॥ ૬૬૬
૪ ૧ ૧ ૦૬ ૦૩a આ ત્વા બ્રહ્મયુજા હરી વહતામિન્દ્ર કેશિના ।
૪ ૧ ૧ ૦૬ ૦૩c ઉપ બ્રહ્માણિ નઃ શ◌ૃણુ ॥ ૬૬૭
૪ ૧ ૧ ૦૬ ૦૩a બ્રહ્માણસ્ત્વા યુજા વયँ સોમપામિન્દ્ર સોમિનઃ ।
૪ ૧ ૧ ૦૬ ૦૩c સુતાવન્તો હવામહે ॥ ૬૬૮

વિશ્વામિત્રો ગાથિનઃ। ગાયત્રી। ઇન્દ્રાગ્ની।

૪ ૧ ૧ ૦૭ ૦૧a  ઇન્દ્રાગ્ની આ ગતઁ સુતં ગીર્ભિર્નભો વરેણ્યમ્ ।
૪ ૧ ૧ ૦૭ ૦૧c  અસ્ય પાતં ધિયેષિતા ॥ ૬૬૯
૪ ૧ ૧ ૦૭ ૦૨a  ઇન્દ્રાગ્ની જરિતુઃ સચા યજ્ઞો જિગાતિ ચેતનઃ ।
૪ ૧ ૧ ૦૭ ૦૨c  અયા પાતમિમઁ સુતમ્ ॥ ૬૭૦
૪ ૧ ૧ ૦૭ ૦3a  ઇન્દ્રમગ્નિં કવિચ્છદા યજ્ઞસ્ય જૂત્યા વૃણે ।
૪ ૧ ૧ ૦૭ ૦3c  તા સોમસ્યેહ તૃમ્પતામ્ ॥ ૬૭૧

અમહીયુરાઙ્ગિરસઃ। ગાયત્રી। પવમાનઃ સોમઃ।
૪ ૧ ૧ ૦૮ ૦૧a  ઉચ્ચા તે જાતમન્ધસો દિવિ સદ્ભૂમ્યા દદે ।
૪ ૧ ૧ ૦૮ ૦૧c  ઉગ્રઁ શર્મ મહિ શ્રવઃ ॥ ૬૭૨
૪ ૧ ૧ ૦૮ ૦૨a  સ ન ઇન્દ્રાય યજ્યવે વરુણાય મરુદ્ભ્યઃ ।
૪ ૧ ૧ ૦૮ ૦૨c  વરિવોવિત્પરિ સ્રવ ॥ ૬૭૩
૪ ૧ ૧ ૦૮ ૦3a  એના વિશ્વાન્યર્ય આ દ્યુમ્નાનિ માનુષાણામ્ ।
૪ ૧ ૧ ૦૮ ૦3c  સિષાસન્તો વનામહે ॥ ૬૭૪

૪ ૧ ૧ ૦૯ ૦૧a  પુનાનઃ સોમ ધારયાપો વસાનો અર્ષસિ ।
૪ ૧ ૧ ૦૯ ૦૧c  આ રત્નધા યોનિમૃતસ્ય સીદસ્યુત્સો દેવો હિરણ્યયઃ ॥ ૬૭૫
૪ ૧ ૧ ૦૯ ૦૨a  દુહાન ઊધર્દિવ્યં મધુ પ્રિયં પ્રત્નઁ સધસ્થમાસદત્ ।
૪ ૧ ૧ ૦૯ ૦૨c  આપૃચ્છ્યં ધરુણં વાજ્યર્ષસિ નૃભિર્ધૌતો વિચક્ષણઃ ॥ ૬૭૬

૪ ૧ ૧ ૧૦ ૦૧a  પ્ર તુ દ્રવ પરિ કોશં નિ ષીદ નૃભિઃ પુનાનો અભિ વાજમર્ષ ।
૪ ૧ ૧ ૧૦ ૦૧c  અશ્વં ન ત્વા વાજિનં મર્જયન્તોઽચ્છા બર્હી રશનાભિર્નયન્તિ ॥ ૬૭૭
૪ ૧ ૧ ૧૦ ૦૨a  સ્વાયુધઃ પવતે દેવ ઇન્દુરશસ્તિહા વૃજના રક્ષમાણઃ ।
૪ ૧ ૧ ૧૦ ૦૨c  પિતા દેવાનાં જનિતા સુદક્ષો વિષ્ટમ્ભો દિવો ધરુણઃ પૃથિવ્યાઃ ॥ ૬૭૮
૪ ૧ ૧ ૧૦ ૦3a  ઋષિર્વિપ્રઃ પુરએતા જનાનામૃભુર્ધીર ઉશના કાવ્યેન ।
૪ ૧ ૧ ૧૦ ૦3c  સ ચિદ્વિવેદ નિહિતં યદાસામપીચ્યાઉં ગુહ્યં નામ ગોનામ્ ॥ ૬૭૯

૪ ૧ ૧ ૧૧ ૦૧a  અભિ ત્વા શૂર નોનુમોઽદુગ્ધા ઇવ ધેનવઃ ।
૪ ૧ ૧ ૧૧ ૦૧c  ઈશાનમસ્ય જગતઃ સ્વર્દૃશમીશાનમિન્દ્ર તસ્થુષઃ ॥ ૬૮૦
૪ ૧ ૧ ૧૧ ૦૨a  ન ત્વાવાઁ અન્યો દિવ્યો ન પાર્થિવો ન જાતો ન જનિષ્યતે ।
૪ ૧ ૧ ૧૧ ૦૨c  અશ્વાયન્તો મઘવન્નિન્દ્ર વાજિનો ગવ્યન્તસ્ત્વા હવામહે ॥ ૬૮૧

૪ ૧ ૧ ૧૨ ૦૧a  કયા નશ્ચિત્ર આ ભુવદૂતી સદાવૃધઃ સખા ।
૪ ૧ ૧ ૧૨ ૦૧c  કયા શચિષ્ઠયા વૃતા ॥ ૬૮૨
૪ ૧ ૧ ૧૨ ૦૨a  કસ્ત્વા સત્યો મદાનાં મઁહિષ્ઠો મત્સદન્ધસઃ ।

૪ ૧ ૧ ૧૨ ০૨c દૃઢા ચિદારુજે વસુ ॥ ૬૮૩
૪ ૧ ૧ ૧૨ ০૩a અભી ષુ ણઃ સખીનામવિતા જરિતૄણામ્ ।
૪ ૧ ૧ ૧૨ ০૩c શતં ભવાસ્યૂતયે ॥ ૬૮૪

૪ ૧ ૧ ૧૩ ০૧a તં વો દસ્મમૃતીષહં વસોર્મન્દાનમન્ધસઃ ।
૪ ૧ ૧ ૧૩ ০૧c અભિ વત્સં ન સ્વસરેષુ ધેનવ ઇન્દ્રં ગીર્ભિર્નવામહે ॥ ૬૮૫
૪ ૧ ૧ ૧૩ ০૨a દ્યુક્ષઁ સુદાનું તવિષીભિરાવૃતં ગિરિં ન પુરુભોજસમ્ ।
૪ ૧ ૧ ૧૩ ০૨c ક્ષુમન્તં વાજઁ શતિનઁ સહસ્રિણં મક્ષૂ ગોમન્તમીમહે ॥ ૬૮૬

૪ ૧ ૧ ૧૪ ০૧a તરોભિર્વો વિદદ્વસુમિન્દ્રઁ સબાધ ઊતયે ।
૪ ૧ ૧ ૧૪ ০૧c બૃહદ્ગાયન્તઃ સુતસોમે અધ્વરે હુવે ભરં ન કારિણમ્ ॥ ૬૮૭
૪ ૧ ૧ ૧૪ ০૨a ન યં દુધ્રા વરન્તે ન સ્થિરા મુરો મદેષુ શિપ્રમન્ધસઃ ।
૪ ૧ ૧ ૧૪ ০૨c ય આદૃત્યા શશમાનાય સુન્વતે દાતા જરિત્ર ઉક્થ્યમ્ ॥ ૬૮૮

૪ ૧ ૧ ૧૫ ০૧a સ્વાદિષ્ઠયા મદિષ્ઠયા પવસ્વ સોમ ધારયા ।
૪ ૧ ૧ ૧૫ ০૧c ઇન્દ્રાય પાતવે સુતઃ ॥ ૬૮૯
૪ ૧ ૧ ૧૫ ০૨a રક્ષોહા વિશ્વચર્ષણિરભિ યોનિમયોહતે ।
૪ ૧ ૧ ૧૫ ০૨c દ્રોણે સધસ્થમાસદત્ ॥ ૬૯૦
૪ ૧ ૧ ૧૫ ০૩a વરિવોધાતમો ભુવો મઁહિષ્ઠો વૃત્રહન્તમઃ ।
૪ ૧ ૧ ૧૫ ০૩c પર્ષિ રાધો મઘોનામ્ ॥ ૬૯૧

૪ ૧ ૧ ૧૬ ০૧a પવસ્વ મધુમત્તમ ઇન્દ્રાય સોમ ક્રતુવિત્તમો મદઃ ।
૪ ૧ ૧ ૧૬ ০૧c મહિ દ્યુક્ષતમો મદઃ ॥ ૬૯૨
૪ ૧ ૧ ૧૬ ০૨a યસ્ય તે પીત્વા વૃષભો વૃષાયતેઽસ્ય પીત્વા સ્વર્વિદઃ ।
૪ ૧ ૧ ૧૬ ০૨c સ સુપ્રકેતો અભ્યક્રમીદિષોઽચ્છા વાજં નૈતશઃ ॥ ૬૯૩

૪ ૧ ૧ ૧૭ ০૧a ઇન્દ્રમચ્છ સુતા ઇમે વૃષણં યન્તુ હરયઃ ।
૪ ૧ ૧ ૧૭ ০૧c શ્રુષ્ટે જાતાસ ઇન્દવઃ સ્વર્વિદઃ ॥ ૬૯૪
૪ ૧ ૧ ૧૭ ০૨a અયં ભરાય સાનસિરિન્દ્રાય પવતે સુતઃ ।
૪ ૧ ૧ ૧૭ ০૨c સોમો જૈત્રસ્ય ચેતતિ યથા વિદે ॥ ૬૯૫
૪ ૧ ૧ ૧૭ ০૩a અસ્યેદિન્દ્રો મદેષ્વા ગ્રાભં ગૃભ્ણાતિ સાનસિમ્ ।
૪ ૧ ૧ ૧૭ ০૩c વજ્રં ચ વૃષણં ભરત્સમપ્સુજિત્ ॥ ૬૯૬

૪ ૧ ૧ ૧૮ ০૧a પુરોજિતી વો અન્ધસઃ સુતાય માદયિત્નવે ।
૪ ૧ ૧ ૧૮ ০૧c અપ શ્વાનઁ શ્નથિષ્ટન સખાયો દીર્ઘજિહ્વ્યમ્ ॥ ૬૯૭
૪ ૧ ૧ ૧૮ ০૨a યો ધારયા પાવકયા પરિપ્રસ્યન્દતે સુતઃ ।

૪ ૧ ૧ ૧૮ 02c ઇન્દુરશ્વો ન કૃત્વ્યઃ ॥ ૬૯૮
૪ ૧ ૧ ૧૮ 03a તં દુરોષમભી નરઃ સોમં વિશ્વાચ્યા ધિયા ।
૪ ૧ ૧ ૧૮ 03c યજ્ઞાય સન્ત્વદ્રયઃ ॥ ૬૯૯

૪ ૧ ૧ ૧૯ 01a અભિ પ્રિયાણિ પવતે ચનોહિતો નામાનિ યહ્વો અધિ યેષુ વર્ધતે ।
૪ ૧ ૧ ૧૯ 01c આ સૂર્યસ્ય બૃહતો બૃહન્નધિ રથં વિષ્વઞ્ચમરુહદ્વિચક્ષણઃ ॥ ૭૦૦
૪ ૧ ૧ ૧૯ 02a ઋતસ્ય જિહ્વા પવતે મધુ પ્રિયં વક્તા પતિર્ધિયો અસ્યા અદાભ્યઃ ।
૪ ૧ ૧ ૧૯ 02c દધાતિ પુત્રઃ પિત્રોરપીચ્યાઽં નામ તૃતીયમધિ રોચનં દિવઃ ॥ ૭૦૧
૪ ૧ ૧ ૧૯ 03a અવ દ્યુતાનઃ કલશાઁ અચિક્રદન્નૃભિર્યેમાણઃ કોશ આ હિરણ્યયે ।
૪ ૧ ૧ ૧૯ 03c અભી ઋતસ્ય દોહના અનૂષતાધિ ત્રિપૃષ્ઠ ઉષસો વિ રાજસિ ॥ ૭૦૨

૪ ૧ ૧ ૨૦ 01a યજ્ઞાયજ્ઞા વો અગ્નયે ગિરાગિરા ચ દક્ષસે ।
૪ ૧ ૧ ૨૦ 01c પ્રપ્ર વયમમૃતં જાતવેદસં પ્રિયં મિત્રં ન શઁસિષમ્ ॥ ૭૦૩
૪ ૧ ૧ ૨૦ 02a ઊર્જો નપાતઁ સ હિનાયમસ્મયુર્દાશેમ હવ્યદાતયે ।
૪ ૧ ૧ ૨૦ 02c ભુવદ્વાજેષ્વવિતા ભુવદ્વૃધ ઉત ત્રાતા તનૂનામ્ ॥ ૭૦૪

૪ ૧ ૧ ૨૧ 01a એહ્યૂ ષુ બ્રવાણિ તેઽગ્ન ઇત્થેતરા ગિરઃ ।
૪ ૧ ૧ ૨૧ 01c એભિર્વર્ધાસ ઇન્દુભિઃ ॥ ૭૦૫
૪ ૧ ૧ ૨૧ 02a યત્ર ક્વ ચ તે મનો દક્ષં દધસ ઉત્તરમ્ ।
૪ ૧ ૧ ૨૧ 02c તત્રા યોનિં કૃણવસે ॥ ૭૦૬
૪ ૧ ૧ ૨૧ 03a ન હિ તે પૂર્તમક્ષિપદ્ભુવન્નેમાનાં પતે ।
૪ ૧ ૧ ૨૧ 03c અથા દુવો વનવસે ॥ ૭૦૭

૪ ૧ ૧ ૨૨ 01a વયમુ ત્વામપૂર્વ્ય સ્થૂરં ન કચ્ચિદ્ભરન્તોઽવસ્યવઃ ।
૪ ૧ ૧ ૨૨ 01c વજ્રિઞ્ચિત્રઁ હવામહે ॥ ૭૦૮
૪ ૧ ૧ ૨૨ 02a ઉપ ત્વા કર્મન્નૂતયે સ નો યુવોગ્રશ્ચક્રામ યો ધૃષત્ ।
૪ ૧ ૧ ૨૨ 02c ત્વામિધ્યવિતારં વવૃમહે સખાય ઇન્દ્ર સાનસિમ્ ॥ ૭૦૯

૪ ૧ ૧ ૨૩ 01a અધા હીન્દ્ર ગિર્વણ ઉપ ત્વા કામ ઈમહે સસૃગ્મહે ।
૪ ૧ ૧ ૨૩ 01c ઉદેવ ગ્મન્ત ઉદભિઃ ॥ ૭૧૦
૪ ૧ ૧ ૨૩ 02a વાર્ણ ત્વા યવ્યાભિર્વર્ધન્તિ શૂર બ્રહ્માણિ ।
૪ ૧ ૧ ૨૩ 02c વવૃધ્વાઁસં ચિદદ્રિવો દિવેદિવે ॥ ૭૧૧
૪ ૧ ૧ ૨૩ 03a યુઞ્જન્તિ હરી ઇષિરસ્ય ગાથયોરૌ રથ ઉરુયુગે વચોયુજા ।
૪ ૧ ૧ ૨૩ 03c ઇન્દ્રવાહા સ્વર્વિદા ॥ ૭૧૨

પ્રથમ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૧ ૨ ૦૧ ૦૧a પાન્તમા વો અન્ધસ ઇન્દ્રમભિ પ્ર ગાયત ।
૪ ૧ ૨ ૦૧ ૦૧c વિશ્વાસાહઁ શતક્રતું મઁહિષ્ઠં ચર્ષણીનામ્ ॥ ૭૧૩
૪ ૧ ૨ ૦૧ ૦૨a પુરુહૂતં પુરુષ્ટુતં ગાથાન્યાઉઁ સનશ્રુતમ્ ।
૪ ૧ ૨ ૦૧ ૦૨c ઇન્દ્ર ઇતિ બ્રવીતન ॥ ૭૧૪
૪ ૧ ૨ ૦૧ ૦૩a ઇન્દ્ર ઇન્નો મહોનાં દાતા વાજાનાં નૃતુઃ ।
૪ ૧ ૨ ૦૧ ૦૩c મહાઁ અભિજ્ઞ્વા યમત્ ॥ ૭૧૫

૪ ૧ ૨ ૦૨ ૦૧a પ્ર વ ઇન્દ્રાય માદનઁ હર્યશ્વાય ગાયત ।
૪ ૧ ૨ ૦૨ ૦૧c સખાયઃ સોમપાવ્ને ॥ ૭૧૬
૪ ૧ ૨ ૦૨ ૦૨a શઁસેદુક્થઁ સુદાનવ ઉત દ્યુક્ષં યથ નરઃ ।
૪ ૧ ૨ ૦૨ ૦૨c ચકૃમા સત્યરાધસે ॥ ૭૧૭
૪ ૧ ૨ ૦૨ ૦૩a ત્વં ન ઇન્દ્ર વાજયુસ્ત્વં ગવ્યુઃ શતક્રતો ।
૪ ૧ ૨ ૦૨ ૦૩c ત્વઁ હિરણ્યયુર્વસો ॥ ૭૧૮

૪ ૧ ૨ ૦૩ ૦૧a વયમુ ત્વા તદિદર્થા ઇન્દ્ર ત્વાયન્તઃ સખાયઃ ।
૪ ૧ ૨ ૦૩ ૦૧c કણ્વા ઉક્થેભિર્જરન્તે ॥ ૭૧૯
૪ ૧ ૨ ૦૩ ૦૨a ન ઘેમન્યદા પપન વજ્રિન્નપસો નવિષ્ટૌ ।
૪ ૧ ૨ ૦૩ ૦૨c તવેદુ સ્તોમૈશ્ચિકેત ॥ ૭૨૦
૪ ૧ ૨ ૦૩ ૦૩a ઇચ્છન્તિ દેવાઃ સુન્વન્તં ન સ્વપ્નાય સ્પૃહયન્તિ ।
૪ ૧ ૨ ૦૩ ૦૩c યન્તિ પ્રમાદમતન્દ્રાઃ ॥ ૭૨૧

૪ ૧ ૨ ૦૪ ૦૧a ઇન્દ્રાય મદ્વ્ને સુતં પરિ ષ્ટોભન્તુ નો ગિરઃ ।
૪ ૧ ૨ ૦૪ ૦૧c અર્કમર્ચ્ન્તુ કારવઃ ॥ ૭૨૨
૪ ૧ ૨ ૦૪ ૦૨a યસ્મિન્વિશ્વા અધિ શ્રિયો રણન્તિ સપ્ત સઁસદઃ ।
૪ ૧ ૨ ૦૪ ૦૨c ઇન્દ્રઁ સુતે હવામહે ॥ ૭૨૩
૪ ૧ ૨ ૦૪ ૦૩a ત્રિકદ્રુકેષુ ચેતનં દેવાસો યજ્ઞમત્નત ।
૪ ૧ ૨ ૦૪ ૦૩c તમિદ્વર્ધન્તુ નો ગિરઃ ॥ ૭૨૪

૪ ૧ ૨ ૦૫ ૦૧a અયં ત ઇન્દ્ર સોમો નિપૂતો અધિ બર્હિષિ ।
૪ ૧ ૨ ૦૫ ૦૧c એહીમસ્ય દ્રવા પિબ ॥ ૭૨૫
૪ ૧ ૨ ૦૫ ૦૨a શાચિગો શાચિપૂજનાયઁ રણાય તે સુતઃ ।
૪ ૧ ૨ ૦૫ ૦૨c આખણ્ડલ પ્ર હૂયસે ॥ ૭૨૬
૪ ૧ ૨ ૦૫ ૦૩a યસ્તે શ ૃઙ્ગવૃષો ણપાત્પ્રણપાત્કુણ્ડપાય્યઃ ।
૪ ૧ ૨ ૦૫ ૦૩c ન્યસ્મિં દધ્ર આ મનઃ ॥ ૭૨૭

૪ ૧ ૨ ૦૬ ૦1a  આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભઁ સં ગૃભાય ।
૪ ૧ ૨ ૦૬ ૦1c  મહાહસ્તિ દક્ષિણેન ॥ ૭૨૮
૪ ૧ ૨ ૦૬ ૦2a  વિદ્મા હિ ત્વા તુવિકૂર્મિં તુવિદેષ્ણં તુવીમઘમ્ ।
૪ ૧ ૨ ૦૬ ૦2c  તુવિમાત્રમવોભિઃ ॥ ૭૨૯
૪ ૧ ૨ ૦૬ ૦3a  ન હિ ત્વા શૂર દેવા ન મર્તાસો દિત્સન્તમ્ ।
૪ ૧ ૨ ૦૬ ૦3c  ભીમં ન ગાં વારયન્તે ॥ ૭૩૦

૪ ૧ ૨ ૦૭ ૦1a  અભિ ત્વા વૃષભા સુતે સુતઁ સૃજામિ પીતયે ।
૪ ૧ ૨ ૦૭ ૦1c  તૃમ્પા વ્યશ્નુહી મદમ્ ॥ ૭૩૧
૪ ૧ ૨ ૦૭ ૦2a  મા ત્વા મૂરા અવિષ્યવો મોપહસ્વાન આ દભન્ ।
૪ ૧ ૨ ૦૭ ૦2c  મા કીં બ્રહ્મદ્વિષં વનઃ ॥ ૭૩૨
૪ ૧ ૨ ૦૭ ૦3a  ઇહ ત્વા ગોપરીણસં મહે મન્દન્તુ રાધસે ।
૪ ૧ ૨ ૦૭ ૦3c  સરો ગૌરો યથા પિબ ॥ ૭૩૩

૪ ૧ ૨ ૦૮ ૦1a  ઇદમ્ વસો સુતમન્ધઃ પિબા સુપૂર્ણમુદરમ્ ।
૪ ૧ ૨ ૦૮ ૦1c  અનાભયિન્નરિમા તે ॥ ૭૩૪
૪ ૧ ૨ ૦૮ ૦2a  નૃભિર્ધૌતઃ સુતો અશ્નૈરવ્યા વારૈઃ પરિપૂતઃ ।
૪ ૧ ૨ ૦૮ ૦2c  અશ્વો ન નિક્તો નદીષુ ॥ ૭૩૫
૪ ૧ ૨ ૦૮ ૦3a  તં તે યવં યથા ગોભિઃ સ્વાદુમકર્મ શ્રીણન્તઃ ।
૪ ૧ ૨ ૦૮ ૦3c  ઇન્દ્ર ત્વાસ્મિન્ત્સધમાદે ॥ ૭૩૬

૪ ૧ ૨ ૦૯ ૦1a  ઇદઁ હ્યન્વોજસા સુતઁ રાધાનાં પતે ।
૪ ૧ ૨ ૦૯ ૦1c  પિબા ત્વાઉસ્ય ગિર્વણઃ ॥ ૭૩૭
૪ ૧ ૨ ૦૯ ૦2a  યસ્તે અનુ સ્વધામસત્સુતે નિ યચ્છ તન્વમ્ ।
૪ ૧ ૨ ૦૯ ૦2c  સ ત્વા મમત્તુ સોમ્યમ્ ॥ ૭૩૮
૪ ૧ ૨ ૦૯ ૦3a  પ્ર તે અશ્નોતુ કુક્ષ્યોઃ પ્રેન્દ્ર બ્રહ્મણા શિરઃ ।
૪ ૧ ૨ ૦૯ ૦3c  પ્ર બાહૂ શૂર રાધસા ॥ ૭૩૯

૪ ૧ ૨ ૧૦ ૦1a  આ ત્વેતા નિ ષીદતેન્દ્રમભિ પ્ર ગાયત ।
૪ ૧ ૨ ૧૦ ૦1c  સખાય સ્તોમવાહસઃ ॥ ૭૪૦
૪ ૧ ૨ ૧૦ ૦2a  પુરૂતમં પુરૂણામીશાનં વાર્યાણામ્ ।
૪ ૧ ૨ ૧૦ ૦2c  ઇન્દ્રઁ સોમે સચા સુતે ॥ ૭૪૧
૪ ૧ ૨ ૧૦ ૦3a  સ ઘા નો યોગ આ ભુવત્સ રાયે સ પુરન્ધ્યા ।
૪ ૧ ૨ ૧૦ ૦3c  ગમદ્વાજેભિરા સ નઃ ॥ ૭૪૨

૪ ૧ ૨ ૧૧ ០૧a  યોગેયોગે તવસ્તરં વાજેવાજે હવામહે ।
૪ ૧ ૨ ૧૧ ០૧c  સખાય ઇન્દ્રમૂતયે ॥ ૭૪૩
૪ ૧ ૨ ૧૧ ០૨a  અનુ પ્રત્નસ્યૌકસો હુવે તુવિપ્રતિં નરમ્ ।
૪ ૧ ૨ ૧૧ ០૨c  યં તે પૂર્વં પિતા હુવે ॥ ૭૪૪
૪ ૧ ૨ ૧૧ ០૩a  આ ઘા ગમદ્યદિ શ્રવત્સહસ્રિણીભિરૂતિભિઃ ।
૪ ૧ ૨ ૧૧ ០૩c  વાજેભિરુપ નો હવમ્ ॥ ૭૪૫

૪ ૧ ૨ ૧૨ ០૧a  ઇન્દ્ર સુતેષુ સોમેષુ ક્રતું પુનીષ ઉક્થ્યમ્ ।
૪ ૧ ૨ ૧૨ ០૧c  વિદે વૃધસ્ય દક્ષસ્ય મહાઁ હિ ષઃ ॥ ૭૪૬
૪ ૧ ૨ ૧૨ ០૨a  સ પ્રથમે વ્યોમનિ દેવાનાઁ સદને વૃધઃ ।
૪ ૧ ૨ ૧૨ ០૨c  સુપારઃ સુશ્રવસ્તમઃ સમપ્સુજિત્ ॥ ૭૪૭
૪ ૧ ૨ ૧૨ ០૩a  તમુ હુવે વાજસાતય ઇન્દ્રં ભરાય શુષ્મિણમ્ ।
૪ ૧ ૨ ૧૨ ០૩c  ભવા નઃ સુમ્ને અન્તમઃ સખા વૃધે ॥ ૭૪૮

૪ ૧ ૨ ૧૩ ០૧a  એના વો અગ્નિં નમસોર્જો નપાતમા હુવે ।
૪ ૧ ૨ ૧૩ ០૧c  પ્રિયં ચેતિષ્ઠમરતિઁ સ્વધ્વરં વિશ્વસ્ય દૂતમમૃતમ્ ॥ ૭૪૯
૪ ૧ ૨ ૧૩ ០૨a  સ યોજતે અરુષા વિશ્વભોજસા સ દુદ્રવત્સ્વાહુતઃ ।
૪ ૧ ૨ ૧૩ ០૨c  સુબ્રહ્મા યજ્ઞઃ સુશમી વસૂનાં દેવઁ રાધો જનાનામ્ ॥ ૭૫૦

૪ ૧ ૨ ૧૪ ០૧a  પ્રત્યુ અદર્શ્યાયત્યૂ૩ચ્છન્તી દુહિતા દિવઃ ।
૪ ૧ ૨ ૧૪ ០૧c  અપો મહી વૃણુતે ચક્ષુષા તમો જ્યોતિષ્કૃણોતિ સૂનરી ॥ ૭૫૧
૪ ૧ ૨ ૧૪ ០૨a  ઉદુસ્રિયાઃ સૃજતે સૂર્યઃ સચા ઉદ્યન્નક્ષત્રમર્ચિવત્ ।
૪ ૧ ૨ ૧૪ ០૨c  તવેદુષો વ્યુષિ સૂર્યસ્ય ચ સં ભક્તેન ગમેમહિ ॥ ૭૫૨

૪ ૧ ૨ ૧૫ ០૧a  ઇમા ઉ વાં દિવિષ્ટય ઉસ્રા હવન્તે અશ્વિના ।
૪ ૧ ૨ ૧૫ ០૧c  અયં વામહ્વેઽવસે શચીવસૂ વિશંવિશઁ હિ ગચ્છથઃ ॥ ૭૫૩
૪ ૧ ૨ ૧૫ ០૨a  યુવં ચિત્રં દદથુર્ભોજનં નરા ચોદેથાઁ સૂનૃતાવતે ।
૪ ૧ ૨ ૧૫ ០૨c  અર્વાગ્રથઁ સમનસા નિ યચ્છતં પિબતઁ સોમ્યં મધુ ॥ ૭૫૪

૪ ૧ ૨ ૧૬ ០૧a  અસ્ય પ્રત્નામનુ દ્યુતઁ શુક્રં દુદુહ્રે અહ્રયઃ ।
૪ ૧ ૨ ૧૬ ០૧c  પયઃ સહસ્રસામૃષિમ્ ॥ ૭૫૫
૪ ૧ ૨ ૧૬ ០૨a  અયઁ સૂર્ય ઇવોપદૃગયઁ સરાઁસિ ધાવતિ ।
૪ ૧ ૨ ૧૬ ០૨c  સપ્ત પ્રવત આ દિવમ્ ॥ ૭૫૬
૪ ૧ ૨ ૧૬ ០૩a  અયં વિશ્વાનિ તિષ્ઠતિ પુનાનો ભુવનોપરિ ।
૪ ૧ ૨ ૧૬ ០૩c  સોમો દેવો ન સૂર્યઃ ॥ ૭૫૭

૪ ૧ ૨ ૧૭ ૦૧a એષ પ્રત્નેન જન્મના દેવો દેવેભ્યઃ સુતઃ ।
૪ ૧ ૨ ૧૭ ૦૧c હરિઃ પવિત્રે અર્ષતિ ॥ ૭૫૮
૪ ૧ ૨ ૧૭ ૦૨a એષ પ્રત્નેન મન્મના દેવો દેવેભ્યસ્પરિ ।
૪ ૧ ૨ ૧૭ ૦૨c કવિર્વિપ્રેણ વાવૃધે ॥ ૭૫૯
૪ ૧ ૨ ૧૭ ૦૩a દુહાનઃ પ્રત્નમિત્પયઃ પવિત્રે પરિ ષિચ્યસે ।
૪ ૧ ૨ ૧૭ ૦૩c ક્રન્દં દેવાઁ અજીજનઃ ॥ ૭૬૦

૪ ૧ ૨ ૧૮ ૦૧a ઉપ શિક્ષાપતસ્થુષો ભિયસમા ધેહિ શત્રવે ।
૪ ૧ ૨ ૧૮ ૦૧c પવમાન વિદા રયિમ્ ॥ ૭૬૧
૪ ૧ ૨ ૧૮ ૦૨a ઉષો ષુ જાતમમુરં ગોભિર્ભઙ્ગં પરિષ્કૃતમ્ ।
૪ ૧ ૨ ૧૮ ૦૨c ઇન્દું દેવા અયાસિષુઃ ॥ ૭૬૨
૪ ૧ ૨ ૧૮ ૦૩a ઉપાસ્મૈ ગાયતા નરઃ પવમાનાયેન્દવે ।
૪ ૧ ૨ ૧૮ ૦૩c અભિ દેવાઁ ઇયક્ષતે ॥ ૭૬૩

૪ ૧ ૨ ૧૯ ૦૧a પ્ર સોમાસો વિપશ્ચિતોઽપો નયન્ત ઊર્મયઃ ।
૪ ૧ ૨ ૧૯ ૦૧c વનાનિ મહિષા ઇવ ॥ ૭૬૪
૪ ૧ ૨ ૧૯ ૦૨a અભિ દ્રોણાનિ બભ્રવઃ શુક્રા ઋતસ્ય ધારયા ।
૪ ૧ ૨ ૧૯ ૦૨c વાજં ગોમન્તમક્ષરન્ ॥ ૭૬૫
૪ ૧ ૨ ૧૯ ૦૩a સુતા ઇન્દ્રાય વાયવે વરુણાય મરુદ્ભ્યઃ ।
૪ ૧ ૨ ૧૯ ૦૩c સોમા અર્ષન્તુ વિષ્ણવે ॥ ૭૬૬

૪ ૧ ૨ ૨૦ ૦૧a પ્ર સોમ દેવવીતયે સિન્ધુર્ન પિપ્યે અર્ણસા ।
૪ ૧ ૨ ૨૦ ૦૧c અઁશોઃ પયસા મદિરો ન જાગૃવિરચ્છા કોશં મધુશ્ચુતમ્ ॥ ૭૬૭
૪ ૧ ૨ ૨૦ ૦૨a આ હર્યતો અર્જુનો અત્કે અવ્યત પ્રિયઃ સૂનુર્ન મર્જ્યઃ ।
૪ ૧ ૨ ૨૦ ૦૨c તમીઁ હિન્વન્ત્યપસો યથા રથં નદીષ્વા ગભસ્ત્યોઃ ॥ ૭૬૮

૪ ૧ ૨ ૨૧ ૦૧a પ્ર સોમાસો મદચ્યુતઃ શ્રવસે નો મઘોનામ્ ।
૪ ૧ ૨ ૨૧ ૦૧c સુતા વિદથે અક્રમુઃ ॥ ૭૬૯
૪ ૧ ૨ ૨૧ ૦૨a આદીઁ હઁસો યથા ગણં વિશ્વસ્યાવીવશન્મતિમ્ ।
૪ ૧ ૨ ૨૧ ૦૨c અત્યો ન ગોભિરજ્યતે ॥ ૭૭૦
૪ ૧ ૨ ૨૧ ૦૩a આદીં ત્રિતસ્ય યોષણો હરિઁ હિન્વન્ત્યદ્રિભિઃ ।
૪ ૧ ૨ ૨૧ ૦૩c ઇન્દુમિન્દ્રાય પીતયે ॥ ૭૭૧

૪ ૧ ૨ ૨૨ ૦૧a અયા પવસ્વ દેવયુ રેભન્પવિત્રં પર્યેષિ વિશ્વતઃ ।
૪ ૧ ૨ ૨૨ ૦૧c મધોર્ધારા અસૃક્ષત ॥ ૭૭૨

૪ ૧ ૨ ૨૨ ०૨a  પવતે હર્યતો હરિરતિ હ્વરાઁસિ રँહ્યા ।
૪ ૧ ૨ ૨૨ ०૨c  અભ્યર્ષ સ્તોતૃભ્યો વીરવદ્યશઃ ॥ ૭૭૩
૪ ૧ ૨ ૨૨ 03a  પ્ર સુન્વાનાસ્યાન્ધસો મર્તો ન વષ્ટ તદ્વચઃ ।
૪ ૧ ૨ ૨૨ 03c  અપ શ્વાનમરાધસઁ હતા મખં ન ભૃગવઃ ॥ ૭૭૪

દ્વિતીય પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૪ ૨ ૧ ०૧ ०૧a  પવસ્વ વાચો અગ્રિયઃ સોમ ચિત્રાભિરૂતિભિઃ ।
૪ ૨ ૧ ०૧ ०૧c  અભિ વિશ્વાનિ કાવ્યા ॥ ૭૭૫
૪ ૨ ૧ ०૧ ०૨a  ત્વઁ સમુદ્રિયા અપોઽગ્રિયો વાચ ઈરયન્ ।
૪ ૨ ૧ ०૧ ०૨c  પવસ્વ વિશ્વચર્ષણે ॥ ૭૭૬
૪ ૨ ૧ ०૧ 03a  તુભ્યેમા ભુવના કવે મહિમ્ને સોમ તસ્થિરે ।
૪ ૨ ૧ ०૧ 03c  તુભ્યં ધાવન્તિ ધેનવઃ ॥ ૭૭૭

૪ ૨ ૧ ०૨ ०૧a  પવસ્વેન્દો વૃષા સુતઃ કૃધી નો યશસો જને ।
૪ ૨ ૧ ०૨ ०૧c  વિશ્વા અપ દ્વિષો જહિ ॥ ૭૭૮
૪ ૨ ૧ ०૨ ०૨a  યસ્ય તે સખ્યે વયઁ સાસહ્યામ પૃતન્યતઃ ।
૪ ૨ ૧ ०૨ ०૨c  તવેન્દો દ્યુમ્ન ઉત્તમે ॥ ૭૭૯
૪ ૨ ૧ ०૨ 03a  યા તે ભીમાન્યાયુધા તિગ્માનિ સન્તિ ધૂર્વણે ।
૪ ૨ ૧ ०૨ 03c  રક્ષા સમસ્ય નો નિદઃ ॥ ૭૮०

૪ ૨ ૧ 03 ०૧a  વૃષા સોમ દ્યુમાઁ અસિ વૃષા દેવ વૃષવ્રતઃ ।
૪ ૨ ૧ 03 ०૧c  વૃષા ધર્માણિ દધ્રિષે ॥ ૭૮૧
૪ ૨ ૧ 03 ०૨a  વૃષ્ણસ્તે વૃષ્ણ્યઁ શવો વૃષા વનં વૃષા સુતઃ ।
૪ ૨ ૧ 03 ०૨c  સ ત્વં વૃષન્વૃષેદસિ ॥ ૭૮૨
૪ ૨ ૧ 03 03a  અશ્વો ન ચક્રદો વૃષા સં ગા ઇન્દો સમર્વતઃ ।
૪ ૨ ૧ 03 03c  વિ નો રાયે દુરો વૃધિ ॥ ૭૮૩

૪ ૨ ૧ ०૪ ०૧a  વૃષા હ્યસિ ભાનુના દ્યુમન્તં ત્વા હવામહે ।
૪ ૨ ૧ ०૪ ०૧c  પવમાન સ્વર્દૃશમ્ ॥ ૭૮૪
૪ ૨ ૧ ०૪ ०૨a  યદદ્ભિઃ પરિષિચ્યસે મર્મૃજ્યમાન આયુભિઃ ।
૪ ૨ ૧ ०૪ ०૨c  દ્રોણે સધસ્થમશ્નુષે ॥ ૭૮૫
૪ ૨ ૧ ०૪ 03a  આ પવસ્વ સુવીર્યં મન્દમાનઃ સ્વાયુધ ।
૪ ૨ ૧ ०૪ 03c  ઇહો ષ્વિન્દવા ગહિ ॥ ૭૮૬

૪ ૨ ૧ ०૫ ०૧a  પવમાનસ્ય તે વયં પવિત્રમભ્યુન્દતઃ ।

૪ ૨ ૧ ૦૫ ૦૧c સખિત્વમા વૃણીમહે ॥ ૭૮૭
૪ ૨ ૧ ૦૫ ૦૨a યે તે પવિત્રમૂર્મયોઽભિક્ષરન્તિ ધારયા ।
૪ ૨ ૧ ૦૫ ૦૨c તેભિર્નઃ સોમ મૃડય ॥ ૭૮૮
૪ ૨ ૧ ૦૫ ૦૩a સ નઃ પુનાન આ ભર રયિં વીરવતીમિષમ્
૪ ૨ ૧ ૦૫ ૦૩c ઈશાનઃ સોમ વિશ્વતઃ ॥ ૭૮૯

૪ ૨ ૧ ૦૬ ૦૧a અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।
૪ ૨ ૧ ૦૬ ૦૧c અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ ૭૯૦
૪ ૨ ૧ ૦૬ ૦૨a અગ્નિમગ્નિઁ હવીમભિઃ સદા હવન્ત વિશ્પતિમ્ ।
૪ ૨ ૧ ૦૬ ૦૨c હવ્યવાહં પુરુપ્રિયમ્ ॥ ૭૯૧
૪ ૨ ૧ ૦૬ ૦૩a અગ્ને દેવાઁ ઇહા વહ જજ્ઞાનો વૃક્તબર્હિષે ।
૪ ૨ ૧ ૦૬ ૦૩c અસિ હોતા ન ઈડ્યઃ ॥ ૭૯૨

૪ ૨ ૧ ૦૭ ૦૧a મિત્રં વયઁ હવામહે વરુણઁ સોમપીતયે ।
૪ ૨ ૧ ૦૭ ૦૧c ય જાતા પૂતદક્ષસા ॥ ૭૯૩
૪ ૨ ૧ ૦૭ ૦૨a ઋતેન યાવૃતાવૃધાવૃતસ્ય જ્યોતિષસ્પતી ।
૪ ૨ ૧ ૦૭ ૦૨c તા મિત્રાવરુણા હુવે ॥ ૭૯૪
૪ ૨ ૧ ૦૭ ૦૩a વરુણઃ પ્રાવિતા ભુવન્મિત્રો વિશ્વાભિરૂતિભિઃ ।
૪ ૨ ૧ ૦૭ ૦૩c કરતાં નઃ સુરાધસઃ ॥ ૭૯૫

૪ ૨ ૧ ૦૮ ૦૧a ઇન્દ્રમિદ્ગાથિનો બૃહદિન્દ્રમર્કેભિરર્કિણઃ ।
૪ ૨ ૧ ૦૮ ૦૧c ઇન્દ્રં વાણીરનૂષત ॥ ૭૯૬
૪ ૨ ૧ ૦૮ ૦૨a ઇન્દ્ર ઇદ્ધર્યોઃ સચા સમ્મિશ્લ આ વચોયુજા ।
૪ ૨ ૧ ૦૮ ૦૨c ઇન્દ્રો વજ્રી હિરણ્યયઃ ॥ ૭૯૭
૪ ૨ ૧ ૦૮ ૦૩a ઇન્દ્ર વાજેષુ નોઽવ સહસ્રપ્રધનેષુ ચ ।
૪ ૨ ૧ ૦૮ ૦૩c ઉગ્ર ઉગ્રાભિરૂતિભિઃ ॥ ૭૯૮
૪ ૨ ૧ ૦૮ ૦૪a ઇન્દ્રો દીર્ઘાય ચક્ષસ આ સૂર્યં રોહયદ્દિવિ ।
૪ ૨ ૧ ૦૮ ૦૪c વિ ગોભિરદ્રિમૈરયત્ ॥ ૭૯૯

૪ ૨ ૧ ૦૯ ૦૧a ઇન્દ્રે અગ્ના નમો બૃહત્સુવૃક્તિમેરયામહે ।
૪ ૨ ૧ ૦૯ ૦૧c ધિયા ધેના અવસ્યવઃ ॥ ૮૦૦
૪ ૨ ૧ ૦૯ ૦૨a તા હિ શશ્વન્ત ઈડત ઇત્થા વિપ્રાસ ઊતયે ।
૪ ૨ ૧ ૦૯ ૦૨c સબાધો વાજસાતયે ॥ ૮૦૧
૪ ૨ ૧ ૦૯ ૦૩a તા વાં ગીર્ભિર્વિપન્યુવઃ પ્રયસ્વન્તો હવામહે ।

૪ ૨ ૧ ૦૯ 03c  મેધસાતા સનિષ્યવઃ ॥ ૮૦૨

૪ ૨ ૧ ૧૦ ૦૧a  વૃષા પવસ્વ ધારયા મરુત્વતે ચ મત્સરઃ ।
૪ ૨ ૧ ૧૦ ૦૧c  દિશ્વા દધાન ઓજસા ॥ ૮૦૩
૪ ૨ ૧ ૧૦ ૦૨a  તં ત્વા ધર્ત્તારમોણ્યોઙઃ પવમાન સ્વર્દૃશમ્ ।
૪ ૨ ૧ ૧૦ ૦૨c  હિન્વે વાજેષુ વાજિનમ્ ॥ ૮૦૪
૪ ૨ ૧ ૧૦ 03a  અયા ચિત્તો વિપાનયા હરિઃ પવસ્વ ધારયા ।
૪ ૨ ૧ ૧૦ 03c  યુજં વાજેષુ ચોદય ॥ ૮૦૫

૪ ૨ ૧ ૧૧ ૦૧a  વૃષા શોણો અભિકનિક્રદદ્ગા નદયન્નેષિ પૃથિવીમુત દ્યામ્ ।
૪ ૨ ૧ ૧૧ ૦૧c  ઇન્દ્રસ્યેવ વગ્નુરા શ ૃણ્વ આજૌ પ્રચોદયન્નર્ષસિ વાચમેમામ્ ॥ ૮૦૬
૪ ૨ ૧ ૧૧ ૦૨a  રસાય્યઃ પયસા પિન્વમાન ઈરયન્નેષિ મધુમન્તમઁશુમ્ ।
૪ ૨ ૧ ૧૧ ૦૨c  પવમાન સન્તનિમેષિ કૃણ્વન્નિન્દ્રાય સોમ પરિષિચ્યમાનઃ ॥ ૮૦૭
૪ ૨ ૧ ૧૧ 03a  એવા પવસ્વ મદિરો મદાયોદગ્રાભસ્ય નમયન્વધસ્નુમ્ ।
૪ ૨ ૧ ૧૧ 03c  પરિ વર્ણં ભરમાણો રુશન્તં ગવ્યુર્નો અર્ષ પરિ સોમ સિક્તઃ ॥ ૮૦૮

૪ ૨ ૧ ૧૨ ૦૧a  ત્વામિદ્ધિ હવામહે સાતૌ વાજસ્ય કારવઃ ।
૪ ૨ ૧ ૧૨ ૦૧c  ત્વાં વૃત્રેષ્વિન્દ્ર સત્પતિં નરસ્ત્વાં કાષ્ઠાસ્વર્વતઃ ॥ ૮૦૯
૪ ૨ ૧ ૧૨ ૦૨a  સ ત્વં નશ્ચિત્ર વજ્રહસ્ત ધૃષ્ણુયા મહ સ્તવાનો અદ્રિવઃ ।
૪ ૨ ૧ ૧૨ ૦૨c  ગામશ્વઁ રથ્યમિન્દ્ર સં કિર સત્રા વાજં ન જિગ્યુષે ॥ ૮૧૦

૪ ૨ ૧ ૧૩ ૦૧a  અભિ પ્ર વઃ સુરાધસમિન્દ્રમર્ચ યથા વિદે ।
૪ ૨ ૧ ૧૩ ૦૧c  યો જરિતૃભ્યો મઘવા પુરૂવસુઃ સહસ્રેણેવ શિક્ષતિ ॥ ૮૧૧
૪ ૨ ૧ ૧૩ ૦૨a  શતાનીકેવ પ્ર જિગાતિ ધૃષ્ણુયા હન્તિ વૃત્રાણિ દાશુષે ।
૪ ૨ ૧ ૧૩ ૦૨c  ગિરેરિવ પ્ર રસા અસ્ય પિન્વિરે દત્રાણિ પુરુભોજસઃ ॥ ૮૧૨

૪ ૨ ૧ ૧૪ ૦૧a  ત્વામિદા હ્યો નરોઽપીપ્યન્વજ્રિન્ભૂર્ણયઃ ।
૪ ૨ ૧ ૧૪ ૦૧c  સ ઇન્દ્ર સ્તોમવાહસ ઇહ શ્રુધ્યુપ સ્વસરમા ગહિ ॥ ૮૧૩
૪ ૨ ૧ ૧૪ ૦૨a  મત્સ્વા સુશિપ્રિન્હરિવસ્તમીમહે ત્વયા ભૂષન્તિ વેધસઃ ।
૪ ૨ ૧ ૧૪ ૦૨c  તવ શ્રવાઁસ્યુપમાન્યુક્થ્ય સુતેષ્વિન્દ્ર ગિર્વણઃ ॥ ૮૧૪

૪ ૨ ૧ ૧૫ ૦૧a  યસ્તે મદો વરેણ્યસ્તેના પવસ્વાન્ધસા ।
૪ ૨ ૧ ૧૫ ૦૧c  દેવાવીરઘશઁસહા ॥ ૮૧૫
૪ ૨ ૧ ૧૫ ૦૨a  જઘ્નિર્વૃત્રમમિત્રિયઁ સસ્નિર્વાજં દિવેદિવે ।
૪ ૨ ૧ ૧૫ ૦૨c  ગોષાતિરશ્વસા અસિ ॥ ૮૧૬
૪ ૨ ૧ ૧૫ 03a  સમ્મિશ્લો અરુષો ભુવઃ સૂપસ્થાભિર્ન ધેનુભિ ।

૪ ૨ ૧ ૧૫ 03c સીદં ચ્છ્યેનો ન યોનિમા ॥ ૮૧૭

૪ ૨ ૧ ૧૬ ૦1a અયં પૂષા રયિર્ભગઃ સોમઃ પુનાનો અર્ષતિ ।
૪ ૨ ૧ ૧૬ ૦1c પતિર્વિશ્વસ્ય ભૂમનો વ્યખ્યદ્રોદસી ઉભે ॥ ૮૧૮
૪ ૨ ૧ ૧૬ ૦2a સમુ પ્રિયા અનૂષત ગાવો મદાય ધૃષ્વયઃ ।
૪ ૨ ૧ ૧૬ ૦2c સોમાસઃ કૃણ્વતે પથઃ પવમાનાસ ઇન્દવઃ ॥ ૮૧૯
૪ ૨ ૧ ૧૬ 03a ય ઓજિષ્ઠસ્તમા ભર પવમાન શ્રવાય્યમ્ ।
૪ ૨ ૧ ૧૬ 03c યઃ પઞ્ચ ચર્ષણીરભિ રયિં યેન વનામહે ॥ ૮૨૦

૪ ૨ ૧ ૧૭ ૦1a વૃષા મતીનાં પવતે વિચક્ષણઃ સોમો અહ્નાં પ્રતરીતોષસાં દિવઃ ।
૪ ૨ ૧ ૧૭ ૦1c પ્રાણા સિન્ધૂનાં કલશાઁ અચિક્રદદિન્દ્રસ્ય હાર્દ્યાવિશન્મનીષિભિઃ ॥ ૮૨૧
૪ ૨ ૧ ૧૭ ૦2a મનીષિભિઃ પવતે પૂર્વ્યઃ કવિર્નૃભિર્યતઃ પરિ કોશાઁ અસિષ્યદત્ ।
૪ ૨ ૧ ૧૭ ૦2c ત્રિતસ્ય નામ જનયન્મધુ ક્ષરન્નિન્દ્રસ્ય વાયૂઁ સખ્યાય વર્ધયન્ ॥ ૮૨૨
૪ ૨ ૧ ૧૭ 03a અયં પુનાન ઉષસો અરોચયદયૅં સિન્ધુભ્યો અભવદુ લોકકૃત્ ।
૪ ૨ ૧ ૧૭ 03c અયં ત્રિઃ સપ્ત દુદુહાન આશિરઁ સોમો હૃદે પવતે ચારુ મત્સરઃ ॥ ૮૨૩

૪ ૨ ૧ ૧૮ ૦1a એવા હ્યસિ વીરયુરેવા શૂર ઉત સ્થિરહ્ ।
૪ ૨ ૧ ૧૮ ૦1c એવા તે રાધ્યં મનઃ ॥ ૮૨૪
૪ ૨ ૧ ૧૮ ૦2a એવા રાતિસ્તુવીમઘ વિશ્વેભિર્ધાયિ ધાતૃભિઃ ।
૪ ૨ ૧ ૧૮ ૦2c અધા ચિદિન્દ્ર નઃ સચા ॥ ૮૨૫
૪ ૨ ૧ ૧૮ 03a મો ષુ બ્રહ્મેવ તદિન્દ્રયુર્ભુવો વાજાનાં પતે ।
૪ ૨ ૧ ૧૮ 03c મત્સ્વા સુતસ્ય ગોમતઃ ॥ ૮૨૬

૪ ૨ ૧ ૧૯ ૦1a ઇન્દ્રં વિશ્વા અવીવૃધન્ત્સમુદ્રવ્યચસં ગિરઃ ।
૪ ૨ ૧ ૧૯ ૦1c રથીતમઁ રથીનાં વાજાનાઁ સત્પતિં પતિમ્ ॥ ૮૨૭
૪ ૨ ૧ ૧૯ ૦2a સખ્યે ત ઇન્દ્ર વાજિનો મા ભેમ શવસસ્પતે ।
૪ ૨ ૧ ૧૯ ૦2c ત્વામભિ પ્ર નોનુમો જેતારમપરાજિતમ્ ॥ ૮૨૮
૪ ૨ ૧ ૧૯ 03a પૂર્વીરિન્દ્રસ્ય રાતયો ન વિ દસ્યન્ત્યૂતયઃ ।
૪ ૨ ૧ ૧૯ 03c યદા વાજસ્ય ગોમત સ્તોતૃભ્યો મઁહતે મઘમ્ ॥ ૮૨૯

દ્વિતીય પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૨ ૨ ૦૧ ૦1a એત અસૃગ્રમિન્દવસ્તિરઃ પવિત્રમાશવઃ ।
૪ ૨ ૨ ૦૧ ૦1c વિશ્વાન્યભિ સૌભગા ॥ ૮૩૦
૪ ૨ ૨ ૦૧ ૦2a વિઘ્નન્તો દુરિતા પુરુ સુગા તોકાય વાજિનઃ ।
૪ ૨ ૨ ૦૧ ૦2c ત્મના કૃણ્વન્તો અર્વતઃ ॥ ૮૩૧

૪ ૨ ૨ ૦૧ ૦૩a  કૃણ્વન્તો વરિવો ગવેઽભ્યર્ષન્તિ સુષ્ટુતિમ્ ।
૪ ૨ ૨ ૦૧ ૦૩c  ઇઽામસ્મભ્યઁ સંયતમ્ ॥ ૮૩૨

૪ ૨ ૨ ૦૨ ૦૧a  રાજા મેધાભિરીયતે પવમાનો મનાવધિ ।
૪ ૨ ૨ ૦૨ ૦૧c  અન્તરિક્ષેણ યાતવે ॥ ૮૩૩
૪ ૨ ૨ ૦૨ ૦૨a  આ નઃ સોમ સહો જુવો રૂપં ન વર્ચસે ભર ।
૪ ૨ ૨ ૦૨ ૦૨c  સુષ્વાણો દેવવીતયે ॥ ૮૩૪
૪ ૨ ૨ ૦૨ ૦૩a  આ ન ઇન્દો શતગ્વિનં ગવાં પોષઁ સ્વશ્વ્યમ્ ।
૪ ૨ ૨ ૦૨ ૦૩c  વહા ભગત્તિમૂતયે ॥ ૮૩૫

૪ ૨ ૨ ૦૩ ૦૧a  તં ત્વા નૃમ્ણાનિ બિભ્રતઁ સધસ્થેષુ મહો દિવઃ ।
૪ ૨ ૨ ૦૩ ૦૧c  ચારુઁ સુકૃત્યયેમહે ॥ ૮૩૬
૪ ૨ ૨ ૦૩ ૦૨a  સંવૃક્તધૃષ્ણુમુક્થ્યં મહામહિવ્રતં મદમ્ ।
૪ ૨ ૨ ૦૩ ૦૨c  શતં પુરો રુરુક્ષણિમ્ ॥ ૮૩૭
૪ ૨ ૨ ૦૩ ૦૩a  અતસ્ત્વા રયિરભ્યયદ્રાજાનઁ સુક્રતો દિવઃ ।
૪ ૨ ૨ ૦૩ ૦૩c  સુપર્ણો અવ્યથી ભરત્ ॥ ૮૩૮
૪ ૨ ૨ ૦૩ ૦૪a  અધા હિન્વાન ઇન્દ્રિયં જ્યાયો મહિત્વમાનશે ।
૪ ૨ ૨ ૦૩ ૦૪c  અભિષ્ટિકૃદ્વિચર્ષણિઃ ॥ ૮૩૯
૪ ૨ ૨ ૦૩ ૦૫a  વિશ્વસ્મા ઇત્સ્વર્દૃશે સાધારણઁ રજસ્તુરમ્ ।
૪ ૨ ૨ ૦૩ ૦૫c  ગોપામૃતસ્ય વિર્ભરત્ ॥ ૮૪૦

૪ ૨ ૨ ૦૪ ૦૧a  ઇષે પવસ્વ ધારયા મૃજ્યમાનો મનીષિભિઃ ।
૪ ૨ ૨ ૦૪ ૦૧c  ઇન્દો રુચાભિ ગા ઇહિ ॥ ૮૪૧
૪ ૨ ૨ ૦૪ ૦૨a  પુનાનો વરિવસ્કૃધ્યૂર્જં જનાય ગિર્વણઃ ।
૪ ૨ ૨ ૦૪ ૦૨c  હરે સૃજાન આશિરમ્ ॥ ૮૪૨
૪ ૨ ૨ ૦૪ ૦૩a  પુનાનો દેવવીતય ઇન્દ્રસ્ય યાહિ નિષ્કૃતમ્ ।
૪ ૨ ૨ ૦૪ ૦૩c  દ્યુતાનો વાજિભિર્હિતઃ ॥ ૮૪૩

૪ ૨ ૨ ૦૫ ૦૧a  અગ્નિનાગ્નિઃ સમિધ્યતે કવિર્ગૃહપતિર્યુવા ।
૪ ૨ ૨ ૦૫ ૦૧c  હવ્યવાડ્જુહ્વાસ્યઃ ॥ ૮૪૪
૪ ૨ ૨ ૦૫ ૦૨a  યસ્ત્વામગ્ને હવિષ્પતિર્દૂતં દેવ સપર્યતિ ।
૪ ૨ ૨ ૦૫ ૦૨c  તસ્ય સ્મ પ્રાવિતા ભવ ॥ ૮૪૫
૪ ૨ ૨ ૦૫ ૦૩a  યો અગ્નિં દેવવીતયે હવિષ્માઁ આવિવાસતિ ।
૪ ૨ ૨ ૦૫ ૦૩c  તસ્મૈ પાવક મૃડય ॥ ૮૪૬

૪ ૨ ૨ ૦૬ ૦૧a  મિત્રઁ હુવે પૂતદક્ષં વરુણં ચ રિશાદસમ્ ।
૪ ૨ ૨ ૦૬ ૦૧c  ધિયં ઘૃતાચીઁ સાધન્તા ॥ ૮૪૭
૪ ૨ ૨ ૦૬ ૦૨a  ઋતેન મિત્રાવરુણાવૃતાવૃધાવૃતસ્પૃશા ।
૪ ૨ ૨ ૦૬ ૦૨c  ક્રતું બૃહન્તમાશાથે ॥ ૮૪૮
૪ ૨ ૨ ૦૬ ૦3a  કવી નો મિત્રાવરુણા તુવિજાતા ઉરુક્ષયા ।
૪ ૨ ૨ ૦૬ ૦3c  દક્ષં દધાતે અપસમ્ ॥ ૮૪૯

૪ ૨ ૨ ૦૭ ૦૧a  ઇન્દ્રેણ સઁ હિ દૃક્ષસે સઞ્જગ્માનો અબિભ્યુષા ।
૪ ૨ ૨ ૦૭ ૦૧c  મન્દૂ સમાનવર્ચ્ચસા ॥ ૮૫૦
૪ ૨ ૨ ૦૭ ૦૨a  આદહ સ્વધામનુ પુનર્ગર્ભત્વમેરિરે ।
૪ ૨ ૨ ૦૭ ૦૨c  દધાના નામ યજ્ઞિયમ્ ॥ ૮૫૧
૪ ૨ ૨ ૦૭ ૦3a  વીડુ ચિદારુજત્નુભિર્ગુહા ચિદિન્દ્ર વહ્નિભિઃ ।
૪ ૨ ૨ ૦૭ ૦3c  અવિન્દ ઉસ્રિયા અનુ ॥ ૮૫૨

૪ ૨ ૨ ૦૮ ૦૧a  તા હુવે યયોરિદં પપ્ને વિશ્વં પુરા કૃતમ્ ।
૪ ૨ ૨ ૦૮ ૦૧c  ઇન્દ્રાગ્ની ન મર્ધતઃ ॥ ૮૫૩
૪ ૨ ૨ ૦૮ ૦૨a  ઉગ્રા વિઘનિના મૃધ ઇન્દ્રાગ્ની હવામહે ।
૪ ૨ ૨ ૦૮ ૦૨c  તા નો મૃડાત ઈદૃશે ॥ ૮૫૪
૪ ૨ ૨ ૦૮ ૦3a  હથો વૃત્રાણ્યાર્યા હથો દાસાનિ સત્પતી ।
૪ ૨ ૨ ૦૮ ૦3c  હથો વિશ્વા અપ દ્વિષઃ ॥ ૮૫૫

૪ ૨ ૨ ૦૯ ૦૧a  અભિ સોમાસ આયવઃ પવન્તે મદ્યં મદમ્ ।
૪ ૨ ૨ ૦૯ ૦૧c  સમુદ્રસ્યાધિ વિષ્ટપે મનીષિણો મત્સરાસો મદચ્યુતઃ ॥ ૮૫૬
૪ ૨ ૨ ૦૯ ૦૨a  તરત્સમુદ્રં પવમાન ઊર્મિણા રાજા દેવ ઋતં બૃહત્ ।
૪ ૨ ૨ ૦૯ ૦૨c  અર્ષા મિત્રસ્ય વરુણસ્ય ધર્મણા પ્ર હિન્વાન ઋતં બૃહત્ ॥ ૮૫૭
૪ ૨ ૨ ૦૯ ૦3a  નૃભિર્યેમાણો હર્યતો વિચક્ષણો રાજા દેવઃ સમુદ્ર્યઃ ॥ ૮૫૮

૪ ૨ ૨ ૧૦ ૦૧a  તિસ્રો વાચ ઈરયતિ પ્ર વહ્નિરૃતસ્ય ધીતિં બ્રહ્મણો મનીષામ્ ।
૪ ૨ ૨ ૧૦ ૦૧c  ગાવો યન્તિ ગોપતિં પૃચ્છમાનાઃ સોમં યન્તિ મતયો વાવશાનાઃ ॥ ૮૫૯
૪ ૨ ૨ ૧૦ ૦૨a  સોમં ગાવો ધેનવો વાવશાનાઃ સોમં વિપ્રા મતિભિઃ પૃચ્છમાનાઃ ।
૪ ૨ ૨ ૧૦ ૦૨c  સોમઃ સુત ઋચ્યતે પૂયમાનઃ સોમે અર્કાસ્ત્રિષ્ટુભઃ સં નવન્તે ॥ ૮૬૦
૪ ૨ ૨ ૧૦ ૦3a  એવા નઃ સોમ પરિષિચ્યમાન આ પવસ્વ પૂયમાનઃ સ્વસ્તિ ।
૪ ૨ ૨ ૧૦ ૦3c  ઇન્દ્રમા વિશ બૃહતા મદેન વર્ધયા વાચં જનયા પુરન્ધિમ્ ॥ ૮૬૧

૪ ૨ ૨ ૧૧ ૦૧a  યદ્દ્યાવ ઇન્દ્ર તે શતઁશતં ભૂમીરુત સ્યુઃ ।

૪ ૨ ૨ ૧૧ ૦૧c ન ત્વા વજ્રિન્ત્સહસ્રં સૂર્યા અનુ ન જાતમષ્ટ રોદસી ॥ ૮૬૨
૪ ૨ ૨ ૧૧ ૦૨a આ પપ્રાથ મહિના વૃષ્ણ્યા વૃષન્વિશ્વા શવિષ્ઠ શવસા ।
૪ ૨ ૨ ૧૧ ૦૨c અસ્માઁ અવ મઘવન્ગોમતિ વ્રજે વજ્રિઞ્ચિત્રાભિરૂતિભિઃ ॥ ૮૬૩

૪ ૨ ૨ ૧૨ ૦૧a વયં ઘ ત્વા સુતાવન્ત આપો ન વૃક્તબર્હિષઃ ।
૪ ૨ ૨ ૧૨ ૦૧c પવિત્રસ્ય પ્રસ્રવણેષુ વૃત્રહન્પરિ સ્તોતાર આસતે ॥ ૮૬૪
૪ ૨ ૨ ૧૨ ૦૨a સ્વરન્તિ ત્વા સુતે નરો વસો નિરેક ઉક્થિનઃ ।
૪ ૨ ૨ ૧૨ ૦૨c કદા સુતં તૃષાણ ઓક આ ગમ ઇન્દ્ર સ્વબ્દીવ વઁસગઃ ॥ ૮૬૫
૪ ૨ ૨ ૧૨ ૦૩a કણ્વેભિર્ધૃષ્ણવા ધૃષદ્વાજં દર્ષિ સહસ્રિણમ્ ।
૪ ૨ ૨ ૧૨ ૦૩c પિશઙ્ગરૂપં મઘવન્વિચર્ષણે મક્ષૂ ગોમન્તમીમહે ॥ ૮૬૬

૪ ૨ ૨ ૧૩ ૦૧a તરણિરિત્સિષાસતિ વાજં પુરન્ધ્યા યુજા ।
૪ ૨ ૨ ૧૩ ૦૧c આ વ ઇન્દ્રં પુરુહૂતં નમે ગિરા નેમિં તષ્ટેવ સુદ્રુવમ્ ॥ ૮૬૭
૪ ૨ ૨ ૧૩ ૦૨a ન દુષ્ટુતિર્દ્રવિણોદેષુ શસ્યતે ન સ્રેધન્તઁ રયિર્નશત્ ।
૪ ૨ ૨ ૧૩ ૦૨c સુશક્તિરિન્મઘવં તુભ્યં માવતે દેષ્ણં યત્પાર્યે દિવિ ॥ ૮૬૮

૪ ૨ ૨ ૧૪ ૦૧a તિસ્રો વાચ ઉદીરતે ગાવો મિમન્તિ ધેનવઃ ।
૪ ૨ ૨ ૧૪ ૦૧c હરિરેતિ કનિક્રદત્ ॥ ૮૬૯
૪ ૨ ૨ ૧૪ ૦૨a અભિ બ્રહ્મીરનૂષત યહ્વીરૃતસ્ય માતરઃ ।
૪ ૨ ૨ ૧૪ ૦૨c મર્જયન્તીર્દિવઃ શિશુમ્ ॥ ૮૭૦
૪ ૨ ૨ ૧૪ ૦૩a રાયઃ સમુદ્રાઁશ્ચતુરોઽસ્મભ્યઁ સોમ વિશ્વતઃ ।
૪ ૨ ૨ ૧૪ ૦૩c આ પવસ્વ સહસ્રિણઃ ॥ ૮૭૧

૪ ૨ ૨ ૧૫ ૦૧a સુતાસો મધુમત્તમાઃ સોમા ઇન્દ્રાય મન્દિનઃ ।
૪ ૨ ૨ ૧૫ ૦૧c પવિત્રવન્તો અક્ષરં દેવાન્ગચ્છન્તુ વો મદાઃ ॥ ૮૭૨
૪ ૨ ૨ ૧૫ ૦૨a ઇન્દુરિન્દ્રાય પવત ઇતિ દેવાસો અબ્રુવન્ ।
૪ ૨ ૨ ૧૫ ૦૨c વાચસ્પતિર્મખસ્યતે વિશ્વસ્યેશાન ઓજસાઃ ॥ ૮૭૩
૪ ૨ ૨ ૧૫ ૦૩a સહસ્રધારઃ પવતે સમુદ્રો વાચમીઙ્ખયઃ ।
૪ ૨ ૨ ૧૫ ૦૩c સોમસ્પતી રયીણાઁ સખેન્દ્રસ્ય દિવેદિવે ॥ ૮૭૪

૪ ૨ ૨ ૧૬ ૦૧a પવિત્રં તે વિતતં બ્રહ્મણસ્પતે પ્રભુર્ગાત્રાણિ પર્યેષિ વિશ્વતઃ ।
૪ ૨ ૨ ૧૬ ૦૧c અતપ્તતનૂર્ન તદામો અશ્નુતે શ઼ૃતાસ ઇદ્વહન્તઃ સં તદાશત ॥ ૮૭૫
૪ ૨ ૨ ૧૬ ૦૨a તપોષ્પવિત્રં વિતતં દિવસ્પદેઽર્ચન્તો અસ્ય તન્તવો વ્યસ્થિરન્ ।
૪ ૨ ૨ ૧૬ ૦૨c અવન્ત્યસ્ય પવીતારમાશવો દિવઃ પૃષ્ઠમધિ રોહન્તિ તેજસા ॥ ૮૭૬
૪ ૨ ૨ ૧૬ ૦૩a અરૂરુચદુષસઃ પૃશ્નિરગ્રિય ઉક્ષા મિમેતિ ભુવનેષુ વાજયુઃ ।

૪ ૨ ૨ ૧૬ ૦3c માયાવિનો મમિરે અસ્ય માયયા નૃચક્ષસઃ પિતરો ગર્ભમા દધુઃ ॥ ૮૭૭

૪ ૨ ૨ ૧૭ ૦૧a પ્ર મઁહિષ્ઠાય ગાયત ઋતાવ્ને બૃહતે શુક્રશોચિષે ।
૪ ૨ ૨ ૧૭ ૦૧c ઉપસ્તુતાસો અગ્નયે ॥ ૮૭૮
૪ ૨ ૨ ૧૭ ૦૨a આ વઁસતે મઘવા વીરવદ્યશઃ સમિદ્ધો દ્યુમ્ન્યાહુતઃ ।
૪ ૨ ૨ ૧૭ ૦૨c કુવિન્નો અસ્ય સુમતિર્ભવીયસ્યચ્છા વાજેભિરાગમત્ ॥ ૮૭૯

૪ ૨ ૨ ૧૮ ૦૧a તં તે મદં ગૃણીમસિ વૃષણં પૃક્ષુ સાસહિમ્ ।
૪ ૨ ૨ ૧૮ ૦૧c ઉ લોકકૃત્નુમદ્રિવો હરિશ્રિયમ્ ॥ ૮૮૦
૪ ૨ ૨ ૧૮ ૦૨a યેન જ્યોતીઁષ્યાયવે મનવે ચ વિવેદિથ ।
૪ ૨ ૨ ૧૮ ૦૨c મન્દાનો અસ્ય બર્હિષો વિ રાજસિ ॥ ૮૮૧
૪ ૨ ૨ ૧૮ ૦3a તદદ્યા ચિત્ત ઉક્થિનોऽનુ ષ્ટુવન્તિ પૂર્વથા ।
૪ ૨ ૨ ૧૮ ૦3c વૃષપત્નીરપો જયા દિવેદિવે ॥ ૮૮૨

૪ ૨ ૨ ૧૯ ૦૧a શ્રુધી હવં તિરશ્ચ્યા ઇન્દ્ર યસ્ત્વા સપર્યતિ ।
૪ ૨ ૨ ૧૯ ૦૧c સુવીર્યસ્ય ગોમતો રાયસ્પૂર્ધિ મહાઁ અસિ ॥ ૮૮૩
૪ ૨ ૨ ૧૯ ૦૨a યસ્ત ઇન્દ્ર નવીયસીં ગિરં મન્દ્રામજીજનત્ ।
૪ ૨ ૨ ૧૯ ૦૨c ચિકિત્વિન્મનસં ધિયં પ્રત્નામૃતસ્ય પિપ્યુષીમ્ ॥ ૮૮૪
૪ ૨ ૨ ૧૯ ૦3a તમુ ષ્ટવામ યં ગિર ઇન્દ્રમુક્થાનિ વાવૃધુઃ ।
૪ ૨ ૨ ૧૯ ૦3c પુરૂણ્યસ્ય નૌઁસ્યા સિષાસન્તો વનામહે ॥ ૮૮૫

તૃતીય પ્રપાઠકઃ । પ્રથમોऽર્ધઃ
૪ 3 ૧ ૦૧ ૦૧a પ્ર ત આશ્વિનીઃ પવમાન ધેનવો દિવ્યા અસૃગ્રન્પયસા ધરીમણિ ।
૪ 3 ૧ ૦૧ ૦૧c પ્રાન્તરિક્ષાત્સ્થાવિરીસ્તે અસૃક્ષત યે ત્વા મૃજન્ત્યૃષિષાણ વેધસઃ ॥ ૮૮૬
૪ 3 ૧ ૦૧ ૦૨a ઉભયતઃ પવમાનસ્ય રશ્મયો ધ્રુવસ્ય સતઃ પરિ યન્તિ કેતવઃ ।
૪ 3 ૧ ૦૧ ૦૨c યદી પવિત્રે અધિ મૃજ્યતે હરિઃ સત્તા નિ યોનૌ કલશેષુ સીદતિ ॥ ૮૮૭
૪ 3 ૧ ૦૧ ૦3a વિશ્વા ધામાનિ વિશ્વચક્ષ ઋભ્વસઃ પ્રભોષ્ટે સતઃ પરિ યન્તિ કેતવઃ ।
૪ 3 ૧ ૦૧ ૦3c વ્યાનશી પવસે સોમ ધર્મણા પતિર્વિશ્વસ્ય ભુવનસ્ય રાજસિ ॥ ૮૮૮

૪ 3 ૧ ૦૨ ૦૧a પવમાનો અજીજનદ્દિવશ્ચિત્રં ન તન્યતુમ્ ।
૪ 3 ૧ ૦૨ ૦૧c જ્યોતિર્વૈશ્વાનરં બૃહત્ ॥ ૮૮૯
૪ 3 ૧ ૦૨ ૦૨a પવમાન રસસ્તવ મદો રાજન્નદુચ્છુનઃ ।
૪ 3 ૧ ૦૨ ૦૨c વિ વારમવ્યમર્ષતિ ॥ ૮૯૦
૪ 3 ૧ ૦૨ ૦3a પવમાનસ્ય તે રસો દક્ષો વિ રાજતિ દ્યુમાન્ ।
૪ 3 ૧ ૦૨ ૦3c જ્યોતિર્વિશ્વઁ સ્વર્દૃશે ॥ ૮૯૧

૪ ૩ ૧ ૦૩ ૦૧a  પ્ર યદ્ગાવો ન ભૂર્ણયસ્ત્વેષા અયાસો અક્રમુઃ ।
૪ ૩ ૧ ૦૩ ૦૧c  ઘ્નન્તઃ કૃષ્ણામપ ત્વચમ્ ॥ ૮૯૨
૪ ૩ ૧ ૦૩ ૦૨a  સુવિતસ્ય મનામહેઽતિ સેતું દુરાવ્યમ્ ।
૪ ૩ ૧ ૦૩ ૦૨c  સાહ્યામ દસ્યુમવ્રતમ્ ॥ ૮૯૩
૪ ૩ ૧ ૦૩ ૦૩a  શ ૃણ્વે વૃષ્ટેરિવ સ્વનઃ પવમાનસ્ય શુષ્મિણઃ ।
૪ ૩ ૧ ૦૩ ૦૩c  ચરન્તિ વિદ્યુતો દિવિ ॥ ૮૯૪
૪ ૩ ૧ ૦૩ ૦૪a  આ પવસ્વ મહીમિષં ગોમદિન્દો હિરણ્યવત્ ।
૪ ૩ ૧ ૦૩ ૦૪c  અશ્વવત્સોમ વીરવત્ ॥ ૮૯૫
૪ ૩ ૧ ૦૩ ૦૫a  પવસ્વ વિશ્વચર્ષણ આ મહી રોદસી પૃણ ।
૪ ૩ ૧ ૦૩ ૦૫c  ઉષાઃ સૂર્યો ન રશ્મિભિઃ ॥ ૮૯૬
૪ ૩ ૧ ૦૩ ૦૬a  પરિ નઃ શર્મયન્ત્યા ધારયા સોમ વિશ્વતઃ ।
૪ ૩ ૧ ૦૩ ૦૬c  સરા રસેવ વિષ્ટપમ્ ॥ ૮૯૭

૪ ૩ ૧ ૦૪ ૦૧a  આશુરર્ષ બૃહન્મતે પરિ પ્રિયેણ ધામ્ના ।
૪ ૩ ૧ ૦૪ ૦૧c  યત્ર દેવા ઇતિ બ્રુવન્ ॥ ૮૯૮
૪ ૩ ૧ ૦૪ ૦૨a  પરિષ્કૃણ્વન્નનિષ્કૃતં જનાય યાતયન્નિષઃ ।
૪ ૩ ૧ ૦૪ ૦૨c  વૃષ્ટિં દિવઃ પરિ સ્રવ ॥ ૮૯૯
૪ ૩ ૧ ૦૪ ૦૩a  અયઁ સ યો દિવસ્પરિ રઘુયામા પવિત્ર આ ।
૪ ૩ ૧ ૦૪ ૦૩c  સિન્ધોરૂર્મા વ્યક્ષરત્ ॥ ૯૦૦
૪ ૩ ૧ ૦૪ ૦૪a  સુત એતિ પવિત્ર આ ત્વિષિં દધાન ઓજસા ।
૪ ૩ ૧ ૦૪ ૦૪c  વિચક્ષાણો વિરોચયન્ ॥ ૯૦૧
૪ ૩ ૧ ૦૪ ૦૫a  આવિવાસન્પરાવતો અથો અર્વાવતઃ સુતઃ ।
૪ ૩ ૧ ૦૪ ૦૫c  ઇન્દ્રાય સિચ્યતે મધુ ॥ ૯૦૨
૪ ૩ ૧ ૦૪ ૦૭a  સમીચીના અનૂષત હરિઁ હિન્વન્ત્યદ્રિભિઃ ।
૪ ૩ ૧ ૦૪ ૦૭c  ઇન્દુમિન્દ્રાય પીતયે ॥ ૯૦૩

૪ ૩ ૧ ૦૫ ૦૧a  હિન્વન્તિ સૂરમુસ્રયઃ સ્વસારો જામયસ્પતિમ્ ।
૪ ૩ ૧ ૦૫ ૦૧c  મહામિન્દું મહીયુવઃ ॥ ૯૦૪
૪ ૩ ૧ ૦૫ ૦૨a  પવમાન રુચારુચા દેવો દેવેભ્યઃ સુતઃ ।
૪ ૩ ૧ ૦૫ ૦૨c  વિશ્વા વસૂન્યા વિશ ॥ ૯૦૫
૪ ૩ ૧ ૦૫ ૦૩a  આ પવમાન સુષ્ટુતિં વૃષ્ટિં દેવેભ્યો દુવઃ ।
૪ ૩ ૧ ૦૫ ૦૩c  ઇષે પવસ્વ સંયતમ્ ॥ ૯૦૬

૪ ૩ ૧ ૦૬ ૦૧a  જનસ્ય ગોપા અજનિષ્ટ જાગૃવિરગ્નિઃ સુદક્ષઃ સુવિતાય નવ્યસે ।

૪ ૩ ૧ ૦૬ ૦૧c ઘૃતપ્રતીકો બૃહતા દિવિસ્પૃષા દ્યુમદ્વિ ભાતિ ભરતેભ્યઃ શુચિઃ ॥ ૯૦૭
૪ ૩ ૧ ૦૬ ૦૨a ત્વામગ્ને અઙ્ગિરસો ગુહા હિતમન્વવિન્દચ્છિશ્રિયાણં વનેવને ।
૪ ૩ ૧ ૦૬ ૦૨c સ જાયસે મથ્યમાનઃ સહો મહત્વામાહુઃ સહસસ્પુત્રમઙ્ગિરઃ ॥ ૯૦૮
૪ ૩ ૧ ૦૬ ૦૩a યજ્ઞસ્ય કેતું પ્રથમં પુરોહિતમગ્નિં નરસ્ત્રિષધસ્થે સમિન્ધતે ।
૪ ૩ ૧ ૦૬ ૦૩c ઇન્દ્રેણ દેવૈઃ સરથँ સ બર્હિષિ સીદન્નિ હોતા યજથાય સુક્રતુઃ ॥ ૯૦૯

૪ ૩ ૧ ૦૭ ૦૧a અયં વાં મિત્રાવરુણા સુતઃ સોમ ઋતાવૃધા ।
૪ ૩ ૧ ૦૭ ૦૧c મમેદિહ શ્રુતँ હવમ્ ॥ ૯૧૦
૪ ૩ ૧ ૦૭ ૦૨a રાજાનાવનભિદ્રુહા ધ્રુવે સદસ્યુત્તમે ।
૪ ૩ ૧ ૦૭ ૦૨c સહસ્રસ્થૂણ આશાતે ॥ ૯૧૧
૪ ૩ ૧ ૦૭ ૦૩a તા સમ્રાજા ઘૃતાસુતી આદિત્યા દાનુનસ્પતી ।
૪ ૩ ૧ ૦૭ ૦૩c સચેતે અનવહ્વરમ્ ॥ ૯૧૨

૪ ૩ ૧ ૦૮ ૦૧a ઇન્દ્રો દધીચો અસ્થભિર્વૃત્રાણ્યપ્રતિષ્કુતઃ ।
૪ ૩ ૧ ૦૮ ૦૧c જઘાન નવતીર્નવ ॥ ૯૧૩
૪ ૩ ૧ ૦૮ ૦૨a ઇચ્છન્નશ્વસ્ય યચ્છિરઃ પર્વતેષ્વપશ્રિતમ્ ।
૪ ૩ ૧ ૦૮ ૦૨c તદ્વિદચ્છર્યણાવતિ ॥ ૯૧૪
૪ ૩ ૧ ૦૮ ૦૩a અત્રાહ ગોરમન્વત નામ ત્વષ્ટુરપીચ્યમ્ ।
૪ ૩ ૧ ૦૮ ૦૩c ઇત્થા ચન્દ્રમસો ગૃહે ॥ ૯૧૫

૪ ૩ ૧ ૦૯ ૦૧a ઇયં વામસ્ય મન્મન ઇન્દ્રાગ્ની પૂર્વ્યસ્તુતિઃ ।
૪ ૩ ૧ ૦૯ ૦૧c અભ્રાદ્વૃષ્ટિરિવાજનિ ॥ ૯૧૬
૪ ૩ ૧ ૦૯ ૦૨a શ્ૃણુતં જરિતુર્હવમિન્દ્રાગ્ની વનતં ગિરઃ ।
૪ ૩ ૧ ૦૯ ૦૨c ઈશાના પિપ્યતં ધિયઃ ॥ ૯૧૭
૪ ૩ ૧ ૦૯ ૦૩a મા પાપત્વાય નો નરેન્દ્રાગ્ની માભિશસ્તયે ।
૪ ૩ ૧ ૦૯ ૦૩c મા નો રીરધતં નિદે ॥ ૯૧૮

૪ ૩ ૧ ૧૦ ૦૧a પવસ્વ દક્ષસાધનો દેવેભ્યઃ પીતયે હરે ।
૪ ૩ ૧ ૧૦ ૦૧c મરુદ્ભ્યો વાયવે મદઃ ॥ ૯૧૯
૪ ૩ ૧ ૧૦ ૦૨a સં દેવૈઃ શોભતે વૃષા કવિર્યોનાવધિ પ્રિયઃ ।
૪ ૩ ૧ ૧૦ ૦૨c પવમાનો અદાભ્યઃ ॥ ૯૨૦
૪ ૩ ૧ ૧૦ ૦૩a પવમાન ધિયા હિતોऽભિ યોનિં કનિક્રદત્ ।
૪ ૩ ૧ ૧૦ ૦૩c ધર્મણા વાયુમારુહઃ ॥ ૯૨૧

૪ ૩ ૧ ૧૧ ૦૧a તવાहँ સોમ રારણ સખ્ય ઇન્દો દિવેદિવે ।

૪ ૩ ૧ ૧૧ ૦૧c  પુરૂણિ બભ્રો નિ ચરન્તિ મામવ પરિધીઁ રતિ તાઁઇહિ ॥ ૯૨૨
૪ ૩ ૧ ૧૧ ૦૨a  તવાહં નક્તમુત સોમ તે દિવા દુહાનો બભ્ર ઊધનિ ।
૪ ૩ ૧ ૧૧ ૦૨c  ઘૃણા તપન્તમતિ સૂર્યં પરઃ શકુના ઇવ પપ્તિમ ॥ ૯૨૩

૪ ૩ ૧ ૧૨ ૦૧a  પુનાનો અક્રમીદભિ વિશ્વા મૃધો વિચર્ષણિઃ ।
૪ ૩ ૧ ૧૨ ૦૧c  શુમ્ભન્તિ વિપ્રં ધીતિભિઃ ॥ ૯૨૪
૪ ૩ ૧ ૧૨ ૦૨a  આ યોનિમરુણો રુહદ્ગમદિન્દ્રં વૃષા સુતમ્ ।
૪ ૩ ૧ ૧૨ ૦૨c  ધ્રુવે સદસિ સીદતુ ॥ ૯૨૫
૪ ૩ ૧ ૧૨ ૦૩a  નૂ નો રયિં મહામિન્દોઽસ્મભ્યઁ સોમ વિશ્વતઃ ।
૪ ૩ ૧ ૧૨ ૦૩c  આ પવસ્વ સહસ્રિણમ્ ॥ ૯૨૬

૪ ૩ ૧ ૧૩ ૦૧a  પિબા સોમમિન્દ્ર મદન્તુ ત્વા યં તે સુષાવ હર્યશ્વાદ્રિઃ ।
૪ ૩ ૧ ૧૩ ૦૧c  સોતુર્બાહુભ્યાઁ સુયતો નાર્વા ॥ ૯૨૭
૪ ૩ ૧ ૧૩ ૦૨a  યસ્તે મદો યુજ્યશ્ચારુરસ્તિ યેન વૃત્રાણિ હર્યશ્વ હઁસિ ।
૪ ૩ ૧ ૧૩ ૦૨c  સ ત્વામિન્દ્ર પ્રભૂવસો મમત્તુ ॥ ૯૨૮
૪ ૩ ૧ ૧૩ ૦૩a  બોધા સુ મે મઘવન્વાચમેમાં યાં તે વસિષ્ઠો અર્ચતિ પ્રશસ્તિમ્ ।
૪ ૩ ૧ ૧૩ ૦૩c  ઇમા બ્રહ્મ સધમાદે જુષસ્વ ॥ ૯૨૯

૪ ૩ ૧ ૧૪ ૦૧a  વિશ્વાઃ પૃતના અભિભૂતરં નરઃ સજૂસ્તતક્ષુરિન્દ્રં જજનુશ્ચ રાજસે ।
૪ ૩ ૧ ૧૪ ૦૧c  ક્રત્વે વરે સ્થેમન્યામુરીમુતોગ્રમોજિષ્ઠં તરસં તરસ્વિનમ્ ॥ ૯૩૦
૪ ૩ ૧ ૧૪ ૦૨a  નેમિં નમન્તિ ચક્ષસા મેષં વિપ્રા અભિસ્વરે ।
૪ ૩ ૧ ૧૪ ૦૨c  સુદીતયો વો અદ્રુહોઽપિ કર્ણે તરસ્વિનઃ સમૃક્વભિઃ ॥ ૯૩૧
૪ ૩ ૧ ૧૪ ૦૩a  સમુ રેભસો અસ્વરન્નિન્દ્રઁ સોમસ્ય પીતયે ।
૪ ૩ ૧ ૧૪ ૦૩c  સ્વઃપતિર્યદી વૃધે ધૃતવ્રતો હ્યોજસા સમૂતિભિઃ ॥ ૯૩૨

૪ ૩ ૧ ૧૫ ૦૧a  યો રાજા ચર્ષણીનાં યાતા રથેભિરધ્રિગુઃ ।
૪ ૩ ૧ ૧૫ ૦૧c  વિશ્વાસાં તરુતા પૃતનાનાં જ્યેષ્ઠં યો વૃત્રહા ગૃણે ॥ ૯૩૩
૪ ૩ ૧ ૧૫ ૦૨a  ઇન્દ્રં તઁ શુમ્ભ્ય પુરુહન્મન્નવસે યસ્ય દ્વિતા વિધર્ત્તરિ ।
૪ ૩ ૧ ૧૫ ૦૨c  હસ્તેન વજ્રઃ પ્રતિ ધાયિ દર્શતો મહાં દેવો ન સૂર્યઃ ॥ ૯૩૪

૪ ૩ ૧ ૧૬ ૦૧a  પરિ પ્રિયા દિવઃ કવિર્વયાઁસિ નપ્ત્યોર્હિતઃ ।
૪ ૩ ૧ ૧૬ ૦૧c  સ્વાનૈર્યાતિ કવિક્રતુઃ ॥ ૯૩૫
૪ ૩ ૧ ૧૬ ૦૨a  સ સૂનુર્માતરા શુચિર્જાતો જાતે અરોચયત્ ।
૪ ૩ ૧ ૧૬ ૦૨c  મહાન્મહી ઋતાવૃધા ॥ ૯૩૬
૪ ૩ ૧ ૧૬ ૦૩a  પ્રપ્ર ક્ષયાય પન્યસે જનાય જુષ્ટો અદ્રુહઃ ।

૪ ૩ ૧ ૧૬ 03c વીત્યર્ષ પનિષ્ટયે ॥ ૯૩૭

૪ ૩ ૧ ૧૭ ૦1a ત્વઁ હ્યાઉઁઙ્ગ દૈવ્યા પવમાન જનિમાનિ દ્યુમત્તમઃ ।
૪ ૩ ૧ ૧૭ ૦1c અમૃતત્વાય ઘોષયન્ ॥ ૯૩૮
૪ ૩ ૧ ૧૭ ૦2a યેના નવગ્વો દધ્યઙ્ઙપોર્ણુતે યેન વિપ્રાસ આપિરે ।
૪ ૩ ૧ ૧૭ ૦2c દેવાનાઁ સુમ્ને અમૃતસ્ય ચારુણો યેન શ્રવાઁસ્યાશત ॥ ૯૩૯

૪ ૩ ૧ ૧૮ ૦1a સોમઃ પુનાન ઊર્મિણાવ્યં વારં વિ ધાવતિ ।
૪ ૩ ૧ ૧૮ ૦1c અગ્રે વાચઃ પવમાનઃ કનિક્રદત્ ॥ ૯૪૦
૪ ૩ ૧ ૧૮ ૦2a ધીભિર્મૃજન્તિ વાજિનં વને ક્રીડન્તમત્યવિમ્ ।
૪ ૩ ૧ ૧૮ ૦2c અભિ ત્રિપૃષ્ઠં મતયઃ સમસ્વરન્ ॥ ૯૪૧
૪ ૩ ૧ ૧૮ 03a અસર્જિ કલશાઁ અભિ મીઢ્વાન્ત્સપ્તિર્ન વાજયુઃ ।
૪ ૩ ૧ ૧૮ 03c પુનાનો વાચં જનયન્નસિષ્યદત્ ॥ ૯૪૨

૪ ૩ ૧ ૧૯ ૦1a સોમઃ પવતે જનિતા મતીનાં જનિતા દિવો જનિતા પૃથિવ્યાઃ ।
૪ ૩ ૧ ૧૯ ૦1c જનિતાગ્નેર્જનિતા સૂર્યસ્ય જનિતેન્દ્રસ્ય જનિતોત વિષ્ણોઃ ॥ ૯૪૩
૪ ૩ ૧ ૧૯ ૦2a બ્રહ્મા દેવાનાં પદવીઃ કવીનાં ઋષિર્વિપ્રાણાં મહિષોમૃગાણામ્ ।
૪ ૩ ૧ ૧૯ ૦2c શ્યેનો ગૃધ્રાણાઁ સ્વધિતિર્વનાનાઁ સોમઃ પવિત્રમત્યેતિ રેભન્ ॥ ૯૪૪
૪ ૩ ૧ ૧૯ 03a પ્રાવીવિપદ્વાચ ઊર્મિં ન સિન્ધુર્ગિર સ્તોમાન્પવમાનો મનીષાઃ ।
૪ ૩ ૧ ૧૯ 03c અન્તઃ પશ્યન્વૃજનેમાવરાણ્યા તિષ્ઠતિ વૃષભો ગોષુ જાનન્ ॥ ૯૪૫

૪ ૩ ૧ ૨૦ ૦1a અગ્નિં વો વૃધન્તમધ્વરાણાં પુરૂતમમ્ ।
૪ ૩ ૧ ૨૦ ૦1c અચ્છા નપ્ત્રે સહસ્વતે ॥ ૯૪૬
૪ ૩ ૧ ૨૦ ૦2a અયં યથા ન આભુવત્ત્વષ્ટા રૂપેવ તક્ષ્યા ।
૪ ૩ ૧ ૨૦ ૦2c અસ્ય ક્રત્વા યશસ્વતઃ ॥ ૯૪૭
૪ ૩ ૧ ૨૦ 03a અયં વિશ્વા અભિ શ્રિયોઽગ્નિર્દેવેષુ પત્યતે ।
૪ ૩ ૧ ૨૦ 03c આ વાજૈરુપ નો ગમત્ ॥ ૯૪૮

૪ ૩ ૧ ૨૧ ૦1a ઇમમિન્દ્ર સુતં પિબ જ્યેષ્ઠમમર્ત્યં મદમ્ ।
૪ ૩ ૧ ૨૧ ૦1c શુક્રસ્ય ત્વાભ્યક્ષરન્ધારા ઋતસ્ય સાદને ॥ ૯૪૯
૪ ૩ ૧ ૨૧ ૦2a ન કિષ્ટ્વદ્રથીતરો હરી યદિન્દ્ર યચ્છસે ।
૪ ૩ ૧ ૨૧ ૦2c ન કિષ્ટ્વાનુ મજ્મના ન કિઃ સ્વશ્વ આનશે ॥ ૯૫૦
૪ ૩ ૧ ૨૧ 03a ઇન્દ્રાય નૂનમર્ચતોક્થાનિ ચ બ્રવીતન ।
૪ ૩ ૧ ૨૧ 03c સુતા અમત્સુરિન્દવો જ્યેષ્ઠં નમસ્યતા સહઃ ॥ ૯૫૧

૪ ૩ ૧ ૨૨ ૦1a ઇન્દ્ર જુષસ્વ પ્ર વહા યાહિ શૂર હરિહ ।

૪ ૩ ૧ ૨૨ ૦૧c પિબા સુતસ્ય મતિર્ન મધોશ્ચકાનશ્ચારુર્મદાય ॥ ૯૫૨
૪ ૩ ૧ ૨૨ ૦૨a ઇન્દ્ર જઠરં નવ્યં ન પૃણસ્વ મધોર્દિવો ન ।
૪ ૩ ૧ ૨૨ ૦૨c અસ્ય સુતસ્ય સ્વાઉર્નોપ ત્વા મદાઃ સુવાચો અસ્થુઃ ॥ ૯૫૩
૪ ૩ ૧ ૨૨ ૦૩a ઇન્દ્રસ્તુરાષાણ્મિત્રો ન જઘાન વૃત્રં યતિર્ન ।
૪ ૩ ૧ ૨૨ ૦૩c બિભેદ વલં ભૃગુર્ન સસાહે શત્રૂન્મદે સોમસ્ય ॥ ૯૫૪

તૃતીય પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૩ ૨ ૦૧ ૦૧a ગોવિત્પવસ્વ વસુવિદ્ધિરણ્યવિદ્રેતોધા ઇન્દો ભુવનેષ્વર્પિતઃ ।
૪ ૩ ૨ ૦૧ ૦૧c ત્વઁ સુવીરો અસિ સોમ વિશ્વવિત્તં ત્વા નર ઉપ ગિરેમ આસતે ॥ ૯૫૫
૪ ૩ ૨ ૦૧ ૦૨a ત્વં નૃચક્ષા અસિ સોમ વિશ્વતઃ પવમાન વૃષભ તા વિ ધાવસિ ।
૪ ૩ ૨ ૦૧ ૦૨c સ નઃ પવસ્વ વસુમદ્ધિરણ્યવદ્વયઁ સ્યામ ભુવનેષુ જીવસે ॥ ૯૫૬
૪ ૩ ૨ ૦૧ ૦૩a ઈશાન ઇમા ભુવનાનિ ઈયસે યુજાન ઇન્દો હરિતઃ સુપર્ણ્યઃ ।
૪ ૩ ૨ ૦૧ ૦૩c તાસ્તે ક્ષરન્તુ મધુમદ્ઘૃતં પયસ્તવ વ્રતે સોમ તિષ્ઠન્તુ કૃષ્ટયઃ ॥ ૯૫૭

૪ ૩ ૨ ૦૨ ૦૧a પવમાનસ્ય વિશ્વવિત્પ્ર તે સર્ગા અસૃક્ષત ।
૪ ૩ ૨ ૦૨ ૦૧c સૂર્યસ્યેવ ન રશ્મયઃ ॥ ૯૫૮
૪ ૩ ૨ ૦૨ ૦૨a કેતું કૃણ્વં દિવસ્પરિ વિશ્વા રૂપાભ્યર્ષસિ ।
૪ ૩ ૨ ૦૨ ૦૨c સમુદ્રઃ સોમ પિન્વસે ॥ ૯૫૯
૪ ૩ ૨ ૦૨ ૦૩a જજ્ઞાનો વાચમિષ્યસિ પવમાન વિધર્મણિ ।
૪ ૩ ૨ ૦૨ ૦૩c ક્રન્દં દેવો ન સૂર્યઃ ॥ ૯૬૦

૪ ૩ ૨ ૦૩ ૦૧a પ્ર સોમાસો અધન્વિષુઃ પવમાનાસ ઇન્દવઃ ।
૪ ૩ ૨ ૦૩ ૦૧c શ્રીણાના અપ્સુ વૃઞ્જતે ॥ ૯૬૧
૪ ૩ ૨ ૦૩ ૦૨a અભિ ગાવો અધન્વિષુરાપો ન પ્રવતા યતીઃ ।
૪ ૩ ૨ ૦૩ ૦૨c પુનાના ઇન્દ્રમાશત ॥ ૯૬૨
૪ ૩ ૨ ૦૩ ૦૩a પ્ર પવમાન ધન્વસિ સોમેન્દ્રાય માદનઃ ।
૪ ૩ ૨ ૦૩ ૦૩c નૃભિર્યતો વિ નીયસે ॥ ૯૬૩
૪ ૩ ૨ ૦૩ ૦૪a ઇન્દો યદદ્રિભિઃ સુતઃ પવિત્રં પરિદીયસે ।
૪ ૩ ૨ ૦૩ ૦૪c અરમિન્દ્રસ્ય ધામ્ને ॥ ૯૬૪
૪ ૩ ૨ ૦૩ ૦૫a ત્વઁ સોમ નૃમાદનઃ પવસ્વ ચર્ષણીધૃતિઃ ।
૪ ૩ ૨ ૦૩ ૦૫c સસ્નિર્યો અનુમાદ્યઃ ॥ ૯૬૫
૪ ૩ ૨ ૦૩ ૦૬a પવસ્વ વૃત્રહન્તમ ઉક્થેભિરનુમાદ્યઃ ।
૪ ૩ ૨ ૦૩ ૦૬c શુચિઃ પાવકો અદ્ભુતઃ ॥ ૯૬૬
૪ ૩ ૨ ૦૩ ૦૭a શુચિઃ પાવક ઉચ્યતે સોમઃ સુતઃ સ મધુમાન્ ।

૪ ૩ ૨ ૦૩ ૦૭c દેવાવીરઘશઁસહા ॥ ૯૬૭

૪ ૩ ૨ ૦૪ ૦૧a પ્ર કવિર્દેવવીતયેઽવ્યા વારેભિરવ્યત ।
૪ ૩ ૨ ૦૪ ૦૧c સાહ્વાન્વિશ્વા અભિ સ્પૃધઃ ॥ ૯૬૮
૪ ૩ ૨ ૦૪ ૦૨a સ હિ ષ્મા જરિતૃભ્ય આ વાજં ગોમન્તમિન્વતિ ।
૪ ૩ ૨ ૦૪ ૦૨c પવમાનઃ સહસ્રિણમ્ ॥ ૯૬૯
૪ ૩ ૨ ૦૪ ૦૩a પરિ વિશ્વાનિ ચેતસા મૃજ્યસે પવસે મતી ।
૪ ૩ ૨ ૦૪ ૦૩c સ નઃ સોમ શ્રવો વિદઃ ॥ ૯૭૦
૪ ૩ ૨ ૦૪ ૦૪a અભ્યર્ષ બૃહદ્યશો મઘવદ્ભ્યો ધ્રુવઁ રયિમ્ ।
૪ ૩ ૨ ૦૪ ૦૪c ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૯૭૧
૪ ૩ ૨ ૦૪ ૦૫a ત્વઁ રાજેવ સુવ્રતો ગિરઃ સોમાવિવેશિથ ।
૪ ૩ ૨ ૦૪ ૦૫c પુનાનો વહ્ને અદ્ભુત ॥ ૯૭૨
૪ ૩ ૨ ૦૪ ૦૬a સ વહ્નિરપ્સુ દુષ્ટરો મૃજ્યમાનો ગભસ્ત્યોઃ ।
૪ ૩ ૨ ૦૪ ૦૬c સોમશ્ચમૂષુ સીદતિ ॥ ૯૭૩
૪ ૩ ૨ ૦૪ ૦૭a ક્રીડુર્મખો ન મઁહયુઃ પવિત્રઁ સોમ ગચ્છસિ ।
૪ ૩ ૨ ૦૪ ૦૭c દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૯૭૪

૪ ૩ ૨ ૦૫ ૦૧a યવંયવં નો અન્ધસા પુષ્ટંપુષ્ટં પરિ સ્રવ ।
૪ ૩ ૨ ૦૫ ૦૧c વિશ્વા ચ સોમ સૌભગા ॥ ૯૭૫
૪ ૩ ૨ ૦૫ ૦૨a ઇન્દો યથા તવ સ્તવો યથા તે જાતમન્ધસઃ ।
૪ ૩ ૨ ૦૫ ૦૨c નિ બર્હિષિ પ્રિયે સદઃ ॥ ૯૭૬
૪ ૩ ૨ ૦૫ ૦૩a ઉત નો ગોવિદશ્વવિત્પવસ્વ સોમાન્ધસા ।
૪ ૩ ૨ ૦૫ ૦૩c મક્ષૂતમેભિરહભિઃ ॥ ૯૭૭
૪ ૩ ૨ ૦૫ ૦૪a યો જિનાતિ ન જીયતે હન્તિ શત્રુમભીત્ય ।
૪ ૩ ૨ ૦૫ ૦૪c સ પવસ્વ સહસ્રજિત્ ॥ ૯૭૮

૪ ૩ ૨ ૦૬ ૦૧a યાસ્તે ધારા મધુશ્ચુતોઽસૃગ્રમિન્દ ઊતયે ।
૪ ૩ ૨ ૦૬ ૦૧c તાભિઃ પવિત્રમાસદઃ ॥ ૯૭૯
૪ ૩ ૨ ૦૬ ૦૨a સો અર્ષેન્દ્રાય પીતયે તિરો વારાણ્યવ્યયા ।
૪ ૩ ૨ ૦૬ ૦૨c સીદન્નૃતસ્ય યોનિમા ॥ ૯૮૦
૪ ૩ ૨ ૦૬ ૦૩a ત્વઁ સોમ પરિ સ્રવ સ્વાદિષ્ઠો અઙ્ગિરોભ્યઃ ।
૪ ૩ ૨ ૦૬ ૦૩c વરિવોવિદ્ધૃતં પયઃ ॥ ૯૮૧

૪ ૩ ૨ ૦૭ ૦૧a તવ શ્રિયો વર્ષ્યસ્યેવ વિદ્યુતોગ્નેશ્ચિકિત્ર ઉષસામિવેતયઃ ।

૪ ૩ ૨ ૦૭ ૦૧c  યદોષધીરભિસૃષ્ટો વનાનિ ચ પરિ સ્વયં ચિનુષે અન્નમાસનિ ॥ ૯૮૨
૪ ૩ ૨ ૦૭ ૦૨a  વાતોપજૂત ઇષિતો વશાઁ અનુ તૃષુ યદન્ના વેવિષદ્વિતિષ્ઠસે ।
૪ ૩ ૨ ૦૭ ૦૨c  આ તે યતન્તે રથ્યોઉ યથા પૃથક્ષર્ધાંસ્યગ્ને અજરસ્ય ધક્ષતઃ ॥ ૯૮૩
૪ ૩ ૨ ૦૭ ૦૩a  મેધાકારં વિદથસ્ય પ્રસાધનમગ્નિં હોતારં પરિભૂતરં મતિમ્ ।
૪ ૩ ૨ ૦૭ ૦૩c  ત્વામર્ભસ્ય હવિષઃ સમાનમિત્તવાં મહો વૃણતે નાન્યં ત્વત્ ॥ ૯૮૪

૪ ૩ ૨ ૦૮ ૦૧a  પુરૂરુણા ચિદ્ધ્યસ્ત્યવો નૂનં વાં વરુણ ।
૪ ૩ ૨ ૦૮ ૦૧c  મિત્ર વઁસિ વાઁ સુમતિમ્ ॥ ૯૮૫
૪ ૩ ૨ ૦૮ ૦૨a  તા વાઁ સમ્યગદ્રુહ્વાણેષમશ્યામ ધામ ચ ।
૪ ૩ ૨ ૦૮ ૦૨c  વયં વાં મિત્રા સ્યામ ॥ ૯૮૬
૪ ૩ ૨ ૦૮ ૦૩a  પાતં નો મિત્રા પાયુભિરુત ત્રાયેથાઁ સુત્રાત્રા ।
૪ ૩ ૨ ૦૮ ૦૩c  સાહ્યામ દસ્યૂં તનૂભિઃ ॥ ૯૮૭

૪ ૩ ૨ ૦૯ ૦૧a  ઉત્તિષ્ઠન્નોજસા સહ પીત્વા શિપ્રે અવેપયઃ ।
૪ ૩ ૨ ૦૯ ૦૧c  સોમમિન્દ્ર ચમૂસુતમ્ ॥ ૯૮૮
૪ ૩ ૨ ૦૯ ૦૨a  અનુ ત્વા રોદસી ઉભે સ્પર્ધમાનમદદેતામ્ ।
૪ ૩ ૨ ૦૯ ૦૨c  ઇન્દ્ર યદ્દસ્યુહાભવઃ ॥ ૯૮૯
૪ ૩ ૨ ૦૯ ૦૩a  વાચમષ્ટાપદીમહં નવસ્રક્તિમૃતાવૃધમ્ ।
૪ ૩ ૨ ૦૯ ૦૩c  ઇન્દ્રાત્પરિતન્વં મમે ॥ ૯૯૦

૪ ૩ ૨ ૧૦ ૦૧a  ઇન્દ્રાગ્ની યુવામિમેઽભિ સ્તોમા અનૂષત ।
૪ ૩ ૨ ૧૦ ૦૧c  પિબતઁ શમ્ભુવા સુતમ્ ॥ ૯૯૧
૪ ૩ ૨ ૧૦ ૦૨a  યા વાઁ સન્તિ પુરુસ્પૃહો નિયુતો દાશુષે નરા ।
૪ ૩ ૨ ૧૦ ૦૨c  ઇન્દ્રાગ્ની તાભિરા ગતમ્ ॥ ૯૯૨
૪ ૩ ૨ ૧૦ ૦૩a  તાભિરા ગચ્છતં નરોપેદઁ સવનઁ સુતમ્ ।
૪ ૩ ૨ ૧૦ ૦૩c  ઇન્દ્રાગ્ની સોમપીતયે ॥ ૯૯૩

૪ ૩ ૨ ૧૧ ૦૧a  અર્ષા સોમ દ્યુમત્તમોઽભિ દ્રોણાનિ રોરુવત્ ।
૪ ૩ ૨ ૧૧ ૦૧c  સીદન્યોનૌ યોનેષ્વા ॥ ૯૯૪
૪ ૩ ૨ ૧૧ ૦૨a  અપ્સા ઇન્દ્રાય વાયવે વરુણાય મરુદ્ભ્યઃ ।
૪ ૩ ૨ ૧૧ ૦૨c  સોમા અર્ષન્તુ વિષ્ણવે ॥ ૯૯૫
૪ ૩ ૨ ૧૧ ૦૩a  ઇષં તોકાય નો દધદસ્મભ્યઁ સોમ વિશ્વતઃ ।
૪ ૩ ૨ ૧૧ ૦૩c  આ પવસ્વ સહસ્રિણમ્ ॥ ૯૯૬

૪ ૩ ૨ ૧૨ ૦૧a  સોમ ઉ ષ્વાણઃ સોતૃભિરધિ ષ્ણુભિરવીનામ્ ।

૪ ૩ ૨ ૧૨ ०૧c અશ્વયેવ હરિતા યાતિ ધારયા મન્દ્રયા યાતિ ધારયા ॥ ૯૯૭
૪ ૩ ૨ ૧૨ ०૨a અનૂપે ગોમાન્ગોભિરક્ષાઃ સોમો દુગ્ધાભિરક્ષાઃ ।
૪ ૩ ૨ ૧૨ ०૨c સમુદ્રં ન સંવરણાન્યગ્મન્મન્દી મદાય તોશતે ॥ ૯૯૮

૪ ૩ ૨ ૧૩ ०૧a યત્સોમ ચિત્રમુક્થ્યં દિવ્યં પાર્થિવં વસુ ।
૪ ૩ ૨ ૧૩ ०૧c તન્નઃ પુનાન આ ભર ॥ ૯૯૯
૪ ૩ ૨ ૧૩ ०૨a વૃષા પુનાન આયુઁષિ સ્તનયન્નધિ બર્હિષિ ।
૪ ૩ ૨ ૧૩ ०૨c હરિઃ સન્યોનિમાસદઃ ॥ ૧૦૦૦
૪ ૩ ૨ ૧૩ ०૩a યુવઁ હિ સ્થઃ સ્વઃપતી ઇન્દ્રશ્ચ સોમ ગોપતી ।
૪ ૩ ૨ ૧૩ ०૩c ઈશાના પિપ્યતં ધિયઃ ॥ ૧૦૦૧

૪ ૩ ૨ ૧૪ ०૧a ઇન્દ્રો મદાય વાવૃધે શવસે વૃત્રહા નૃભિઃ ।
૪ ૩ ૨ ૧૪ ०૧c તમિન્મહત્સ્વાજિષૂતિમર્ભે હવામહે સ વાજેષુ પ્ર નોऽવિષત્ ॥ ૧૦૦૨
૪ ૩ ૨ ૧૪ ०૨a અસિ હિ વીર સેન્યોऽસિ ભૂરિ પરાદદિઃ ।
૪ ૩ ૨ ૧૪ ०૨c અસિ દભ્રસ્ય ચિદ્વૃધો યજમાનાય શિક્ષસિ સુન્વતે ભૂરિ તે વસુ ॥ ૧૦૦૩
૪ ૩ ૨ ૧૪ ०૩a યદુદીરત આજયો ધૃષ્ણવે ધીયતે ધનામ્ ।
૪ ૩ ૨ ૧૪ ०૩c યુઙ્ક્ષ્વા મદચ્યુતા હરી કં હનઃ કં વસૌ દધોऽસ્માં ઇન્દ્ર વસૌ દધઃ ॥ ૧૦૦૪

૪ ૩ ૨ ૧૫ ०૧a સ્વાદોરિત્થા વિષૂવતો મધ્વઃ પિબન્તિ ગૌર્યઃ ।
૪ ૩ ૨ ૧૫ ०૧c યા ઇન્દ્રેણ સયાવરીર્વૃષ્ણા મદન્તિ શોભસે વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧૦૦૫
૪ ૩ ૨ ૧૫ ०૨a તા અસ્ય પૃશનાયુવઃ સોમઁ શ્રીણન્તિ પૃશ્નયઃ ।
૪ ૩ ૨ ૧૫ ०૨c પ્રિયા ઇન્દ્રસ્ય ધેનવો વજ્રઁ હિન્વન્તિ સાયકં વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧૦૦૬
૪ ૩ ૨ ૧૫ ०૩a તા અસ્ય નમસા સહઃ સપર્યન્તિ પ્રચેતસઃ ।
૪ ૩ ૨ ૧૫ ०૩c વ્રતાન્યસ્ય સશ્ચિરે પુરૂણિ પૂર્વચિત્તયે વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧૦૦૭

૪ ૩ ૨ ૧૬ ०૧a અસાવ્યઁશુર્મદાયાપ્સુ દક્ષો ગિરિષ્ઠાઃ ।
૪ ૩ ૨ ૧૬ ०૧c શ્યેનો ન યોનિમાસદત્ ॥ ૧૦૦૮
૪ ૩ ૨ ૧૬ ०૨a શુભ્રમન્ધો દેવવાતમપ્સુ ધૌતં નૃભિઃ સુતમ્ ।
૪ ૩ ૨ ૧૬ ०૨c સ્વદન્તિ ગાવઃ પયોભિઃ ॥ ૧૦૦૯
૪ ૩ ૨ ૧૬ ०૩a આદીમશ્વં ન હેતારમશૂશુભન્નમૃતાય ।
૪ ૩ ૨ ૧૬ ०૩c મધો રસઁ સધમાદે ॥ ૧૦૧૦

૪ ૩ ૨ ૧૭ ०૧a અભિ દ્યુમ્નં બૃહદ્યશ ઇષસ્પતે દીદિહિ દેવ દેવયુમ્ ।
૪ ૩ ૨ ૧૭ ०૧c વિ કોશં મધ્યમં યુવ ॥ ૧૦૧૧
૪ ૩ ૨ ૧૭ ०૨a આ વચ્યસ્વ સુદક્ષ ચમ્વોઃ સુતો વિશાં વહ્નિર્ન વિશ્પતિઃ ।

૪ ૩ ૨ ૧૭ ૦૨c  વૃષ્ટિં દિવઃ પવસ્વ રીતિમપો જિન્વન્ગવિષ્ટયે ધિયઃ ॥ ૧૦૧૨

૪ ૩ ૨ ૧૮ ૦૧a  પ્રાણા શિશુર્મહીનાઁ હિન્વન્નૃતસ્ય દીધિતિમ્ ।
૪ ૩ ૨ ૧૮ ૦૧c  વિશ્વા પરિ પ્રિયા ભુવદધ દ્વિતા ॥ ૧૦૧૩
૪ ૩ ૨ ૧૮ ૦૨a  ઉપ ત્રિતસ્ય પાષ્યોઽરભક્ત યદ્ગુહા પદમ્ ।
૪ ૩ ૨ ૧૮ ૦૨c  યજ્ઞસ્ય સપ્ત ધામભિરધ પ્રિયમ્ ॥ ૧૦૧૪
૪ ૩ ૨ ૧૮ ૦૩a  ત્રીણિ ત્રિતસ્ય ધારયા પૃષ્ટેષ્વૈરયદ્રયિમ્ ।
૪ ૩ ૨ ૧૮ ૦૩c  મિમીતે અસ્ય યોજના વિ સુક્રતુઃ ॥ ૧૦૧૫

૪ ૩ ૨ ૧૯ ૦૧a  પવસ્વ વાજસાતયે પવિત્રે ધારયા સુતઃ ।
૪ ૩ ૨ ૧૯ ૦૧c  ઇન્દ્રાય સોમ વિષ્ણવે દેવેભ્યો મધુમત્તરઃ ॥ ૧૦૧૬
૪ ૩ ૨ ૧૯ ૦૨a  ત્વાઁ રિહન્તિ ધીતયો હરિં પવિત્રે અદ્રુહઃ ।
૪ ૩ ૨ ૧૯ ૦૨c  વત્સં જાતં ન માતરઃ પવમાન વિધર્મણિ ॥ ૧૦૧૭
૪ ૩ ૨ ૧૯ ૦૩a  ત્વં દ્યાં ચ મહિવ્રત પૃથિવીં ચાતિ જભ્રિષે ।
૪ ૩ ૨ ૧૯ ૦૩c  પ્રતિ દ્રાપિમમુઞ્ચથાઃ પવમાન મહિત્વના ॥ ૧૦૧૮

૪ ૩ ૨ ૨૦ ૦૧a  ઇન્દુર્વાજી પવતે ગોન્યોઘા ઇન્દ્રે સોમઃ સહ ઇન્વન્મદાય ।
૪ ૩ ૨ ૨૦ ૦૧c  હન્તિ રક્ષો બાધતે પર્યરાતિં વરિવસ્કૃણ્વન્વૃજનસ્ય રાજા ॥ ૧૦૧૯
૪ ૩ ૨ ૨૦ ૦૨a  અધ ધારયા મધ્વા પૃચાનસ્તિરો રોમ પવતે અદ્રિદુગ્ધઃ ।
૪ ૩ ૨ ૨૦ ૦૨c  ઇન્દુરિન્દ્રસ્ય સખ્યં જુષાણો દેવો દેવસ્ય મત્સરો મદાય ॥ ૧૦૨૦
૪ ૩ ૨ ૨૦ ૦૩a  અભિ વ્રતાનિ પવતે પુનાનો દેવો દેવાન્ત્સ્વેન રસેન પૃઞ્ચન્ ।
૪ ૩ ૨ ૨૦ ૦૩c  ઇન્દુર્ધર્માણ્યૃતુથા વસાનો દશ ક્ષિપો અવ્યત સાનો અવ્યે ॥ ૧૦૨૧

૪ ૩ ૨ ૨૧ ૦૧a  આ તે અગ્ન ઇધીમહિ દ્યુમન્તં દેવાજરમ્ ।
૪ ૩ ૨ ૨૧ ૦૧c  યુદ્ધ સ્યા તે પનીયસી સમિદ્દીદયતિ દ્યવીષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૦૨૨
૪ ૩ ૨ ૨૧ ૦૨a  આ તે અગ્ન ઋચા હવિઃ શુક્રસ્ય જ્યોતિષસ્પતે ।
૪ ૩ ૨ ૨૧ ૦૨c  સુશ્ચન્દ્ર દસ્મ વિશ્પતે હવ્યવાટ્તુભ્યઁ હૂયત ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૦૨૩
૪ ૩ ૨ ૨૧ ૦૩a  ઓભે સુશ્ચન્દ્ર વિશ્પતે દર્વી શ્રીણીષ આસનિ ।
૪ ૩ ૨ ૨૧ ૦૩c  ઉતો ન ઉત્પુપૂર્યા ઉક્થેષુ શવસસ્પત ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૦૨૪

૪ ૩ ૨ ૨૨ ૦૧a  ઇન્દ્રાય સામ ગાયત વિપ્રાય બૃહતે બૃહત્ ।
૪ ૩ ૨ ૨૨ ૦૧c  બ્રહ્માકૃતે વિપશ્ચિતે પનસ્યવે ॥ ૧૦૨૫
૪ ૩ ૨ ૨૨ ૦૨a  ત્વમિન્દ્રાભિભૂરસિ ત્વઁ સૂર્યમરોચયઃ ।
૪ ૩ ૨ ૨૨ ૦૨c  વિશ્વકર્મા વિશ્વદેવો મહાઁ અસિ ॥ ૧૦૨૬
૪ ૩ ૨ ૨૨ ૦૩a  વિભ્રાજં જ્યોતિષા ત્વઽરગચ્છો રોચનં દિવઃ ।

૪ ૩ ૨ ૨૨ ૦૩c દેવાસ્ત ઇન્દ્ર સખ્યાય યેમિરે ॥ ૧૦૨૭

૪ ૩ ૨ ૨૩ ૦૧a અસાવિ સોમ ઇન્દ્ર તે શવિષ્ઠ ધૃષ્ણવા ગહિ ।
૪ ૩ ૨ ૨૩ ૦૧c આ ત્વા પૃણક્ત્વિન્દ્રિયઁ રજઃ સૂર્યો ન રશ્મિભિઃ ॥ ૧૦૨૮
૪ ૩ ૨ ૨૩ ૦૨a આ તિષ્ઠ વૃત્રહન્રથં યુક્તા તે બ્રહ્મણા હરી ।
૪ ૩ ૨ ૨૩ ૦૨c અર્વાચીનઁ સુ તે મનો ગ્રાવા કૃણોતુ વગ્નુના ॥ ૧૦૨૯
૪ ૩ ૨ ૨૩ ૦૩a ઇન્દ્રમિદ્ધરી વહતોઽપ્રતિધૃષ્ટશવસમ્ ।
૪ ૩ ૨ ૨૩ ૦૩c ઋષીણાઁ સુષ્ટુતીરુપ યજ્ઞં ચ માનુષાણામ્ ॥ ૧૦૩૦

ચતુર્થ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૪ ૪ ૧ ૦૧ ૦૧a જ્યોતિર્યજ્ઞસ્ય પવતે મધુ પ્રિયં પિતા દેવાનાં જનિતા વિભૂવસુઃ ।
૪ ૪ ૧ ૦૧ ૦૧c દધાતિ રત્નઁ સ્વધયોરપીચ્યં મદિન્તમો મત્સર ઇન્દ્રિયો રસઃ ॥ ૧૦૩૧
૪ ૪ ૧ ૦૧ ૦૨a અભિક્રન્દન્કલશં વાજ્યર્ષતિ પતિર્દિવઃ શતધારો વિચક્ષણઃ ।
૪ ૪ ૧ ૦૧ ૦૨c હરિર્મિત્રસ્ય સદનેષુ સીદતિ મર્મૃજાનોઽવિભિઃ સિન્ધુભિર્વૃષા ॥ ૧૦૩૨
૪ ૪ ૧ ૦૧ ૦૩a અગ્રે સિન્ધૂનાં પવમાનો અર્ષત્યગ્રે વાચો અગ્રિયો ગોષુ ગચ્છસિ ।
૪ ૪ ૧ ૦૧ ૦૩c અગ્રે વાજસ્ય ભજસે મહદ્ધનઁ સ્વાયુધઃ સોતૃભિઃ સોમ સૂયસે ॥ ૧૦૩૩

૪ ૪ ૧ ૦૨ ૦૧a અસૃક્ષત પ્ર વાજિનો ગવ્યા સોમાસો અશ્વયા ।
૪ ૪ ૧ ૦૨ ૦૧c શુક્રાસો વીરયાશવઃ ॥ ૧૦૩૪
૪ ૪ ૧ ૦૨ ૦૨a શુમ્ભમાનો ઋતાયુભિર્મૃજ્યમાના ગભસ્ત્યોઃ ।
ર્મ્ ૪ ૪ ૧ ૦૨ ૦૨c પવન્તે વારે અવ્યયે ॥ ૧૦૩૫
૪ ૪ ૧ ૦૨ ૦૩a તે વિશ્વા દાશુષે વસુ સોમા દિવ્યાનિ પાર્થિવા ।
૪ ૪ ૧ ૦૨ ૦૩c પવન્તામાન્તરિક્ષ્યા ॥ ૧૦૩૬

૪ ૪ ૧ ૦૩ ૦૧a પવસ્વ દેવવીરતિ પવિત્રઁ સોમ રઁહ્યા ।
૪ ૪ ૧ ૦૩ ૦૧c ઇન્દ્રમિન્દો વૃષા વિશ ॥ ૧૦૩૭
૪ ૪ ૧ ૦૩ ૦૨a આ વચ્યસ્વ મહિ પ્સરો વૃષેન્દો દ્યુમ્નવત્તમઃ ।
૪ ૪ ૧ ૦૩ ૦૨c આ યોનિં ધર્ણસિઃ સદઃ ॥ ૧૦૩૮
૪ ૪ ૧ ૦૩ ૦૩a અધુક્ષત પ્રિયં મધુ ધારા સુતસ્ય વેધસઃ ।
૪ ૪ ૧ ૦૩ ૦૩c અપો વસિષ્ટ સુક્રતુઃ ॥ ૧૦૩૯
૪ ૪ ૧ ૦૩ ૦૪a મહાન્તં ત્વા મહીરન્વાપો અર્ષન્તિ સિન્ધવઃ ।
૪ ૪ ૧ ૦૩ ૦૪c યદ્ગોભિર્વાસયિષ્યસે ॥ ૧૦૪૦
૪ ૪ ૧ ૦૩ ૦૫a સમુદ્રો અપ્સુ મામૃજે વિષ્ટમ્ભો ધરુણો દિવઃ ।
૪ ૪ ૧ ૦૩ ૦૫c સોમઃ પવિત્રે અસ્મયુઃ ॥ ૧૦૪૧

૪ ૪ ૧ ૦૩ ૦૬a અચિક્રદદ્વૃષા હરિર્મહાન્મિત્રો ન દર્શતઃ ।
૪ ૪ ૧ ૦૩ ૦૬c સઁ સૂર્યેણ દિદ્યુતે ॥ ૧૦૪૨
૪ ૪ ૧ ૦૩ ૦૭a ગિરસ્ત ઇન્દ ઓજસા મર્મૃજ્યન્તે અપસ્યુવઃ ।
૪ ૪ ૧ ૦૩ ૦૭c યાભિર્મદાય શુમ્ભસે ॥ ૧૦૪૩
૪ ૪ ૧ ૦૩ ૦૮a તં ત્વા મદાય ઘૃષ્વય ઉ લોકકૃત્નુમીમહે ।
૪ ૪ ૧ ૦૩ ૦૮c તવ પ્રશસ્તયે મહે ॥ ૧૦૪૪
૪ ૪ ૧ ૦૩ ૦૯a ગોષા ઇન્દો નૃષા અસ્યશ્વસા વાજસા ઉત ।
૪ ૪ ૧ ૦૩ ૦૯c આત્મા યજ્ઞસ્ય પૂર્વ્યઃ ॥ ૧૦૪૫
૪ ૪ ૧ ૦૩ ૧૦a અસ્મભ્યમિન્દવિન્દ્રિયં મધોઃ પવસ્વ ધારયા ।
૪ ૪ ૧ ૦૩ ૧૦c પર્જન્યો વૃષ્ટિમાઁ ઇવ ॥ ૧૦૪૬

૪ ૪ ૧ ૦૪ ૦૧a સના ચ સોમ જેષિ ચ પવમાન મહિ શ્રવઃ ।
૪ ૪ ૧ ૦૪ ૦૧c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૪૭
૪ ૪ ૧ ૦૪ ૦૨a સના જ્યોતિઃ સના સ્વાઉર્વિશ્વા ચ સોમ સૌભગા ।
૪ ૪ ૧ ૦૪ ૦૨c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૪૮
૪ ૪ ૧ ૦૪ ૦૩a સના દક્ષમુત ક્રતુમપ સોમ મૃધો જહિ ।
૪ ૪ ૧ ૦૪ ૦૩c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૪૯
૪ ૪ ૧ ૦૪ ૦૪a પવીતારઃ પુનીતન સોમમિન્દ્રાય પાતવે ।
૪ ૪ ૧ ૦૪ ૦૪c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૦
૪ ૪ ૧ ૦૪ ૦૫a ત્વઁ સૂર્યે ન આ ભજ તવ ક્રત્વા તવોતિભિઃ ।
૪ ૪ ૧ ૦૪ ૦૫c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૧
૪ ૪ ૧ ૦૪ ૦૬a તવ ક્રત્વા તવોતિભિર્જ્યોક્પશ્યેમ સૂર્યમ્ ।
૪ ૪ ૧ ૦૪ ૦૬c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૨
૪ ૪ ૧ ૦૪ ૦૭a અભ્યર્ષ સ્વાયુધ સોમ દ્વિબર્હસઁ રયિમ્ ।
૪ ૪ ૧ ૦૪ ૦૭c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૩
૪ ૪ ૧ ૦૪ ૦૮a અભ્યાઉર્ષાનપચ્યુતો વાજિન્ત્સમત્સુ સાસહિઃ ।
૪ ૪ ૧ ૦૪ ૦૮c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૪
૪ ૪ ૧ ૦૪ ૦૯a ત્વાં યજ્ઞૈરવીવૃધન્પવમાન વિધર્મણિ ।
૪ ૪ ૧ ૦૪ ૦૯c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૫
૪ ૪ ૧ ૦૪ ૧૦a રયિં નશ્ચિત્રમશ્વિનમિન્દો વિશ્વાયુમા ભર ।
૪ ૪ ૧ ૦૪ ૧૦c અથા નો વસ્યસસ્કૃધિ ॥ ૧૦૫૬

૪ ૪ ૧ ૦૫ ૦૧a તરત્સ મન્દી ધાવતિ ધારા સુતસ્યાન્ધસઃ ।

૪ ૪ ૧ ૦૫ ૦૧c  તરત્સ મન્દી ધાવતિ ॥ ૧૦૫૭
૪ ૪ ૧ ૦૫ ૦૨a  ઉસ્રા વેદ વસૂનાં મર્ત્તસ્ય દેવ્યવસઃ ।
૪ ૪ ૧ ૦૫ ૦૨c  તરત્સ મન્દી ધાવતિ ॥ ૧૦૫૮
૪ ૪ ૧ ૦૫ ૦૩a  ધ્વસ્રયોઃ પુરુષન્ત્યોરા સહસ્રાણિ દદ્મહે ।
૪ ૪ ૧ ૦૫ ૦૩c  તરત્સ મન્દી ધાવતિ ॥ ૧૦૫૯
૪ ૪ ૧ ૦૫ ૦૪a  આ યયોસ્ત્રિँશતં તના સહસ્રાણિ ચ દદ્મહે ।
૪ ૪ ૧ ૦૫ ૦૪c  તરત્સ મન્દી ધાવતિ ॥ ૧૦૬૦

૪ ૪ ૧ ૦૬ ૦૧a  એતે સોમા અસૃક્ષત ગૃણાનાઃ શવસે મહે ।
૪ ૪ ૧ ૦૬ ૦૧c  મદિન્તમસ્ય ધારયા ॥ ૧૦૬૧
૪ ૪ ૧ ૦૬ ૦૨a  અભિ ગવ્યાનિ વીતયે નૃમ્ણા પુનાનો અર્ષસિ ।
૪ ૪ ૧ ૦૬ ૦૨c  સનદ્વાજઃ પરિ સ્રવ ॥ ૧૦૬૨
૪ ૪ ૧ ૦૬ ૦૩a  ઉત નો ગોમતીરિષો વિશ્વા અર્ષ પરિષ્ટુભઃ ।
૪ ૪ ૧ ૦૬ ૦૩c  ગૃણાનો જમદગ્નિના ॥ ૧૦૬૩

૪ ૪ ૧ ૦૭ ૦૧a  ઇમँ સ્તોમમર્હતે જાતવેદસે રથમિવ સં મહેમા મનીષયા ।
૪ ૪ ૧ ૦૭ ૦૧c  ભદ્રા હિ નઃ પ્રમતિરસ્ય સँસદ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧૦૬૪
૪ ૪ ૧ ૦૭ ૦૨a  ભરામેધ્મં કૃણવામા હવીँષિ તે ચિતયન્તઃ પર્વણાપર્વણા વયમ્ ।
૪ ૪ ૧ ૦૭ ૦૨c  જીવાતવે પ્રતरँ સાધયા ધિયોઽગ્ને સખ્યે મ રિષામા વયં તવ ॥ ૧૦૬૫
૪ ૪ ૧ ૦૭ ૦૩a  શકેમ ત્વા સમિધँ સાધયા ધિયસ્ત્વે દેવા હવિરદન્ત્યાહુતમ્ ।
૪ ૪ ૧ ૦૭ ૦૩c  ત્વમાદિત્યाँ આ વહ તાન્હ્યૂઽશ્મસ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧૦૬૬

૪ ૪ ૧ ૦૮ ૦૧a  પ્રતિ વाँ સૂર ઉદિતે મિત્રં ગૃણીષે વરુણમ્ ।
૪ ૪ ૧ ૦૮ ૦૧c  અર્યમણँ રિશાદસમ્ ॥ ૧૦૬૭
૪ ૪ ૧ ૦૮ ૦૨a  રાયા હિરણ્યયા મતિરિયમવૃકાય શવસે ।
૪ ૪ ૧ ૦૮ ૦૨c  ઇયં વિપ્રામેધસાતયે ॥ ૧૦૬૮
૪ ૪ ૧ ૦૮ ૦૩a  તે સ્યામ દેવ વરુણ તે મિત્ર સૂરિભિઃ સહ ।
૪ ૪ ૧ ૦૮ ૦૩c  ઇષँ સ્વશ્ચ ધીમહિ ॥ ૧૦૬૯

૪ ૪ ૧ ૦૯ ૦૧a  ભિન્ધિ વિશ્વા અપ દ્વિષઃ પરિ બાધો જહી મૃધઃ ।
૪ ૪ ૧ ૦૯ ૦૧c  વસુ સ્પાર્હં તદા ભર ॥ ૧૦૭૦
૪ ૪ ૧ ૦૯ ૦૨a  યસ્ય તે વિશ્વમાનુષગ્ભૂરેર્દત્તસ્ય વેદતિ ।
૪ ૪ ૧ ૦૯ ૦૨c  વસુ સ્પાર્હં તદા ભર ॥ ૧૦૭૧
૪ ૪ ૧ ૦૯ ૦૩a  યદ્વીડાવિન્દ્ર યત્સ્થિરે યત્પર્શાને પરાભૃતમ્ ।

૪ ૪ ૧ ૦૯ 03c  વસુ સ્પાર્હં તદા ભર ॥ ૧૦૭૨

૪ ૪ ૧ ૧૦ 01a  યજ્ઞસ્ય હિ સ્થ ઋત્વિજા સસ્ની વાજેષુ કર્મસુ ।
૪ ૪ ૧ ૧૦ 01c  ઇન્દ્રાગ્ની તસ્ય બોધતમ્ ॥ ૧૦૭૩
૪ ૪ ૧ ૧૦ 02a  તોશાસા રથયાવાના વૃત્રહણાપરાજિતા ।
૪ ૪ ૧ ૧૦ 02c  ઇન્દ્રાગ્ની તસ્ય બોધતમ્ ॥ ૧૦૭૪
૪ ૪ ૧ ૧૦ 03a  ઇદં વાં મદિરં મધ્વધુક્ષન્નદ્રિભિર્નરઃ ।
૪ ૪ ૧ ૧૦ 03c  ઇન્દ્રાગ્ની તસ્ય બોધતમ્ ॥ ૧૦૭૫

૪ ૪ ૧ ૧૧ 01a  ઇન્દ્રાયેન્દો મરુત્વતે પવસ્વ મધુમત્તમઃ ।
૪ ૪ ૧ ૧૧ 01c  અર્કસ્ય યોનિમાસદમ્ ॥ ૧૦૭૬
૪ ૪ ૧ ૧૧ 02a  તં ત્વા વિપ્રા વચોવિદઃ પરિષ્કૃણ્વન્તિ ધર્ણસિમ્ ।
૪ ૪ ૧ ૧૧ 02c  સં ત્વા મૃજન્ત્યાયવઃ ॥ ૧૦૭૭
૪ ૪ ૧ ૧૧ 03a  રસં તે મિત્રો અર્યમા પિબન્તુ વરુણઃ કવે ।
૪ ૪ ૧ ૧૧ 03c  પવમાનસ્ય મરુતઃ ॥ ૧૦૭૮

૪ ૪ ૧ ૧૨ 01a  મૃજ્યમાનઃ સુહસ્ત્ય સમુદ્રે વાચમિન્વસિ ।
૪ ૪ ૧ ૧૨ 01c  રયિં પિશઙ્ગં બહુલં પુરુસ્પૃહં પવમાનાભ્યર્ષસિ ॥ ૧૦૭૯
૪ ૪ ૧ ૧૨ 02a  પુનાનો વરે પવમનો અવ્યયે વૃષો અચિક્રદદ્વને ।
૪ ૪ ૧ ૧૨ 02c  દેવાનાઁ સોમ પવમાન નિષ્કૃતં ગોભિરઞ્જાનો અર્ષસિ ॥ ૧૦૮૦

૪ ૪ ૧ ૧૩ 01a  એતમુ ત્યં દશ ક્ષિપો મૃજન્તિ સિન્ધુમાતરમ્ ।
૪ ૪ ૧ ૧૩ 01c  સમાદિત્યેભિરખ્યત ॥ ૧૦૮૧
૪ ૪ ૧ ૧૩ 02a  સમિન્દ્રેણોત વાયુના સુત એતિ પવિત્ર આ ।
૪ ૪ ૧ ૧૩ 02c  સઁ સૂર્યસ્ય રશ્મિભિઃ ॥ ૧૦૮૨
૪ ૪ ૧ ૧૩ 03a  સ નો ભગાય વાયવે પૂષ્ણે પવસ્વ મધુમાન્ ।
૪ ૪ ૧ ૧૩ 03c  ચારુર્મિત્રે વરુણે ચ ॥ ૧૦૮૩

૪ ૪ ૧ ૧૪ 01a  રેવતીર્નઃ સધમાદ ઇન્દ્રે સન્તુ તુવિવાજાઃ ।
૪ ૪ ૧ ૧૪ 01c  ક્ષુમન્તો યાભિર્મદેમ ॥ ૧૦૮૪
૪ ૪ ૧ ૧૪ 02a  આ ઘ ત્વાવાં ત્મના યુક્તઃ સ્તોતૃભ્યો ધૃષ્ણવીયાનઃ ।
૪ ૪ ૧ ૧૪ 02c  ઋણોરક્ષં ન ચક્ર્યોઃ ॥ ૧૦૮૫
૪ ૪ ૧ ૧૪ 03a  આ યદ્દુવઃ શતક્રતવા કામં જરિતૃણામ્ ।
૪ ૪ ૧ ૧૪ 03c  ઋણોરક્ષં ન શચીભિઃ ॥ ૧૦૮૬

૪ ૪ ૧ ૧૫ 01a  સુરૂપકૃત્નુમૂતયે સુદુઘામિવ ગોદુહે ।

૪ ૪ ૧ ૧૫ ૦૧c જુહૂમસિ દ્યવિદ્યવિ ॥ ૧૦૮૭
૪ ૪ ૧ ૧૫ ૦૨a ઉપ નઃ સવના ગહિ સોમસ્ય સોમપાઃ પિબ ।
૪ ૪ ૧ ૧૫ ૦૨c ગોદા ઇદ્રેવતો મદઃ ॥ ૧૦૮૮
૪ ૪ ૧ ૧૫ ૦3a અથા તે અન્તમાનાં વિદ્યામ સુમતીનામ્ ।
૪ ૪ ૧ ૧૫ ૦3c મા નો અતિ ખ્ય આ ગહિ ॥ ૧૦૮૯

૪ ૪ ૧ ૧૬ ૦૧a ઉભે યદિન્દ્ર રોદસી આપપ્રાથોષા ઇવ ।
૪ ૪ ૧ ૧૬ ૦૧c મહાન્તં ત્વા મહીનાઁ સમ્રાજં ચર્ષણીનામ્ ।
૪ ૪ ૧ ૧૬ ૦૧e દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦૯૦
૪ ૪ ૧ ૧૬ ૦૨a દીર્ઘં હ્યઙ્કુશં યથા શક્તિં બિભર્ષિ મન્તુમઃ ।
૪ ૪ ૧ ૧૬ ૦૨c પૂર્વેણ મઘવન્પદા વયામજો યથા યમઃ ।
૪ ૪ ૧ ૧૬ ૦૨e દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦૯૧
૪ ૪ ૧ ૧૬ ૦3a અવ સ્મ દુર્હૃણાયતો મર્ત્તસ્ય તનુહિ સ્થિરમ્ ।
૪ ૪ ૧ ૧૬ ૦3c અધસ્પદં તમીં કૃધિ યો અસ્માઁ અભિદાસતિ ।
૪ ૪ ૧ ૧૬ ૦3e દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦૯૨

૪ ૪ ૧ ૧૭ ૦૧a પરિ સ્વાનો ગિરિષ્ઠાઃ પવિત્રે સોમો અક્ષરત્ ।
૪ ૪ ૧ ૧૭ ૦૧c મદેષુ સર્વધા અસિ ॥ ૧૦૯૩
૪ ૪ ૧ ૧૭ ૦૨a ત્વં વિપ્રસ્ત્વં કવિર્મધુ પ્ર જાતમન્ધસઃ ।
૪ ૪ ૧ ૧૭ ૦૨c મદેષુ સર્વધા અસિ ॥ ૧૦૯૪
૪ ૪ ૧ ૧૭ ૦3a ત્વે વિશ્વે સજોષસો દેવાસઃ પીતિમાશત ।
૪ ૪ ૧ ૧૭ ૦3c મદેષુ સર્વધા અસિ ॥ ૧૦૯૫

૪ ૪ ૧ ૧૮ ૦૧a સ સુન્વે યો વસૂનાં યો રાયામાનેતા ય ઇડાનામ્ ।
૪ ૪ ૧ ૧૮ ૦૧c સોમો યઃ સુક્ષિતીનામ્ ॥ ૧૦૯૬
૪ ૪ ૧ ૧૮ ૦૨a યસ્ય ત ઇન્દ્રઃ પિબાદ્યસ્ય મરુતો યસ્ય વાર્યમણા ભગઃ ।
૪ ૪ ૧ ૧૮ ૦૨c આ યેન મિત્રાવરુણા કરામહ એન્દ્રમવસે મહે ॥ ૧૦૯૭

૪ ૪ ૧ ૧૯ ૦૧a તં વઃ સખાયો મદાય પુનાનમભિ ગાયત ।
૪ ૪ ૧ ૧૯ ૦૧c શિશું ન હવ્યૈઃ સ્વદયન્ત ગૂર્તિભિઃ ॥ ૧૦૯૮
૪ ૪ ૧ ૧૯ ૦૨a સં વત્સ ઇવ માતૃભિરિન્દુર્હિન્વાનો અજ્યતે ।
૪ ૪ ૧ ૧૯ ૦૨c દેવાવીર્મદો મતિભિઃ પરિષ્કૃતઃ ॥ ૧૦૯૯
૪ ૪ ૧ ૧૯ ૦3a અયં દક્ષાય સાધનોઽયઁ શર્ધાય વીતયે ।
૪ ૪ ૧ ૧૯ ૦3c અયં દેવેભ્યો મધુમત્તરઃ સુતઃ ॥ ૧૧૦૦

૪ ૪ ૧ ૨૦ ૦૧a સોમાઃ પવન્ત ઇન્દવોઽસ્મભ્યં ગાતુવિત્તમાઃ ।
૪ ૪ ૧ ૨૦ ૦૧c મિત્રાઃ સુવાના અરેપસઃ સ્વાધ્યઃ સ્વર્વિદઃ ॥ ૧૧૦૧
૪ ૪ ૧ ૨૦ ૦૨a તે પૂતાસો વિપશ્ચિતઃ સોમાસો દધ્યાશિરઃ ।
૪ ૪ ૧ ૨૦ ૦૨c સૂરાસો ન દર્શતાસો જિગત્નવો ધ્રુવા ઘૃતે ॥ ૧૧૦૨
૪ ૪ ૧ ૨૦ ૦૩a સુષ્વાણાસો વ્યદ્રિભિશ્ચિતાના ગોરધિ ત્વચિ ।
૪ ૪ ૧ ૨૦ ૦૩c ઇષમસ્મભ્યમભિતઃ સમસ્વરન્વસુવિદઃ ॥ ૧૧૦૩

૪ ૪ ૧ ૨૧ ૦૧a અયા પવા પવસ્વૈના વસૂનિ માઁશ્ચત્વ ઇન્દો સરસિ પ્ર ધન્વ ।
૪ ૪ ૧ ૨૧ ૦૧c બ્રધ્નશ્ચિદ્યસ્ય વાતો ન જૂતિં પુરુમેધાશ્ચિત્તકવે નરં ધાત્ ॥ ૧૧૦૪
૪ ૪ ૧ ૨૧ ૦૨a ઉત ન એના પવયા પવસ્વાધિ શ્રુતે શ્રવાય્યસ્ય તીર્થે ।
૪ ૪ ૧ ૨૧ ૦૨c ષષ્ટિઁ સહસ્રા નૈગુતો વસૂનિ વૃક્ષં ન પક્વં ધૂનવદ્રણાય ॥ ૧૧૦૫
૪ ૪ ૧ ૨૧ ૦૩a મહીમે અસ્ય વૃષ નામ શૂષે માઁશ્ચત્વે વા પૃશને વા વધત્રે ।
૪ ૪ ૧ ૨૧ ૦૩c અસ્વાપયન્નિગુતઃ સ્નેહયચ્ચાપામિત્રાઁ અપાચિતો અચેતઃ ॥ ૧૧૦૬

૪ ૪ ૧ ૨૨ ૦૧a અગ્ને ત્વં નો અન્તમ ઉત ત્રાતા શિવો ભુવો વરૂથ્યઃ ॥ ૧૧૦૭
૪ ૪ ૧ ૨૨ ૦૨a વસુરગ્નિર્વસુશ્રવા અચ્છા નક્ષિ દ્યુમત્તમો રયિં દાઃ ॥ ૧૧૦૮
૪ ૪ ૧ ૨૨ ૦૩a તં ત્વા શોચિષ્ઠ દીદિવઃ સુમ્નાય નૂનમીમહે સખિભ્યઃ ॥ ૧૧૦૯

૪ ૪ ૧ ૨૩ ૦૧a ઇમા નુ કં ભુવના સીષધેમેન્દ્રશ્ચ વિશ્વે ચ દેવાઃ ॥ ૧૧૧૦
૪ ૪ ૧ ૨૩ ૦૨a યજ્ઞં ચ નસ્તન્વં ચ પ્રજાં ચાદિત્યૈરિન્દ્રઃ સહ સીષધાતુ ॥ ૧૧૧૧
૪ ૪ ૧ ૨૩ ૦૩a આદિત્યૈરિન્દ્રઃ સગણો મરુદ્ભિરસ્મભ્યં ભેષજા કરત્ ॥ ૧૧૧૨

૪ ૪ ૧ ૨૪ ૦૧a પ્ર વ ઇન્દ્રાય વૃત્રહન્તમાય વિપ્રાય ગાથં ગાયત યં જુજોષતે ॥ ૧૧૧૩
૪ ૪ ૧ ૨૪ ૦૨a અર્ચન્ત્યર્કં મરુતઃ સ્વર્કા આ સ્તોભતિ શ્રુતો યુવા સ ઇન્દ્રઃ ॥ ૧૧૧૪
૪ ૪ ૧ ૨૪ ૦૩a ઉપ પ્રક્ષે મધુમતિ ક્ષિયન્તઃ પુષ્યેમ રયિં ધીમહે ત ઇન્દ્ર ॥ ૧૧૧૫

ચતુર્થ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૪ ૨ ૦૧ ૦૧a પ્ર કાવ્યમુશનેવ બ્રુવાણો દેવો દેવાનાં જનિમા વિવક્તિ ।
૪ ૪ ૨ ૦૧ ૦૧c મહિવ્રતઃ શુચિબન્ધુઃ પાવકઃ પદા વરાહો અભ્યેતિ રેભન્ ॥ ૧૧૧૬
૪ ૪ ૨ ૦૧ ૦૨a પ્ર હઁસાસસ્તૃપલા વગ્નુમચ્છામાદસ્તં વૃષગણા અયાસુઃ ।
૪ ૪ ૨ ૦૧ ૦૨c આઙ્ગોષિણં પવમાનઁ સખાયો દુર્મર્ષં વાણં પ્ર વદન્તિ સાકમ્ ॥ ૧૧૧૭
૪ ૪ ૨ ૦૧ ૦૩a સ યોજત ઉરુગાયસ્ય જૂતિં વૃથા ક્રીડન્તં મિમતે ન ગાવઃ ।
૪ ૪ ૨ ૦૧ ૦૩c પરીણસં કૃણુતે તિગ્મશૃઙ્ગો દિવા હરિર્દદૃશે નક્તમૃજ્રઃ ॥ ૧૧૧૮
૪ ૪ ૨ ૦૧ ૦૪a પ્ર સ્વાનાસો રથા ઇવાર્વન્તો ન અવસ્યવઃ ।
૪ ૪ ૨ ૦૧ ૦૪c સોમાસો રાયે અક્રમુઃ ॥ ૧૧૧૯

૪ ૪ ૨ ૦૧ ૦૫a હિન્વાનાસો રથા ઇવ દધન્વિરે ગભસ્ત્યોઃ ।
૪ ૪ ૨ ૦૧ ૦૫c ભરાસઃ કારિણામિવ ॥ ૧૧૨૦
૪ ૪ ૨ ૦૧ ૦૬a રાજાનો ન પ્રશસ્તિભિઃ સોમાસો ગોભિરઞ્જતે ।
૪ ૪ ૨ ૦૧ ૦૬c યજ્ઞો ન સપ્ત ધાતૃભિઃ ॥ ૧૧૨૧
૪ ૪ ૨ ૦૧ ૦૭a પરિ સ્વાનાસ ઇન્દવો મદાય બર્હણા ગિરા ।
૪ ૪ ૨ ૦૧ ૦૭c મધો અર્ષન્તિ ધારયા ॥ ૧૧૨૨
૪ ૪ ૨ ૦૧ ૦૮a આપાનાસો વિવસ્વતો જિન્વન્ત ઉષસો ભગમ્ ।
૪ ૪ ૨ ૦૧ ૦૮c સૂરા અણ્વં વિ તન્વતે ॥ ૧૧૨૩
૪ ૪ ૨ ૦૧ ૦૯a અપ દ્વારા મતીનાં પ્રત્ના ઋણ્વન્તિ કારવઃ ।
૪ ૪ ૨ ૦૧ ૦૯c વૃષ્ણો હરસ આયવઃ ॥ ૧૧૨૪
૪ ૪ ૨ ૦૧ ૧૦a સમીચીનાસ આશત હોતારઃ સપ્તજાનયઃ ।
૪ ૪ ૨ ૦૧ ૧૦c પદમેકસ્ય પિપ્રતઃ ॥ ૧૧૨૫
૪ ૪ ૨ ૦૧ ૧૧a નાભા નાભિં ન આ દદે ચક્ષુષા સૂર્યં દૃશે ।
૪ ૪ ૨ ૦૧ ૧૧c કવેરપત્યમા દુહે ॥ ૧૧૨૬
૪ ૪ ૨ ૦૧ ૧૨a અભિ પ્રિયં દિવસ્પદમધ્વર્યુભિર્ગુહા હિતમ્ ।
૪ ૪ ૨ ૦૧ ૧૩c સૂરઃ પસ્યતિ ચક્ષસા ॥ ૧૧૨૭

૪ ૪ ૨ ૦૨ ૦૧a અસૃગ્રમિન્દવઃ પથા ધર્મન્નૃતસ્ય સુશ્રિયઃ ।
૪ ૪ ૨ ૦૨ ૦૧c વિદાના અસ્ય યોજના ॥ ૧૧૨૮
૪ ૪ ૨ ૦૨ ૦૨a પ્ર ધારા મધો અગ્રિયો મહીરપો વિ ગાહતે ।
૪ ૪ ૨ ૦૨ ૦૨c હવિર્હવિઃષુ વન્દ્યઃ ॥ ૧૧૨૯
૪ ૪ ૨ ૦૨ ૦૩a પ્ર યુજા વાચો અગ્રિયો વૃષો અચિક્રદદ્વને ।
૪ ૪ ૨ ૦૨ ૦૩c સદ્માભિ સત્યો અધ્વરઃ ॥ ૧૧૩૦
૪ ૪ ૨ ૦૨ ૦૪a પરિ યત્કાવ્યા કવિર્નૃમ્ણા પુનાનો અર્ષતિ ।
૪ ૪ ૨ ૦૨ ૦૪c સ્વર્વાજી સિષાસતિ ॥ ૧૧૩૧
૪ ૪ ૨ ૦૨ ૦૫a પવમાનો અભિ સ્પૃધો વિશો રાજેવ સીદતિ ।
૪ ૪ ૨ ૦૨ ૦૫c યદીમૃણ્વન્તિ વેધસઃ ॥ ૧૧૩૨
૪ ૪ ૨ ૦૨ ૦૬a અવ્યા વારે પરિ પ્રિયો હરિર્વનેષુ સીદતિ ।
૪ ૪ ૨ ૦૨ ૦૬c રેભો વનુષ્યતે મતિ ॥ ૧૧૩૩
૪ ૪ ૨ ૦૨ ૦૭a સ વાયુમિન્દ્રમશ્વિના સાકં મદેન ગચ્છતિ ।
૪ ૪ ૨ ૦૨ ૦૭c રણા યો અસ્ય ધર્મણા ॥ ૧૧૩૪
૪ ૪ ૨ ૦૨ ૦૮a આ મિત્રે વરુણે ભગે મધોઃ પવન્ત ઊર્મયઃ ।

૪ ૪ ૨ ૦૨ ૦૮c  વિદાના અસ્ય શક્મભિઃ ॥ ૧૧૩૫
૪ ૪ ૨ ૦૨ ૦૯a  અસ્મભ્યઁ રોદસી રયિં મધ્વો વાજસ્ય સાતયે ।
૪ ૪ ૨ ૦૨ ૦૯c  શ્રવો વસૂનિ સઞ્જિતમ્ ॥ ૧૧૩૬
૪ ૪ ૨ ૦૨ ૧૦a  આ તે દક્ષં મયોભુવં વહ્નિમદ્યા વૃણીમહે ।
૪ ૪ ૨ ૦૨ ૧૦c  પાન્તમા પુરુસ્પૃહમ્ ॥ ૧૧૩૭
૪ ૪ ૨ ૦૨ ૧૧a  આ મન્દ્રમા વરેણ્યમા વિપ્રમા મનીષિણમ્ ।
૪ ૪ ૨ ૦૨ ૧૧c  પાન્તમા પુરુસ્પૃહમ્ ॥ ૧૧૩૮
૪ ૪ ૨ ૦૨ ૧૨a  આ રયિમા સુચેતુનમા સુક્રતો તનૂષ્વા ।
૪ ૪ ૨ ૦૨ ૧૨c  પાન્તમા પુરુસ્પૃહમ્ ॥ ૧૧૩૯

૪ ૪ ૨ ૦૩ ૦૧a  મૂર્ધાનં દિવો અરતિં પૃથિવ્યા વૈશ્વાનરમૃત આ જાતમગ્નિમ્ ।
૪ ૪ ૨ ૦૩ ૦૧c  કવિઁ સમ્રાજમતિથિં જનાનામાસન્નઃ પાત્રં જનયન્ત દેવાઃ ॥ ૧૧૪૦
૪ ૪ ૨ ૦૩ ૦૨a  ત્વાં વિશ્વે અમૃત જાયમાનઁ શિશું ન દેવા અભિ સં નવન્તે ।
૪ ૪ ૨ ૦૩ ૦૨c  તવ ક્રતુભિરમૃતત્વમાયન્વૈશ્વાનર યત્પિત્રોરદીદેઃ ॥ ૧૧૪૧
૪ ૪ ૨ ૦૩ ૦૩a  નાભિં યજ્ઞાનાઁ સદનઁ રયીણાં મહામાહાવમભિ સં નવન્ત ।
૪ ૪ ૨ ૦૩ ૦૩c  વૈશ્વાનરઁ રથ્યમધ્વરાણાં યજ્ઞસ્ય કેતું જનયન્ત દેવાઃ ॥ ૧૧૪૨

૪ ૪ ૨ ૦૪ ૦૧a  પ્ર વો મિત્રાય ગાયત વરુણાય વિપા ગિરા ।
૪ ૪ ૨ ૦૪ ૦૧c  મહિક્ષત્રાવૃતં બૃહત્ ॥ ૧૧૪૩
૪ ૪ ૨ ૦૪ ૦૨a  સમ્રાજા યા ઘૃતયોની મિત્રશ્ચોભા વરુણશ્ચ ।
૪ ૪ ૨ ૦૪ ૦૨c  દેવા દેવેષુ પ્રશસ્તા ॥ ૧૧૪૪
૪ ૪ ૨ ૦૪ ૦૩a  તા નઃ શક્તં પર્થિવસ્ય મહો રાયો દિવ્યસ્ય ।
૪ ૪ ૨ ૦૪ ૦૩c  મહિ વાં ક્ષત્રં દેવેષુ ॥ ૧૧૪૫

૪ ૪ ૨ ૦૫ ૦૧a  ઇન્દ્રા યાહિ ચિત્રભાનો સુતા ઇમે ત્વાયવઃ ।
૪ ૪ ૨ ૦૫ ૦૧c  અણ્વીભિસ્તના પૂતાસઃ ॥ ૧૧૪૬
૪ ૪ ૨ ૦૫ ૦૨a  ઇન્દ્રા યાહિ ધિયેષિતો વિપ્રજૂતઃ સુતાવતઃ ।
૪ ૪ ૨ ૦૫ ૦૨c  ઉપ બ્રહ્માણિ વાઘતઃ ॥ ૧૧૪૭
૪ ૪ ૨ ૦૫ ૦૩a  ઇન્દ્રા યાહિ તૂતુજાન ઉપ બ્રહ્માણિ હરિવઃ ।
૪ ૪ ૨ ૦૫ ૦૩c  સુતે દધિષ્વ નશ્ચનઃ ॥ ૧૧૪૮

૪ ૪ ૨ ૦૬ ૦૧a  તમીડિષ્વ યો અર્ચિષા વના વિશ્વા પરિષ્વજત્ ।
૪ ૪ ૨ ૦૬ ૦૧c  કૃષ્ણા કૃણોતિ જિહ્વયા ॥ ૧૧૪૯
૪ ૪ ૨ ૦૬ ૦૨a  ય ઇદ્ધ આવિવાસતિ સુમ્નમિન્દ્રસ્ય મર્ત્યઃ ।

૪ ૪ ૨ ૦૬ ૦૨c ધુમ્રાય સુતરા અપઃ ॥ ૧૧૫૦
૪ ૪ ૨ ૦૬ ૦3a તા નો વાજવતીરિષ આશૂન્પિપૃતમર્વતઃ ।
૪ ૪ ૨ ૦૬ ૦3c એન્દ્રમગ્નિં ચ વોઢવે ॥ ૧૧૫૧

૪ ૪ ૨ ૦૭ ૦૧a પ્રો અયાસીદિન્દુરિન્દ્રસ્ય નિષ્કૃતઁ સખા સખ્યુર્ન પ્ર મિનાતિ સઙ્ગિરમ્ ।
૪ ૪ ૨ ૦૭ ૦૧c મર્ય ઇવ યુવતિભિઃ સમર્ષતિ સોમઃ કલશે શતયામ્ના પથા ॥ ૧૧૫૨
૪ ૪ ૨ ૦૭ ૦૨a પ્ર વો ધિયો મન્દ્રયુવો વિપન્યુવઃ પનસ્યુવઃ સંવરણેષ્વક્રમુઃ ।
૪ ૪ ૨ ૦૭ ૦૨c હરિં ક્રીડન્તમભ્યનૂષત સ્તુભોઽભિ ધેનવઃ પયસેદશિશ્રયુઃ ॥ ૧૧૫૩
૪ ૪ ૨ ૦૭ ૦3a આ નઃ સોમ સંયતં પિપ્યુષીમિષમિન્દો પવસ્વ પવમાન ઊર્મિણા ।
૪ ૪ ૨ ૦૭ ૦3c યા નો દોહતે ત્રિરહન્નસશ્ચુષી ક્ષુમદ્વાજવન્મધુમત્સુવીર્યમ્ ॥ ૧૧૫૪

૪ ૪ ૨ ૦૮ ૦૧a ન કિષ્ટં કર્મણા નશદ્યશ્ચકાર સદાવૃધમ્ ।
૪ ૪ ૨ ૦૮ ૦૧c ઇન્દ્રં ન યજ્ઞૈર્વિશ્વગૂર્ત્તમૃભ્વસમધૃષ્ટં ધૃષ્ણુમોજસા ॥ ૧૧૫૫
૪ ૪ ૨ ૦૮ ૦૨a અષાઢમુગ્રં પૃતનાસુ સાસહિં યસ્મિન્મહીરુરુજ્રયઃ ।
૪ ૪ ૨ ૦૮ ૦૨c સં ધેનવો જાયમાને અનોનવુર્દ્યાવઃ ક્ષામીરનોનવુઃ ॥ ૧૧૫૬

૪ ૪ ૨ ૦૯ ૦૧a સખાય આ નિ ષીદત પુનાનાય પ્ર ગાયત ।
૪ ૪ ૨ ૦૯ ૦૧c શિશું ન યજ્ઞૈઃ પરિ ભૂષત શ્રિયે ॥ ૧૧૫૭
૪ ૪ ૨ ૦૯ ૦૨a સમી વત્સં ન માતૃભિઃ સૃજતા ગયસાધનમ્ ।
૪ ૪ ૨ ૦૯ ૦૨c દેવાવ્યાઉં મદમભિ દ્વિશવસમ્ ॥ ૧૧૫૮
૪ ૪ ૨ ૦૯ ૦3a પુનાતા દક્ષસાધનં યથા શર્ધાય વીતયે ।
૪ ૪ ૨ ૦૯ ૦3c યથા મિત્રાય વરુણાય શન્તમમ્ ॥ ૧૧૫૯

૪ ૪ ૨ ૧૦ ૦૧a પ્ર વાજ્યક્ષાઃ સહસ્રધારસ્તિરઃ પવિત્રં વિ વારમવ્યમ્ ॥ ૧૧૬૦
૪ ૪ ૨ ૧૦ ૦૨a સ વાજ્યક્ષાઃ સહસ્રરેતા અદ્ભિર્મૃજાનો ગોભિઃ શ્રીણાનઃ ॥ ૧૧૬૧
૪ ૪ ૨ ૧૦ ૦3a પ્ર સોમ યાહીન્દ્રસ્ય કુક્ષા નૃભિર્યેમાનો અદ્રિભિઃ સુતઃ ॥ ૧૧૬૨

૪ ૪ ૨ ૧૧ ૦૧a યે સોમાસઃ પરાવતિ યે અર્વાવતિ સુન્વિરે ।
૪ ૪ ૨ ૧૧ ૦૧c યે વાદઃ શર્યણાવતિ ॥ ૧૧૬૩
૪ ૪ ૨ ૧૧ ૦૨a ય આર્જીકેષુ કૃત્વસુ યે મધ્યે પસ્ત્યાનામ્ ।
૪ ૪ ૨ ૧૧ ૦૨c યે વા જનેષુ પઞ્ચસુ ॥ ૧૧૬૪
૪ ૪ ૨ ૧૧ ૦3a તે નો વૃષ્ટિં દિવસ્પરિ પવન્તામા સુવીર્યમ્ ।
૪ ૪ ૨ ૧૧ ૦3c સ્વાના દેવાસ ઇન્દવઃ ॥ ૧૧૬૫

૪ ૪ ૨ ૧૨ ૦૧a આ તે વત્સો મનો યમત્પરમાચ્ચિત્સધસ્થાત્ ।
૪ ૪ ૨ ૧૨ ૦૧c અગ્ને ત્વાં કામયે ગિરા ॥ ૧૧૬૬

૪ ૪ ૨ ૧૨ ૦૨a પુરુત્રા હિ સદૃઙ્ઙસિ દિશો વિશ્વા અનુ પ્રભુઃ ।
૪ ૪ ૨ ૧૨ ૦૨c સમત્સુ ત્વા હવામહે ॥ ૧૧૬૭
૪ ૪ ૨ ૧૨ ૦૩a સમત્સ્વગ્નિમવસે વાજયન્તો હવામહે ।
૪ ૪ ૨ ૧૨ ૦૩c વાજેષુ ચિત્રરાધસમ્ ॥ ૧૧૬૮

૪ ૪ ૨ ૧૩ ૦૧a ત્વં ન ઇન્દ્રા ભર ઓજો નૃમ્ણઁ શતક્રતો વિચર્ષણે ।
૪ ૪ ૨ ૧૩ ૦૧c આ વીરં પૃતનાસહમ્ ॥ ૧૧૬૯
૪ ૪ ૨ ૧૩ ૦૨a ત્વઁ હિ નઃ પિતા વસો ત્વં માતા શતક્રતો બભૂવિથ ।
૪ ૪ ૨ ૧૩ ૦૨c અથા તે સુમ્નમીમહે ॥ ૧૧૭૦
૪ ૪ ૨ ૧૩ ૦૩a ત્વાઁ શુષ્મિન્પુરુહૂત વાજયન્તમુપ બ્રુવે સહસ્કૃત ।
૪ ૪ ૨ ૧૩ ૦૩c સ નો રાસ્વ સુવીર્યમ્ ॥ ૧૧૭૧
૪ ૪ ૨ ૧૩ ૦૪a યદિન્દ્ર ચિત્ર મ ઇહ નાસ્તિ ત્વાદાતમદ્રિવઃ ।
૪ ૪ ૨ ૧૩ ૦૪c રાધસ્તન્નો વિદદ્વસ ઉભયાહસ્ત્યા ભર ॥ ૧૧૭૨
૪ ૪ ૨ ૧૩ ૦૫a યન્મન્યસે વરેણ્યમિન્દ્ર દ્યુક્ષં તદા ભર ।
૪ ૪ ૨ ૧૩ ૦૫c વિદ્યામ તસ્ય તે વયમકૂપારસ્ય દાવનઃ ॥ ૧૧૭૩
૪ ૪ ૨ ૧૩ ૦૬a યત્તે દિક્ષુ પ્રરાધ્યં મનો અસ્તિ શ્રુતં બૃહત્ ।
૪ ૪ ૨ ૧૩ ૦૬c તેન દૃઢા ચિદદ્રિવ આ વાજં દર્ષિ સાતયે ॥ ૧૧૭૪

પઞ્ચમ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૪ ૫ ૧ ૦૧ ૦૧a શિશું જજ્ઞાનઁ હર્યતં મૃજન્તિ શુમ્ભન્તિ વિપ્રં મરુતો ગણેન ।
૪ ૫ ૧ ૦૧ ૦૧c કવિર્ગીર્ભિઃ કાવ્યેના કવિઃ સન્ત્સોમઃ પવિત્રમત્યેતિ રેભન્ ॥ ૧૧૭૫
૪ ૫ ૧ ૦૧ ૦૨a ઋષિમના ય ઋષિકૃત્સ્વર્ષાઃ સહસ્રનીથઃ પદવીઃ કવીનામ્ ।
૪ ૫ ૧ ૦૧ ૦૨c તૃતીયં ધામ મહિષઃ સિષાસન્ત્સોમો વિરાજમનુ રાજતિ ષ્ટુપ્ ॥ ૧૧૭૬
૪ ૫ ૧ ૦૧ ૦૩a ચમૂષચ્છ્યેનઃ શકુનો વિભૃત્વા ગોવિન્દુર્દ્રપ્સ આયુધાનિ બિભ્રત્ ।
૪ ૫ ૧ ૦૧ ૦૩c અપામૂર્મિં સચમાનઃ સમુદ્રં તુરીયં ધામ મહિષો વિવક્તિ ॥ ૧૧૭૭

૪ ૫ ૧ ૦૨ ૦૧a એતે સોમા અભિ પ્રિયમિન્દ્રસ્ય કામમક્ષરન્ ।
૪ ૫ ૧ ૦૨ ૦૧c વર્ધન્તો અસ્ય વીર્યમ્ ॥ ૧૧૭૮
૪ ૫ ૧ ૦૨ ૦૨a પુનાનાસશ્ચમૂષદો ગચ્છન્તો વાયુમશ્વિના ।
૪ ૫ ૧ ૦૨ ૦૨c તે નો ધત્ત સુવીર્યમ્ ॥ ૧૧૮૧
૪ ૫ ૧ ૦૨ ૦૩a ઇન્દ્રસ્ય સોમ રાધસે પુનાનો હાર્દિ ચોદય ।
૪ ૫ ૧ ૦૨ ૦૩c દેવાનાં યોનિમાસદમ્ ॥ ૧૧૮૦
૪ ૫ ૧ ૦૨ ૦૪a મૃજન્તિ ત્વા દશ ક્ષિપો હિન્વન્તિ સપ્ત ધીતયઃ ।
૪ ૫ ૧ ૦૨ ૦૪c અનુ વિપ્રા અમાદિષુઃ ॥ ૧૧૮૧

૪ ૫ ૧ ૦૨ ૦૫a દેવેભ્યસ્ત્વા મદાય કઁ સૃજાનમતિ મેષ્યઃ ।
૪ ૫ ૧ ૦૨ ૦૫c સ ગોભિર્વાસયામસિ ॥ ૧૧૮૨
૪ ૫ ૧ ૦૨ ૦૬a પુનાનઃ કલશેષ્વા વસ્ત્રાણ્યરુષો હરિઃ ।
૪ ૫ ૧ ૦૨ ૦૬c પરિ ગવ્યાન્યવ્યત ॥ ૧૧૮૩
૪ ૫ ૧ ૦૨ ૦૭a મઘોન આ પવસ્વ નો જહિ વિશ્વા અપ દ્વિષઃ ।
૪ ૫ ૧ ૦૨ ૦૭c ઇન્દો સખાયમા વિશ ॥ ૧૧૮૪
૪ ૫ ૧ ૦૨ ૦૮a નૃચક્ષસં ત્વા વયમિન્દ્રપીતઁ સ્વર્વિદમ્ ।
૪ ૫ ૧ ૦૨ ૦૮c ભક્ષીમહિ પ્રજામિષમ્ ॥ ૧૧૮૫
૪ ૫ ૧ ૦૨ ૦૯a વૃષ્ટિં દિવઃ પરિ સ્રવ દ્યુમ્નં પૃથિવ્યા અધિ ।
૪ ૫ ૧ ૦૨ ૦૯c સહો નઃ સોમ પૃત્સુ ધાઃ ॥ ૧૧૮૬

૪ ૫ ૧ ૦૩ ૦૧a સોમઃ પુનાનો અર્ષતિ સહસ્રધારો અત્યવિઃ ।
૪ ૫ ૧ ૦૩ ૦૧c વાયોરિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૧૧૮૭
૪ ૫ ૧ ૦૩ ૦૨a પવમાનમવસ્યવો વિપ્રમભિ પ્ર ગાયત ।
૪ ૫ ૧ ૦૩ ૦૨c સુષ્વાણં દેવવીતયે ॥ ૧૧૮૮
૪ ૫ ૧ ૦૩ ૦૩a પવન્તે વાજસાતયે સોમાઃ સહસ્રપાજસઃ ।
૪ ૫ ૧ ૦૩ ૦૩c ગૃણાના દેવવીતયે ॥ ૧૧૮૯
૪ ૫ ૧ ૦૩ ૦૪a ઉત નો વાજસાતયે પવસ્વ બૃહતીરિષઃ ।
૪ ૫ ૧ ૦૩ ૦૪c દ્યુમદિન્દો સુવીર્યમ્ ॥ ૧૧૯૦
૪ ૫ ૧ ૦૩ ૦૫a અત્યા હિયાના ન હેતૃભિરસૃગ્રં વાજસાતયે ।
૪ ૫ ૧ ૦૩ ૦૫c વિ વારમવ્યમાશવઃ ॥ ૧૧૯૧
૪ ૫ ૧ ૦૩ ૦૬a તે નઃ સહસ્રિણઁ રયિં પવન્તામા સુવીર્યમ્ ।
૪ ૫ ૧ ૦૩ ૦૬c સુવાના દેવાસ ઇન્દવઃ ॥ ૧૧૯૨
૪ ૫ ૧ ૦૩ ૦૭a વાશ્રા અર્ષન્તીન્દવોઽભિ વત્સં ન માતરઃ ।
૪ ૫ ૧ ૦૩ ૦૭c દધન્વિરે ગભસ્ત્યોઃ ॥ ૧૧૯૩
૪ ૫ ૧ ૦૩ ૦૮a જુષ્ટ ઇન્દ્રાય મત્સરઃ પવમાન કનિક્રદત્ ।
૪ ૫ ૧ ૦૩ ૦૮c વિશ્વા અપ દ્વિષો જહિ ॥ ૧૧૯૪
૪ ૫ ૧ ૦૩ ૦૯a અપઘ્નન્તો અરાવ્ણઃ પવમાનાઃ સ્વર્દૃશઃ ।
૪ ૫ ૧ ૦૩ ૦૯c યોનાવૃતસ્ય સીદત ॥ ૧૧૯૫

૪ ૫ ૧ ૦૪ ૦૧a સોમા અસૃગ્રમિન્દવઃ સુતા ઋતસ્ય ધારયા ।
૪ ૫ ૧ ૦૪ ૦૧c ઇન્દ્રાય મધુમત્તમાઃ ॥ ૧૧૯૬
૪ ૫ ૧ ૦૪ ૦૨a અભિ વિપ્રા અનૂષત ગાવો વત્સં ન ધેનવઃ ।

૪ ૫ ૧ ૦૪ ૦૨c ઇન્દ્રઁ સોમસ્ય પીતયે ॥ ૧૧૯૭
૪ ૫ ૧ ૦૪ 03a મદચ્યુત્ક્ષેતિ સાદને સિન્ધોરૂર્મા વિપશ્ચિત્ ।
૪ ૫ ૧ ૦૪ 03c સોમો ગૌરી અધિ શ્રિતઃ ॥ ૧૧૯૮
૪ ૫ ૧ ૦૪ ૦૪a દિવો નાભા વિચક્ષણોઽવ્યો વારે મહીયતે ।
૪ ૫ ૧ ૦૪ ૦૪c સોમો યઃ સુક્રતુઃ કવિઃ ॥ ૧૧૯૯
૪ ૫ ૧ ૦૪ ૦૫a યઃ સોમઃ કલશેષ્વા અન્તઃ પવિત્ર આહિતઃ ।
૪ ૫ ૧ ૦૪ ૦૫c તમિન્દુઃ પરિ ષસ્વજે ॥ ૧૨૦૦
૪ ૫ ૧ ૦૪ ૦૬a પ્ર વાચમિન્દુરિષ્યતિ સમુદ્રસ્યાધિ વિષ્ટપિ ।
૪ ૫ ૧ ૦૪ ૦૬c જિન્વન્કોશં મધુશ્ચુતમ્ ॥ ૧૨૦૧
૪ ૫ ૧ ૦૪ ૦૭a નિત્યસ્તોત્રો વનસ્પતિર્ધેનામન્તઃ સબર્દુઘામ્ ।
૪ ૫ ૧ ૦૪ ૦૭c હિન્વાનો માનુષા યુજા ॥ ૧૨૦૨
૪ ૫ ૧ ૦૪ ૦૮a આ પવમાન ધારય રયિઁ સહસ્રવર્ચસમ્ ।
૪ ૫ ૧ ૦૪ ૦૮c અસ્મે ઇન્દો સ્વાભુવમ્ ॥ ૧૨૦૩
૪ ૫ ૧ ૦૪ ૦૯a અભિ પ્રિયા દિવઃ કવિર્વિપ્રઃ સ ધારયા સુતઃ ।
૪ ૫ ૧ ૦૪ ૦૯c સોમો હિન્વે પરાવતિ ॥ ૧૨૦૪

૪ ૫ ૧ ૦૫ ૦૧a ઉત્તે શુષ્માસ ઈરતે સિન્ધોરૂર્મેરિવ સ્વનઃ ।
૪ ૫ ૧ ૦૫ ૦૧c વાણસ્ય ચોદયા પવિમ્ ॥ ૧૨૦૫
૪ ૫ ૧ ૦૫ ૦૨a પ્રસવે ત ઉદીરતે તિસ્રો વાચો મખસ્યુવઃ ।
૪ ૫ ૧ ૦૫ ૦૨c યદવ્ય એષિ સાનવિ ॥ ૧૨૦૬
૪ ૫ ૧ ૦૫ 03a અવ્યા વારૈઃ પરિ પ્રિયઁ હરિઁ હિન્વન્ત્યદ્રિભિઃ ।
૪ ૫ ૧ ૦૫ 03c પવમાનં મધુશ્ચુતમ્ ॥ ૧૨૦૭
૪ ૫ ૧ ૦૫ ૦૪a આ પવસ્વ મદિન્તમ પવિત્રં ધારયા કવે ।
૪ ૫ ૧ ૦૫ ૦૪c અર્કસ્ય યોનિમાસદમ્ ॥ ૧૨૦૮
૪ ૫ ૧ ૦૫ ૦૫a સ પવસ્વ મદિન્તમ ગોભિરઞ્જાનો અક્તુભિઃ ।
૪ ૫ ૧ ૦૫ ૦૫c એન્દ્રસ્ય જઠરં વિશ ॥ ૧૨૦૯

૪ ૫ ૧ ૦૬ ૦૧a અયા વીતી પરિ સ્રવ યસ્ત ઇન્દો મદેષ્વા ।
૪ ૫ ૧ ૦૬ ૦૧c અવાહન્નવતીર્નવ ॥ ૧૨૧૦
૪ ૫ ૧ ૦૬ ૦૨a પુરઃ સદ્ય ઇત્થાધિયે દિવોદાસાય શમ્બરમ્ ।
૪ ૫ ૧ ૦૬ ૦૨c અધ ત્યં તુર્વશં યદુમ્ ॥ ૧૨૧ચ્લ્સ્દર્
૪ ૫ ૧ ૦૬ 03a પરિ નો અશ્વમશ્વવિદ્ગોમદિન્દો હિરણ્યવત્ ।
૪ ૫ ૧ ૦૬ 03c ક્ષરા સહસ્રિણીરિષઃ ॥ ૧૨૧૨

૪ ૫ ૧ ०७ ०१a અપઘ્નન્પવતે મૃધોऽપ સોમો અરાવ્ણઃ ।
૪ ૫ ૧ ०७ ०१c ગચ્છન્નિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૧૨૧૩
૪ ૫ ૧ ०७ ०२a મહો નો રાય આ ભર પવમાન જહી મૃધઃ ।
૪ ૫ ૧ ०७ ०२c રાસ્વેન્દો વીરવદ્યશઃ ॥ ૧૨૧૪
૪ ૫ ૧ ०७ 03a ન ત્વા શતં ચ ન હ્રુતો રાધો દિત્સન્તમા મિનન્ ।
૪ ૫ ૧ ०७ 03c યત્પુનાનો મખસ્યસે ॥ ૧૨૧૫

૪ ૫ ૧ ०८ ०१a અયા પવસ્વ ધારયા યયા સૂર્યમરોચયઃ ।
૪ ૫ ૧ ०८ ०१c હિન્વાનો માનુષીરપઃ ॥ ૧૨૧૬
૪ ૫ ૧ ०८ ०२a અયુક્ત સૂર એતશં પવમાનો મનાવધિ ।
૪ ૫ ૧ ०८ ०२c અન્તરિક્ષેણ યાતવે ॥ ૧૨૧૭
૪ ૫ ૧ ०८ 03a ઉત ત્યા હરિતો રથે સૂરો અયુક્ત યાતવે ।
૪ ૫ ૧ ०८ 03c ઇન્દુરિન્દ્ર ઇતિ બ્રુવન્ ॥ ૧૨૧૮

૪ ૫ ૧ ०૯ ०१a અગ્નિં વો દેવમગ્નિભિઃ સજોષા યજિષ્ઠં દૂતમધ્વરે કૃણુધ્વમ્ ।
૪ ૫ ૧ ०૯ ०१c યો મર્ત્યેષુ નિધ્રુવિરૃતાવા તપુર્મૂર્ધા ઘૃતાન્નઃ પાવકઃ ॥ ૧૨૧૯
૪ ૫ ૧ ०૯ ०२a પ્રોથદશ્વો ન યવસેऽવિષ્યન્યદા મહઃ સંવરણાદ્વ્યસ્થાત્ ।
૪ ૫ ૧ ०૯ ०२c આદસ્ય વાતો અનુ વાતિ શોચિરધ સ્મ તે વ્રજનં કૃષ્ણમસ્તિ ॥ ૧૨૨૦
૪ ૫ ૧ ०૯ 03a ઉદ્યસ્ય તે નવજાતસ્ય વૃષ્ણોऽગ્ને ચરન્ત્યજરા ઇધાનાઃ ।
૪ ૫ ૧ ०૯ 03c અચ્છા દ્યામરુષો ધૂમ એષિ સં દૂતો અગ્ન ઈયસે હિ દેવાન્ ॥ ૧૨૨૧

૪ ૫ ૧ ૧० ०१a તમિન્દ્રં વાજયામસિ મહે વૃત્રાય હન્તવે ।
૪ ૫ ૧ ૧० ०१c સ વૃષા વૃષભો ભુવત્ ॥ ૧૨૨૨
૪ ૫ ૧ ૧० ०२a ઇન્દ્રઃ સ દામને કૃત ઓજિષ્ઠઃ સ બલે હિતઃ ।
૪ ૫ ૧ ૧० ०२c દ્યુમ્ની શ્લોકી સ સોમ્યઃ ॥ ૧૨૨૩
૪ ૫ ૧ ૧० 03a ગિરા વજ્રો ન સમ્ભૃતઃ સબલો અનપચ્યુતઃ ।
૪ ૫ ૧ ૧० 03c વવક્ષ ઉગ્રો અસ્તૃતઃ ॥ ૧૨૨૪

૪ ૫ ૧ ૧૧ ०१a અધ્વર્યો અદ્રિભિઃ સુતઁ સોમં પવિત્ર આ નય ।
૪ ૫ ૧ ૧૧ ०१c પુનાહીન્દ્રાય પાતવે ॥ ૧૨૨૫
૪ ૫ ૧ ૧૧ ०२a તવ ત્ય ઇન્દો અન્ધસો દેવા મધોર્વ્યાશત ।
૪ ૫ ૧ ૧૧ ०२c પવમાનસ્ય મરુતઃ ॥ ૧૨૨૬
૪ ૫ ૧ ૧૧ 03a દિવઃ પીયૂષમુત્તમઁ સોમમિન્દ્રાય વજ્રિણે ।
૪ ૫ ૧ ૧૧ 03c સુનોતા મધુમત્તમમ્ ॥ ૧૨૨૭

૪ ૫ ૧ ૧૨ ૦૧a  ધર્ત્તા દિવઃ પવતે કૃત્વ્યો રસો દક્ષો દેવાનામનુમાદ્યો નૃભિઃ ।
૪ ૫ ૧ ૧૨ ૦૧c  હરિઃ સૃજાનો અત્યો ન સત્વભિર્વૃથા પાજાँસિ કૃણુષે નદીષ્વા ॥ ૧૨૨૮
૪ ૫ ૧ ૧૨ ૦૨a  શૂરો ન ધત્ત આયુધા ગભસ્ત્યોઃ સ્વાઉઃ સિષાસન્રથિરો ગવિષ્ટિષુ ।
૪ ૫ ૧ ૧૨ ૦૨c  ઇન્દ્રસ્ય શુષ્મમીરયન્નપસ્યુભિરિન્દુર્હિન્વાનો અજ્યતે મનીષિભિઃ ॥ ૧૨૨૯
૪ ૫ ૧ ૧૨ ૦૩a  ઇન્દ્રસ્ય સોમ પવમાન ઊર્મિણા તવિષ્યમાણો જઠરેષ્વા વિશ ।
૪ ૫ ૧ ૧૨ ૦૩c  પ્ર નઃ પિન્વ વિદ્યુદભ્રેવ રોદસી ધિયા નો વાજાँ ઉપ માહિ શશ્વતઃ ॥ ૧૨૩૦

૪ ૫ ૧ ૧૩ ૦૧a  યદિન્દ્ર પ્રાગપાગુદઙ્ન્યગ્વા હૂયસે નૃભિઃ ।
૪ ૫ ૧ ૧૩ ૦૧c  સિમા પુરૂ નૃષૂતો અસ્યાનવેઽસિ પ્રશર્ધ તુર્વશે ॥ ૧૨૩૧
૪ ૫ ૧ ૧૩ ૦૨a  યદ્વા રુમે રુશમે શ્યાવકે કૃપ ઇન્દ્ર માદયસે સચા ।
૪ ૫ ૧ ૧૩ ૦૨c  કણ્વાસસ્ત્વા સ્તોમેભિર્બ્રહ્મવાહસ ઇન્દ્રા યચ્છન્ત્યા ગહિ ॥ ૧૨૩૨

૪ ૫ ૧ ૧૪ ૦૧a  ઉભયँ શ઼ૃણવચ્ચ ન ઇન્દ્રો અર્વાગિદં વચઃ ।
૪ ૫ ૧ ૧૪ ૦૧c  સત્રાચ્યા મઘવાન્ત્સોમપીતયે ધિયા શવિષ્ઠ આ ગમત્ ॥ ૧૨૩૩
૪ ૫ ૧ ૧૪ ૦૨a  તँ હિ સ્વરાજં વૃષભં તમોજસા ધિષણે નિષ્ટતક્ષતુઃ ।
૪ ૫ ૧ ૧૪ ૦૨c  ઉતોપમાનાં પ્રથમો નિ ષીદસિ સોમકામँ હિ તે મનઃ ॥ ૧૨૩૪

૪ ૫ ૧ ૧૫ ૦૧a  પવસ્વ દેવ આયુષગિન્દ્રં ગચ્છતુ તે મદઃ ।
૪ ૫ ૧ ૧૫ ૦૧c  વાયુમા રોહ ધર્મણા ॥ ૧૨૩૫
૪ ૫ ૧ ૧૫ ૦૨a  પવમાન નિ તોશસે રયિँ સોમ શ્રવાય્યમ્ ।
૪ ૫ ૧ ૧૫ ૦૨c  ઇન્દો સમુદ્રમા વિશ ॥ ૧૨૩૬
૪ ૫ ૧ ૧૫ ૦૩a  અપઘ્નન્પવસે મૃધઃ ક્રતુવિત્સોમ મત્સરઃ ।
૪ ૫ ૧ ૧૫ ૦૩c  નુદસ્વાદેવયું જનમ્ ॥ ૧૨૩૭

૪ ૫ ૧ ૧૬ ૦૧a  અભી નો વાજસાતમँ રયિમર્ષ શતસ્પૃહમ્ ।
૪ ૫ ૧ ૧૬ ૦૧c  ઇન્દો સહસ્રભર્ણસં તુવિદ્યુમ્નં વિભાસહમ્ ॥ ૧૨૩૮
૪ ૫ ૧ ૧૬ ૦૨a  વયં તે અસ્ય રાધસો વસોર્વસો પુરુસ્પૃહઃ ।
૪ ૫ ૧ ૧૬ ૦૨c  નિ નેદિષ્ઠતમા ઇષઃ સ્યામ સુમ્ને તે આધ્રિગો ॥ ૧૨૩૯
૪ ૫ ૧ ૧૬ ૦૩a  પરિ સ્ય સ્વાનો અક્ષરિદિન્દુરવ્યે મદચ્યુતઃ ।
૪ ૫ ૧ ૧૬ ૦૩c  ધારા ય ઊર્ધ્વો અધ્વરે ભ્રાજા ન યાતિ ગવ્યયુઃ ॥ ૧૨૪૦
૪ ૫ ૧ ૧૬ ૦૪a  પવસ્વ સોમ મહાન્ત્સમુદ્રઃ પિતા દેવાનાં વિશ્વાભિ ધામ ॥ ૧૨૪૧
૪ ૫ ૧ ૧૬ ૦૫a  શુક્રઃ પવસ્વ દેવેભ્યઃ સોમ દિવે પૃથિવ્યૈ શં ચ પ્રજાભ્યઃ ॥ ૧૨૪૨
૪ ૫ ૧ ૧૬ ૦૬a  દિવો ધર્ત્તાસિ શુક્રઃ પીયૂષઃ સત્યે વિધર્મન્વાજી પવસ્વ ॥ ૧૨૪૩

૪ ૫ ૧ ૧૮ ૦૧a  પ્રેષ્ઠં વો અતિથિँ સ્તુષે મિત્રમિવ પ્રિયમ્ ।

૪ ૫ ૧ ૧૮ ૦૧c અગ્ને રથં ન વેદ્યમ્ ॥ ૧૨૪૪
૪ ૫ ૧ ૧૮ ૦૨a કવિમિવ પ્રશઁસ્યં યં દેવાસ ઇતિ દ્વિતા ।
૪ ૫ ૧ ૧૮ ૦૨c નિ મર્ત્યેષ્વાદધુઃ ॥ ૧૨૪૫
૪ ૫ ૧ ૧૮ ૦૩a ત્વં યવિષ્ઠ દાશુષો નૄઁપાહિ શ ૃણુહી ગિરઃ ।
૪ ૫ ૧ ૧૮ ૦૩c રક્ષા તોકમુત ત્મના ॥ ૧૨૪૬

૪ ૫ ૧ ૧૯ ૦૧a એન્દ્ર નો ગધિ પ્રિય સત્રાજિદગોહ્ય ।
૪ ૫ ૧ ૧૯ ૦૧c ગિરિર્ન વિશ્વતઃ પૃથુઃ પતિર્દિવઃ ॥ ૧૨૪૭
૪ ૫ ૧ ૧૯ ૦૨a અભિ હિ સત્ય સોમપા ઉભે બભૂથ રોદસી ।
૪ ૫ ૧ ૧૯ ૦૨c ઇન્દ્રાસિ સુન્વતો વૃધઃ પતિર્દિવઃ ॥ ૧૨૪૮
૪ ૫ ૧ ૧૯ ૦૩a ત્વઁ હિ શશ્વતીનામિન્દ્ર ધર્ત્તા પુરામસિ ।
૪ ૫ ૧ ૧૯ ૦૩c હન્તા દસ્યોર્મનોર્વૃધઃ પતિર્દિવઃ ॥ ૧૨૪૯

૪ ૫ ૧ ૨૦ ૦૧a પુરાં ભિન્દુર્યુવા કવિરમિતૌજા અજાયત ।
૪ ૫ ૧ ૨૦ ૦૧c ઇન્દ્રો વિશ્વસ્ય કર્મણો ધર્ત્તા વજ્રી પુરુષ્ટુતઃ ॥ ૧૨૫૦
૪ ૫ ૧ ૨૦ ૦૨a ત્વં વલસ્ય ગોમતોઽપાવરદ્રિવો બિલમ્ ।
૪ ૫ ૧ ૨૦ ૦૨c ત્વાં દેવા અબિભ્યુષસ્તુજ્યમાનાસ આવિષુઃ ॥ ૧૨૫૧
૪ ૫ ૧ ૨૦ ૦૩a ઇન્દ્રમીશાનમોજસાભિ સ્તોમૈરનૂષત ।
૪ ૫ ૧ ૨૦ ૦૩c સહસ્રં યસ્ય રાતય ઉત વા સન્તિ ભૂયસીઃ ॥ ૧૨૫૨

પઞ્ચમ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૫ ૨ ૦૧ ૦૧a અક્રાન્ત્સમુદ્રઃ પ્રથમે વિધર્મં જનયન્પ્રજા ભુવનસ્ય ગોપાઃ ।
૪ ૫ ૨ ૦૧ ૦૧c વૃષા પવિત્રે અધિ સાનો અવ્યે બૃહત્સોમો વાવૃધે સ્વાનો અદ્રિઃ ॥ ૧૨૫૩
૪ ૫ ૨ ૦૧ ૦૨a મત્સિ વાયુમિષ્ટયે રાધસે ચ મત્સિ મિત્રાવરુણા પૂયમાનઃ ।
૪ ૫ ૨ ૦૧ ૦૨c મત્સિ શર્ધો મારુતં મત્સિ દેવાન્મત્સિ દ્યાવાપૃથિવી દેવ સોમ ॥ ૧૨૫૪
૪ ૫ ૨ ૦૧ ૦૩a મહત્તત્સોમો મહિષશ્ચકારાપાં યદ્ગર્ભોઽવૃણીત દેવાન્ ।
૪ ૫ ૨ ૦૧ ૦૩c અદધાદિન્દ્રે પવમાન ઓજોઽજનયત્સૂર્યે જ્યોતિરિન્દુઃ ॥ ૧૨૫૫

૪ ૫ ૨ ૦૨ ૦૧a એષ દેવો અમર્ત્યઃ પર્ણવીરિવ દીયતે ।
૪ ૫ ૨ ૦૨ ૦૧c અભિ દ્રોણાન્યાસદમ્ ॥ ૧૨૫૬
૪ ૫ ૨ ૦૨ ૦૨a એષ વિપ્રૈરભિષ્ટુતોઽપો દેવો વિ ગાહતે ।
૪ ૫ ૨ ૦૨ ૦૨c દધદ્રત્નાનિ દાશુષે ॥ ૧૨૫૭
૪ ૫ ૨ ૦૨ ૦૩a એષ વિશ્વાનિ વાર્યા શૂરો યન્નિવ સત્વભિઃ ।
૪ ૫ ૨ ૦૨ ૦૩c પવમાનઃ સિષાસતિ ॥ ૧૨૫૮

૪ ૫ ૨ ૦૨ ૦૪a એષ દેવો રથર્યતિ પવમાનો દિશસ્યતિ ।
૪ ૫ ૨ ૦૨ ૦૪c આવિષ્કૃણોતિ વગ્વનુમ્ ॥ ૧૨૫૯
૪ ૫ ૨ ૦૨ ૦૫a એષ દેવો વિપન્યુભિઃ પવમાન ઋતાયુભિઃ ।
૪ ૫ ૨ ૦૨ ૦૫c હરિર્વાજાય મૃજ્યતે ॥ ૧૨૬૦
૪ ૫ ૨ ૦૨ ૦૬a એષ દેવો વિપા કૃતોઽતિ હ્વરાँસિ ધાવતિ ।
૪ ૫ ૨ ૦૨ ૦૬c પવમાનો અદાભ્યઃ ॥ ૧૨૬૧
૪ ૫ ૨ ૦૨ ૦૭a એષ દિવં વિ ધાવતિ તિરો રજાँસિ ધારયા ।
૪ ૫ ૨ ૦૨ ૦૭c પવમાનઃ કનિક્રદત્ ॥ ૧૨૬૨
૪ ૫ ૨ ૦૨ ૦૮a એષ દિવં વ્યાસરત્તિરો રજાँસ્યસ્પૃતઃ ।
૪ ૫ ૨ ૦૨ ૦૮c પવમાનઃ સ્વધ્વરઃ ॥ ૧૨૬૩
૪ ૫ ૨ ૦૨ ૦૯a એષ પ્રત્નેન જન્મના દેવો દેવેભ્યઃ સુતઃ ।
૪ ૫ ૨ ૦૨ ૦૯c હરિઃ પવિત્રે અર્ષતિ ॥ ૧૨૬૪
૪ ૫ ૨ ૦૨ ૧૦a એષ ઉ સ્ય પુરુવ્રતો જજ્ઞાનો જનયન્નિષઃ ।
૪ ૫ ૨ ૦૨ ૧૦c ધારયા પવતે સુતઃ ॥ ૧૨૬૫

૪ ૫ ૨ ૦૩ ૦૧a એષ ધિયા યાત્યણ્વ્યા શૂરો રથેભિરાશુભિઃ ।
૪ ૫ ૨ ૦૩ ૦૧c ગચ્છન્નિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૧૨૬૬
૪ ૫ ૨ ૦૩ ૦૨a એષ પુરૂ ધિયાયતે બૃહતે દેવતાતયે ।
૪ ૫ ૨ ૦૩ ૦૨c યત્રામૃતાસ આશત ॥ ૧૨૬૭
૪ ૫ ૨ ૦૩ ૦૩a એતં મૃજન્તિ મર્જ્યમુપ દ્રોણેષ્વાયવઃ ।
૪ ૫ ૨ ૦૩ ૦૩c પ્રચક્રાણં મહીરિષઃ ॥ ૧૨૬૮
૪ ૫ ૨ ૦૩ ૦૪a એષ હિતો વિ નીયતેઽન્તઃ શુન્ધ્યાવતા પથા ।
૪ ૫ ૨ ૦૩ ૦૪c યદી તુઞ્જન્તિ ભૂર્ણયઃ ॥ ૧૨૬૯
૪ ૫ ૨ ૦૩ ૦૫a એષ રુક્મિભિરીયતે વાજિ શુભ્રેભિરँશુભિઃ ।
૪ ૫ ૨ ૦૩ ૦૫c પતિઃ સિન્ધૂનાં ભવન્ ॥ ૧૨૭૦
૪ ૫ ૨ ૦૩ ૦૬a એષ શૃઙ્ગાણિ દોધુવચ્છિશીતે યૂથ્યોઉ વૃષા ।
૪ ૫ ૨ ૦૩ ૦૬c નૃમ્ણા દધાન ઓજસા ॥ ૧૨૭૧
૪ ૫ ૨ ૦૩ ૦૭a એષ વસૂનિ પિબ્દનઃ પરુષા યયિવाँ અતિ ।
૪ ૫ ૨ ૦૩ ૦૭c અવ શાદેષુ ગચ્છતિ ॥ ૧૨૭૨
૪ ૫ ૨ ૦૩ ૦૮a એતમુ ત્યં દશ ક્ષિપો હરिँ હિવન્તિ યાતવે ।
૪ ૫ ૨ ૦૩ ૦૮c સ્વાયુધં મદિન્તમમ્ ॥ ૧૨૭૩

૪ ૫ ૨ ૦૪ ૦૧a એષ ઉ સ્ય વૃષા રથોઽવ્યા વારેભિરવ્યત ।

૪ ૫ ૨ ૦૪ ૦૧c ગચ્છન્વાજઁ સહસ્રિણમ્ ॥ ૧૨૭૪
૪ ૫ ૨ ૦૪ ૦૨a એતં ત્રિતસ્ય યોષણો હરિઁ હિન્વન્ત્યદ્રિભિઃ ।
૪ ૫ ૨ ૦૪ ૦૨c ઇન્દુમિન્દ્રાય પીતયે ॥ ૧૨૭૫
૪ ૫ ૨ ૦૪ ૦૩a એષ સ્ય માનુષીષ્વા શ્યેનો ન વિક્ષુ સીદતિ ।
૪ ૫ ૨ ૦૪ ૦૩c ગચ્છં જારો ન યોષિતમ્ ॥ ૧૨૭૬
૪ ૫ ૨ ૦૪ ૦૪a એષ સ્ય મદ્યો રસોઽવ ચષ્ટે દિવઃ શિશુઃ ।
૪ ૫ ૨ ૦૪ ૦૪c ય ઇન્દુર્વારમાવિશત્ ॥ ૧૨૭૭
૪ ૫ ૨ ૦૪ ૦૫a એષ સ્ય પીતયે સુતો હરિરર્ષતિ ધર્ણસિઃ ।
૪ ૫ ૨ ૦૪ ૦૫c ક્રન્દન્યોનિમભિ પ્રિયમ્ ॥ ૧૨૭૮
૪ ૫ ૨ ૦૪ ૦૬a એતં ત્યઁ હરિતો દશ મર્મૃજ્યન્તે અપસ્યુવઃ ।
૪ ૫ ૨ ૦૪ ૦૬c યાભિર્મદાય શુમ્ભતે ॥ ૧૨૭૯

૪ ૫ ૨ ૦૫ ૦૧a એષ વાજી હિતો નૃભિર્વિશ્વવિન્મનસસ્પતિઃ ।
૪ ૫ ૨ ૦૫ ૦૧c અવ્યો વારં વિ ધાવતિ ॥ ૧૨૮૦
૪ ૫ ૨ ૦૫ ૦૨a એષ પવિત્રે અક્ષરત્સોમો દેવેભ્યઃ સુતઃ ।
૪ ૫ ૨ ૦૫ ૦૨c વિશ્વા ધામાન્યાવિશન્ ॥ ૧૨૮૧
૪ ૫ ૨ ૦૬ ૦૩a એષ દેવઃ શુભાયતેઽધિ યોનાવમર્ત્યઃ ।
૪ ૫ ૨ ૦૬ ૦૩c વૃત્રહા દેવવીતમઃ ॥ ૧૨૮૨
૪ ૫ ૨ ૦૭ ૦૪a એષ વૃષા કનિક્રદદ્દશભિર્જામિભિર્યતઃ ।
૪ ૫ ૨ ૦૭ ૦૪c અભિ દ્રોણાનિ ધાવતિ ॥ ૧૨૮૩
૪ ૫ ૨ ૦૮ ૦૫a એષ સૂર્યમરોચયત્પવમાનો અધિ દ્યવિ ।
૪ ૫ ૨ ૦૮ ૦૫c પવિત્રે મત્સરો મદઃ ॥ ૧૨૮૪
૪ ૫ ૨ ૦૯ ૦૬a એષ સૂર્યેણ હાસતે સંવસાનો વિવસ્વતા ।
૪ ૫ ૨ ૦૯ ૦૬c પતિર્વાચો અદાભ્યઃ ॥ ૧૨૮૫

૪ ૫ ૨ ૦૬ ૦૧a એષ કવિરભિષ્ટુતઃ પવિત્રે અધિ તોશતે ।
૪ ૫ ૨ ૦૬ ૦૧c પુનાનો ઘ્નન્નપ દ્વિષઃ ॥ ૧૨૮૬
૪ ૫ ૨ ૦૬ ૦૨a એષ ઇન્દ્રાય વાયવે સ્વર્જિત્પરિ ષિચ્યતે ।
૪ ૫ ૨ ૦૬ ૦૨c પવિત્રે દક્ષસાધનઃ ॥ ૧૨૮૭
૪ ૫ ૨ ૦૬ ૦૩a એષ નૃભિર્વિ નીયતે દિવો મૂર્ધા વૃષા સુતઃ ।
૪ ૫ ૨ ૦૬ ૦૩c સોમો વનેષુ વિશ્વવિત્ ॥ ૧૨૮૮
૪ ૫ ૨ ૦૬ ૦૪a એષ ગવ્યુરચિક્રદત્પવમાનો હિરણ્યયુઃ ।
૪ ૫ ૨ ૦૬ ૦૪c ઇન્દુઃ સત્રાજિદસ્તૃતઃ ॥ ૧૨૮૯

૪ ૫ ૨ ૦૬ ૦૫a એષ શુષ્મ્યસિષ્યદદન્તરિક્ષે વૃષા હરિઃ ।
૪ ૫ ૨ ૦૬ ૦૫c પુનાન ઇન્દુરિન્દ્રમા ॥ ૧૨૯૦
૪ ૫ ૨ ૦૬ ૦૬a એષ શુષ્મ્યદાભ્યઃ સોમઃ પુનાનો અર્ષતિ ।
૪ ૫ ૨ ૦૬ ૦૬c દેવાવીરઘશઁસહા ॥ ૧૨૯૧

૪ ૫ ૨ ૦૭ ૦૧a સ સુતઃ પીતયે વૃષા સોમઃ પવિત્રે અર્ષતિ ।
૪ ૫ ૨ ૦૭ ૦૧c વિઘ્નન્રક્ષાઁસિ દેવયુઃ ॥ ૧૨૯૨
૪ ૫ ૨ ૦૭ ૦૨a સ પવિત્રે વિચક્ષણો હરિરર્ષતિ ધર્ણસિઃ ।
૪ ૫ ૨ ૦૭ ૦૨c અભિ યોનિં કનિક્રદત્ ॥ ૧૨૯૩
૪ ૫ ૨ ૦૭ ૦૩a સ વાજી રોચના દિવઃ પવમાનો વિ ધાવતિ ।
૪ ૫ ૨ ૦૭ ૦૩c રક્ષોહા વારમવ્યયમ્ ॥ ૧૨૯૪
૪ ૫ ૨ ૦૭ ૦૪a સ ત્રિતસ્યાધિ સાનવિ પવમાનો અરોચયત્ ।
૪ ૫ ૨ ૦૭ ૦૪c જામિભિઃ સૂર્યં સહ ॥ ૧૨૯૫
૪ ૫ ૨ ૦૭ ૦૫a સ વૃત્રહા વૃષા સુતો વરિવોવિદદાભ્યઃ ।
૪ ૫ ૨ ૦૭ ૦૫c સોમો વાજમિવાસરત્ ॥ ૧૨૯૬
૪ ૫ ૨ ૦૭ ૦૬a સ દેવઃ કવિનેષિતોઽભિ દ્રોણાનિ ધાવતિ ।
૪ ૫ ૨ ૦૭ ૦૬c ઇન્દુરિન્દ્રાય મઁહયન્ ॥ ૧૨૯૭

૪ ૫ ૨ ૦૮ ૦૧a યઃ પાવમાનીરધ્યેત્યૃષિભિઃ સમ્ભૃતઁ રસમ્ ।
૪ ૫ ૨ ૦૮ ૦૧c સર્વં સ પૂતમશ્નાતિ સ્વદિતં માતરિશ્વના ॥ ૧૨૯૮
૪ ૫ ૨ ૦૮ ૦૨a પાવમાનીર્યો અધ્યેત્યૃષિભિઃ સમ્ભૃતઁ રસમ્ ।
૪ ૫ ૨ ૦૮ ૦૨c તસ્મૈ સરસ્વતી દુહે ક્ષીરઁ સર્પિર્મધૂદકમ્ ॥ ૧૨૯૯
૪ ૫ ૨ ૦૮ ૦૩a પાવમાનીઃ સ્વસ્ત્યયનીઃ સુદુઘા હિ ઘૃતશ્ચુતઃ ।
૪ ૫ ૨ ૦૮ ૦૩c ઋષિભિઃ સમ્ભૃતો રસો બ્રાહ્મણેષ્વમૃતઁ હિતમ્ ॥ ૧૩૦૦
૪ ૫ ૨ ૦૮ ૦૪a પાવમાનીર્દધન્તુ ન ઇમં લોકમથો અમુમ્ ।
૪ ૫ ૨ ૦૮ ૦૪c કામાન્ત્સમર્ધયન્તુ નો દેવીર્દેવૈઃ સમાહૃતાઃ ॥ ૧૩૦૧
૪ ૫ ૨ ૦૮ ૦૫a યેન દેવાઃ પવિત્રેણાત્માનં પુનતે સદા ।
૪ ૫ ૨ ૦૮ ૦૫c તેન સહસ્રધારેણ પાવમાનીઃ પુનન્તુ નઃ ॥ ૧૩૦૨
૪ ૫ ૨ ૦૮ ૦૬a પાવમાનીઃ સ્વસ્ત્યયનીસ્તાભિર્ગચ્છતિ નાન્દનમ્ ।
૪ ૫ ૨ ૦૮ ૦૬c પુણ્યાઁશ્ચ ભક્ષાન્ભક્ષયત્યમૃતત્વં ચ ગચ્છતિ ॥ ૧૩૦૩

૪ ૫ ૨ ૦૯ ૦૧a અગન્મ મહા નમસા યવિષ્ઠં યો દીદાય સમિદ્ધઃ સ્વે દુરોણે ।
૪ ૫ ૨ ૦૯ ૦૧c ચિત્રભાનુઁ રોદસી અન્તરુર્વી સ્વાહુતં વિશ્વતઃ પ્રત્યઞ્ચમ્ ॥ ૧૩૦૪
૪ ૫ ૨ ૦૯ ૦૨a સ મહ્ના વિશ્વા દુરિતાનિ સાહ્વાનગ્નિ ષ્ટવે દમ આ જાતવેદાઃ ।

૪ ૫ ૨ ૦૯ ०२c  સ નો રક્ષિષદ્દુરિતાદવદ્યાદસ્માન્ગૃણત ઉત નો મઘોનઃ ॥ ૧૩૦૫
૪ ૫ ૨ ૦૯ ०3a  ત્વં વરુણ ઉત મિત્રો અગ્રે ત્વાં વર્ધન્તિ મતિભિર્વસિષ્ઠાઃ ।
૪ ૫ ૨ ૦૯ ०3c  ત્વે વસુ સુષણનાનિ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૧૩૦૬

૪ ૫ ૨ ૧૦ ०१a  મહાઁ ઇન્દ્રો ય ઓજસા પર્જન્યો વૃષ્ટિમાઁ ઇવ ।
૪ ૫ ૨ ૧૦ ०१c  સ્તોમૈર્વત્સસ્ય વાવૃધે ॥ ૧૩૦૭
૪ ૫ ૨ ૧૦ ०१a  કણ્વા ઇન્દ્રં યદક્રત સ્તોમૈર્યજ્ઞસ્ય સાધનમ્ ।
૪ ૫ ૨ ૧૦ ०१c  જામિ બ્રુવત આયુધા ॥ ૧૩૦૮
૪ ૫ ૨ ૧૦ ०१a  પ્રજામૃતસ્ય પિપ્રતઃ પ્ર યદ્ભરન્ત વહ્નયઃ ।
૪ ૫ ૨ ૧૦ ०१c  વિપ્રા ઋતસ્ય વાહસા ॥ ૧૩૦૯

૪ ૫ ૨ ૧૧ ०१a  પવમાનસ્ય જિઘ્નતો હરેશ્ચન્દ્રા અસૃક્ષત ।
૪ ૫ ૨ ૧૧ ०१c  જીરા અજિરશોચિષઃ ॥ ૧૩૧૦
૪ ૫ ૨ ૧૧ ०२a  પવમાનો રથીતમઃ શુભ્રેભિઃ શુભ્રશસ્તમઃ ।
૪ ૫ ૨ ૧૧ ०२c  હરિશ્ચન્દ્રો મરુદ્ગણઃ ॥ ૧૩૧૧
૪ ૫ ૨ ૧૧ ०3a  પવમાન્ વ્યશ્નુહિ રશ્મિભિર્વાજસાતમઃ ।
૪ ૫ ૨ ૧૧ ०3c  દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૧૩૧૨

૪ ૫ ૨ ૧૨ ०१a  પરીતો ષિઞ્ચતા સુતઁ સોમો ય ઉત્તમઁ હવિઃ ।
૪ ૫ ૨ ૧૨ ०१c  દધન્વાઁ યો નર્યો અપ્સ્વાઉન્તરા સુષાવ સોમમદ્રિભિઃ ॥ ૧૩૧૩
૪ ૫ ૨ ૧૨ ०२a  નૂનં પુનાનોઽવિભિઃ પરિ સ્રવાદબ્ધઃ સુરભિન્તરઃ ।
૪ ૫ ૨ ૧૨ ०२c  સુતે ચિત્વાપ્સુ મદામો અન્ધસા શ્રીણન્તો ગોભિરુત્તરમ્ ॥ ૧૩૧૪
૪ ૫ ૨ ૧૨ ०3a  પરિ સ્વાનશ્ચક્ષસે દેવમાદનઃ ક્રતુરિન્દુર્વિચક્ષણઃ ॥ ૧૩૧૫

૪ ૫ ૨ ૧૩ ०१a  અસાવિ સોમો અરુષો વૃષા હરી રાજેવ દસ્મો અભિ ગા અચિક્રદત્ ।
૪ ૫ ૨ ૧૩ ०१c  પુનાનો વારમત્યેષ્યવ્યયઁ શ્યેનો ન યોનિં ઘૃતવન્તમાસદત્ ॥ ૧૩૧૬
૪ ૫ ૨ ૧૩ ०२a  પર્જન્યઃ પિતા મહિષસ્ય પર્ણિનો નાભા પૃથિવ્યા ગિરિષુ ક્ષયં દધે ।
૪ ૫ ૨ ૧૩ ०२c  સ્વસાર આપો અભિ ગા ઉદાસરન્ત્સં ગ્રાવભિર્વસતે વીતે અધ્વરે ॥ ૧૩૧૭
૪ ૫ ૨ ૧૩ ०3a  કવિર્વેધસ્યા પર્યેષિ માહિનમત્યો ન મૃષ્ટો અભિ વાજમર્ષસિ ।
૪ ૫ ૨ ૧૩ ०3c  અપસેધન્દુરિતા સોમ નો મૃડ ઘૃતા વસાનઃ પરિ યાસિ નિર્ણિજમ્ ॥ ૧૩૧૮

૪ ૫ ૨ ૧૪ ०१a  શ્રાયન્ત ઇવ સૂર્યં વિશ્વેદિન્દ્રસ્ય ભક્ષત ।
૪ ૫ ૨ ૧૪ ०१c  વસૂનિ જાતો જનિમાન્યોજસા પ્રતિ ભાગં ન દીધિમઃ ॥ ૧૩૧૯
૪ ૫ ૨ ૧૪ ०२a  અલર્ષિરાતિં વસુદામુપ સ્તુહિ ભદ્રા ઇન્દ્રસ્ય રાતયઃ ।
૪ ૫ ૨ ૧૪ ०२c  યો અસ્ય કામં વિધતો ન રોષતિ મનો દાનાય ચોદયન્ ॥ ૧૩૨૦

૪ ૫ ૨ ૧૫ ૦૧a  યત ઇન્દ્ર ભયામહે તતો નો અભ્યં કૃધિ ।
૪ ૫ ૨ ૧૫ ૦૧c  મઘવઞ્છગ્ધિ તવ તન્ન ઊતયે વિ દ્વિષો વિ મૃધો જહિ ॥ ૧૩૨૧
૪ ૫ ૨ ૧૫ ૦૨a  ત્વઁ હિ રાધસ્પતે રાધસો મહઃ ક્ષયસ્યાસિ વિધ્રત્તા ।
૪ ૫ ૨ ૧૫ ૦૨c  તં ત્વા વયં મઘવન્નિન્દ્ર ગિર્વણઃ સુતાવન્તો હવામહે ॥ ૧૩૨૨

૪ ૫ ૨ ૧૬ ૦૧a  ત્વઁ સોમાસિ ધારયુર્મન્દ્ર ઓજિષ્ઠો અધ્વરે ।
૪ ૫ ૨ ૧૬ ૦૧c  પવસ્વ મઁહયદ્રયિઃ ॥ ૧૩૨૩
૪ ૫ ૨ ૧૬ ૦૨a  ત્વઁ સુતો મદિન્તમો દધન્વાન્મત્સરિન્તમઃ ।
૪ ૫ ૨ ૧૬ ૦૨c  ઇન્દુઃ સત્રાજિદસ્તૃતઃ ॥ ૧૩૨૪
૪ ૫ ૨ ૧૬ ૦3a  ત્વઁ સુષ્વાણો અદ્રિભિરભ્યર્ષ કનિક્રદત્ ।
૪ ૫ ૨ ૧૬ ૦3c  દ્યુમન્તઁ શુષ્મા ભર ॥ ૧૩૨૫

૪ ૫ ૨ ૧૭ ૦૧a  પવસ્વ દેવવીતય ઇન્દો ધારાભિરોજસા ।
૪ ૫ ૨ ૧૭ ૦૧c  આ કલશં મધુમાન્ત્સોમ નઃ સદઃ ॥ ૧૩૨૬
૪ ૫ ૨ ૧૭ ૦૨a  તવ દ્રપ્સા ઉદપ્રુત ઇન્દ્રં મદાય વાવૃધુઃ ।
૪ ૫ ૨ ૧૭ ૦૨c  ત્વાં દેવાસો અમૃતાય કં પપુઃ ॥ ૧૩૨૭
૪ ૫ ૨ ૧૭ ૦3a  આ નઃ સુતાસ ઇન્દવઃ પુનાના ધાવતા રયિમ્ ।
૪ ૫ ૨ ૧૭ ૦3c  વૃષ્ટિદ્યાવો રીત્યાપઃ સ્વર્વિદઃ ॥ ૧૩૨૮

૪ ૫ ૨ ૧૮ ૦૧a  પરિ ત્યઁ હર્યતઁ હરિં બભ્રું પુનન્તિ વારેણ ।
૪ ૫ ૨ ૧૮ ૦૧c  યો દેવાન્વિશ્વાઁ ઇત્પરિ મદેન સહ ગચ્છતિ ॥ ૧૩૨૯
૪ ૫ ૨ ૧૮ ૦૨a  દ્વિર્યં પઞ્ચ સ્વયશસઁ સખાયો અદ્રિસઁહતમ્ ।
૪ ૫ ૨ ૧૮ ૦૨c  પ્રિયમિન્દ્રસ્ય કામ્યં પ્રસ્નાપયન્ત ઊર્મયઃ ॥ ૧૩૩૦
૪ ૫ ૨ ૧૮ ૦3a  ઇન્દ્રાય સોમ પાતવે વૃત્રઘ્ને પરિ ષિચ્યસે ।
૪ ૫ ૨ ૧૮ ૦3c  નરે ચ દક્ષિણાવતે વીરાય સદનાસદે ॥ ૧૩૩૧

૪ ૫ ૨ ૧૯ ૦૧a  પવસ્વ સોમ મહે દક્ષાયાશ્વો ન નિક્તો વાજી ધનાય ॥ ૧૩૩૨
૪ ૫ ૨ ૧૯ ૦૨a  પ્ર તે સોતારો રસં મદાય પુનન્તિ સોમં મહે દ્યુમ્નાય ॥ ૧૩૩૩
૪ ૫ ૨ ૧૯ ૦3a  શિશું જજ્ઞાનઁ હરિં મૃજન્તિ પવિત્રે સોમં દેવેભ્ય ઇન્દુમ્ ॥ ૧૩૩૪

૪ ૫ ૨ ૨૦ ૦૧a  ઉપો ષુ જાતમપ્તુરં ગોભિર્ભઙ્ગં પરિષ્કૃતમ્ ।
૪ ૫ ૨ ૨૦ ૦૧c  ઇન્દું દેવા અયાસિષુઃ ॥ ૧૩૩૫
૪ ૫ ૨ ૨૦ ૦૨a  તમિદ્વર્ધન્તુ નો ગિરો વત્સઁ સઁશિશ્વરીરિવ ।
૪ ૫ ૨ ૨૦ ૦૨c  ય ઇન્દ્રસ્ય હૃદઁસનિઃ ॥ ૧૩૩૬
૪ ૫ ૨ ૨૦ ૦3a  અર્ષા નઃ સોમ શં ગવે ધુક્ષસ્વ પિપ્યુષીમિષમ્ ।

૪ ૫ ૨ ૨૦ ૦૩c વર્ધા સમુદ્રમુક્થ્યમ્ ॥ ૧૩૩૭

૪ ૫ ૨ ૨૧ ૦૧a આ ઘા યે અગ્નિમિન્ધતે સ્તૃણન્તિ બર્હિરાનુષક્ ।
૪ ૫ ૨ ૨૧ ૦૧c યેષામિન્દ્રો યુવા સખા ॥ ૧૩૩૮
૪ ૫ ૨ ૨૧ ૦૨a બૃહન્નિદિધ્મ એષાં ભૂરિ શસ્ત્રં પૃથુઃ સ્વરુઃ ।
૪ ૫ ૨ ૨૧ ૦૨c યેષામિન્દ્રો યુવા સખા ॥ ૧૩૩૯
૪ ૫ ૨ ૨૧ ૦૩a અયુદ્ધ ઇદ્યુધા વૃતઁ શૂર આજતિ સત્વભિઃ ।
૪ ૫ ૨ ૨૧ ૦૩c યેષામિન્દ્રો યુવા સખા ॥ ૧૩૪૦

૪ ૫ ૨ ૨૨ ૦૧a ય એક ઇદ્વિદયતે વસુ મર્ત્તાય દાશુષે ।
૪ ૫ ૨ ૨૨ ૦૧c ઈશાનો અપ્રતિષ્કુત ઇન્દ્રો અઙ્ગ ॥ ૧૩૪૧
૪ ૫ ૨ ૨૨ ૦૨a યશ્ચિદ્ધિ ત્વા બહુભ્ય આ સુતાવાઁ આવિવાસતિ ।
૪ ૫ ૨ ૨૨ ૦૨c ઉગ્રં તત્પત્યતે શવ ઇન્દ્રો અઙ્ગ ॥ ૧૩૪૨
૪ ૫ ૨ ૨૨ ૦૩a કદા મર્ત્તમરાધસં પદા ક્ષુમ્પમિવ સ્ફુરત્ ।
૪ ૫ ૨ ૨૨ ૦૩c કદા નઃ શુશ્રવદ્ગિર ઇન્દ્રો અઙ્ગ ॥ ૧૩૪૩

૪ ૫ ૨ ૨૩ ૦૧a ગાયન્તિ ત્વા ગાયત્રિણોઽર્ચન્ત્યર્કમર્કિણઃ ।
૪ ૫ ૨ ૨૩ ૦૧c બ્રહ્માણસ્ત્વા શતક્રત ઉદ્વઁશમિવ યેમિરે ॥ ૧૩૪૪
૪ ૫ ૨ ૨૩ ૦૨a યત્સાનોઃ સાન્વારુહો ભૂર્યસ્પષ્ટ કર્ત્ત્વમ્ ।
૪ ૫ ૨ ૨૩ ૦૨c તદિન્દ્રો અર્થં ચેતતિ યૂથેન વૃષ્ણિરેજતિ ॥ ૧૩૪૫
૪ ૫ ૨ ૨૩ ૦૩a યુઙ્ક્ષ્વા હિ કેશિના હરી વૃષણા કક્ષ્યપ્રા ।
૪ ૫ ૨ ૨૩ ૦૩c અથા ન ઇન્દ્ર સોમપા ગિરામુપશ્રુતિં ચર ॥ ૧૩૪૬

ષષ્ઠ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ
૪ ૬ ૧ ૦૧ ૦૧a સુષમિદ્ધો ન આ વહ દેવાઁ અગ્ને હવિષ્મતે ।
૪ ૬ ૧ ૦૧ ૦૧c હોતઃ પાવક યક્ષિ ચ ॥ ૧૩૪૭
૪ ૬ ૧ ૦૧ ૦૨a મધુમન્તં તનૂનપાદ્યજ્ઞં દેવેષુ નઃ કવે ।
૪ ૬ ૧ ૦૧ ૦૨c અદ્યા કૃણુહ્યૂતયે ॥ ૧૩૪૮
૪ ૬ ૧ ૦૧ ૦૩a નરાશઁસમિહ પ્રિયમસ્મિન્યજ્ઞ ઉપ હ્વયે ।
૪ ૬ ૧ ૦૧ ૦૩c મધુજિહ્વઁ હવિષ્કૃતમ્ ॥ ૧૩૪૯
૪ ૬ ૧ ૦૧ ૦૪a અગ્ને સુખતમે રથે દેવાઁ ઈડિત આ વહ ।
૪ ૬ ૧ ૦૧ ૦૪c અસિ હોતા મનુર્હિતઃ ॥ ૧૩૫૦

૪ ૬ ૧ ૦૨ ૦૧a યદદ્ય સૂર ઉદિતેઽનાગા મિત્રો અર્યમા ।
૪ ૬ ૧ ૦૨ ૦૧c સુવાતિ સવિતા ભગઃ ॥ ૧૩૫૧

૪ ૬ ૧ ૦૨ ૦૨a સુપ્રાવીરસ્તુ સ ક્ષયઃ પ્ર નુ યામન્ત્સુદાનવઃ ।
૪ ૬ ૧ ૦૨ ૦૨c યે નો અઁહોઽતિપિપ્રતિ ॥ ૧૩૫૨
૪ ૬ ૧ ૦૨ ૦3a ઉત સ્વરાજો અદિતિરદબ્ધસ્ય વ્રતસ્ય યે ।
૪ ૬ ૧ ૦૨ ૦3c મહો રાજાન ઈશતે ॥ ૧૩૫૩

૪ ૬ ૧ ૦૩ ૦૧a ઉ ત્વા મન્દન્તુ સોમાઃ કૃણુષ્વ રાધો અદ્રિવઃ ।
૪ ૬ ૧ ૦૩ ૦૧c અવ બ્રહ્મદ્વિષો જહિ ॥ ૧૩૫૪
૪ ૬ ૧ ૦૩ ૦૨a પદા પણીનરાધસો નિ બાધસ્વ મહાઁ અસિ ।
૪ ૬ ૧ ૦૩ ૦૨c ન હિ ત્વા કશ્ચ ન પ્રતિ ॥ ૧૩૫૫
૪ ૬ ૧ ૦૩ ૦3a ત્વમીશિષે સુતાનામિન્દ્ર ત્વમસુતાનામ્ ।
૪ ૬ ૧ ૦૩ ૦3c ત્વઁ રાજા જનાનામ્ ॥ ૧૩૫૬

૪ ૬ ૧ ૦૪ ૦૧a આ જાગૃવિર્વિપ્ર ઋતાં મતીનાઁ સોમઃ પુનાનો અસદચ્ચમૂષુ ।
૪ ૬ ૧ ૦૪ ૦૧c સપન્તિ યં મિથુનાસો નિકામા અધ્વર્યવો રથિરાસઃ સુહસ્તાઃ ॥ ૧૩૫૭
૪ ૬ ૧ ૦૪ ૦૨a સ પુનાન ઉપ સૂરે દધાન ઓભે અપ્રા રોદસી વિ ષ આવઃ ।
૪ ૬ ૧ ૦૪ ૦૨c પ્રિયા ચિદ્યસ્ય પ્રિયસાસ ઊતી સતો ધનં કારિણે ન પ્ર યઁસત્ ॥ ૧૩૫૮
૪ ૬ ૧ ૦૪ ૦3a સ વર્ધિતા વર્ધનઃ પૂયમાનઃ સોમો મીઢ્વાઁ અભિ નો જ્યોતિષાવીત્ ।
૪ ૬ ૧ ૦૪ ૦3c યત્ર નઃ પૂર્વે પિતરઃ પદજ્ઞાઃ સ્વર્વિદો અભિ ગા અદ્રિમિષ્ણન્ ॥ ૧૩૫૯

૪ ૬ ૧ ૦૫ ૦૧a મા ચિદન્યદ્વિ શઁસત સખાયો મા રિષણ્યત ।
૪ ૬ ૧ ૦૫ ૦૧c ઇન્દ્રમિત્સ્તોતા વૃષણઁ સચા સુતે મુહુરુક્થા ચ શઁસત ॥ ૧૩૬૦
૪ ૬ ૧ ૦૫ ૦૨a અવક્રક્ષિણં વૃષભં યથા જુવં ગાં ન ચર્ષણીસહમ્ ।
૪ ૬ ૧ ૦૫ ૦૨c વિદ્વેષણઁ સંવનનમુભયઙ્કરં મઁહિષ્ઠમુભયાવિનમ્ ॥ ૧૩૬૧

૪ ૬ ૧ ૦૬ ૦૧a ઉદુ ત્યે મધુમત્તમા ગિર સ્તોમાસ ઈરતે ।
૪ ૬ ૧ ૦૬ ૦૧c સત્રાજિતો ધનસા અક્ષિતોતયો વાજન્તો રથા ઇવ ॥ ૧૩૬૨
૪ ૬ ૧ ૦૬ ૦૨a કણ્વા ઇવ ભૃગવઃ સૂર્યા ઇવ વિશ્વમિદ્ધીતમાશત ।
૪ ૬ ૧ ૦૬ ૦૨c ઇન્દ્રઁ સ્તોમેભિર્મહયન્ત આયવઃ પ્રિયમેધાસો અસ્વરન્ ॥ ૧૩૬૩

૪ ૬ ૧ ૦૭ ૦૧a પર્યૂ ષુ પ્ર ધન્વ વાજસાતયે પરિ વૃત્રાણિ સક્ષણિઃ ।
૪ ૬ ૧ ૦૭ ૦૧c દ્વિષસ્તરધ્યા ઋણયા ન ઈરસે ॥ ૧૩૬૪
૪ ૬ ૧ ૦૭ ૦૨a અજીજનો હિ પવમાન સૂર્યં વિધારે શક્મના પયઃ ।
૪ ૬ ૧ ૦૭ ૦૨c ગોજીરયા રઁહમાનઃ પુરન્ધ્યા ॥ ૧૩૬૫
૪ ૬ ૧ ૦૭ ૦3a અનુ હિ ત્વા સુતઁ સોમ મદામસિ મહે સમર્યરાજ્યે ।
૪ ૬ ૧ ૦૭ ૦3c વાજાઁ અભિ પવમાન પ્ર ગાહસે ॥ ૧૩૬૬

૪ ૬ ૧ ૦૮ ૦૧a પરિ પ્ર ધન્વેન્દ્રાય સોમ સ્વાદુર્મિત્રાય પૂષ્ણે ભગાય ॥ ૧૩૬૭
૪ ૬ ૧ ૦૮ ૦૨a એવામૃતાય મહે ક્ષયાય સ શુક્રો અર્ષ દિવ્યઃ પીયૂષઃ ॥ ૧૩૬૮
૪ ૬ ૧ ૦૮ ૦૩a ઇન્દ્રસ્તે સોમ સુતસ્ય પેયાત્ક્રત્વે દક્ષાય વિશ્વે ચ દેવાઃ ॥ ૧૩૬૯

૪ ૬ ૧ ૦૯ ૦૧a સૂર્યસ્યેવ રશ્મયો દ્રાવયિત્નવો મત્સરાસઃ પ્રસુતઃ સાકમીરતે ।
૪ ૬ ૧ ૦૯ ૦૧c તન્તું તતં પરિ સર્ગાસ આશવો નેન્દ્રાદૃતે પવતે ધામ કિં ચન ॥ ૧૩૭૦
૪ ૬ ૧ ૦૯ ૦૨a ઉપો મતિઃ પૃચ્યતે સિચ્યતે મધુ મન્દ્રાજની ચોદતે અન્તરાસનિ ।
૪ ૬ ૧ ૦૯ ૦૨c પવમાનઃ સન્તનિઃ સુન્વતામિવ મધુમાન્દ્રપ્સઃ પરિ વારમર્ષતિ ॥ ૧૩૭૧
૪ ૬ ૧ ૦૯ ૦૩a ઉક્ષા મિમેતિ પ્રતિ યન્તિ ધેનવો દેવસ્ય દેવીરુપ યન્તિ નિષ્કૃતમ્ ।
૪ ૬ ૧ ૦૯ ૦૩c અત્યક્રમીદર્જુનં વારમવ્યયમત્કં ન નિક્તં પરિ સોમો અવ્યત ॥ ૧૩૭૨

૪ ૬ ૧ ૧૦ ૦૧a અગ્નિં નરો દીધિતિભિરરણ્યોર્હસ્તચ્યુતં જનયત પ્રશસ્તમ્ ।
૪ ૬ ૧ ૧૦ ૦૧c દૂરેદૃશં ગૃહપતિમથવ્યુમ્ ॥ ૧૩૭૩
૪ ૬ ૧ ૧૦ ૦૨a તમગ્નિમસ્તે વસવો ન્યૃણ્વન્ત્સુપ્રતિચક્ષમવસે કુતશ્ચિત્ ।
૪ ૬ ૧ ૧૦ ૦૨c દક્ષાય્યો યો દમ આસ નિત્યઃ ॥ ૧૩૭૪
૪ ૬ ૧ ૧૦ ૦૩a પ્રેદ્ધો અગ્ને દીદિહિ પુરો નોઽજસ્રયા સૂર્મ્યા યવિષ્ઠ ।
૪ ૬ ૧ ૧૦ ૦૩c ત્વાઁ શશ્વન્ત ઉપ યન્તિ વાજાઃ ॥ ૧૩૭૫

૪ ૬ ૧ ૧૧ ૦૧a આયં ગૌઃ પૃશ્નિરક્રમીદસદન્માતરં પુરઃ ।
૪ ૬ ૧ ૧૧ ૦૧c પિતરં ચ પ્રયન્ત્સ્વઃ ॥ ૧૩૭૬
૪ ૬ ૧ ૧૧ ૦૨a અન્તશ્ચરતિ રોચનાસ્ય પ્રાણાદપાનતી ।
૪ ૬ ૧ ૧૧ ૦૨c વ્યખ્યન્મહિષો દિવમ્ ॥ ૧૩૭૭
૪ ૬ ૧ ૧૧ ૦૩a ત્રિँશદ્ધામ વિ રાજતિ વાક્પતઙ્ગાય ધીયતે ।
૪ ૬ ૧ ૧૧ ૦૩c પ્રતિ વસ્તોરહ દ્યુભિઃ ॥ ૧૩૭૮

ષષ્ઠ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૬ ૨ ૦૧ ૦૧a ઉપપ્રયન્તો અધ્વરં મન્ત્રં વોચેમાગ્નયે ।
૪ ૬ ૨ ૦૧ ૦૧c આરે અસ્મે ચ શ઼ૃણ્વતે ॥ ૧૩૭૯
૪ ૬ ૨ ૦૧ ૦૨a યઃ સ્નીહિતીષુ પૂર્વ્યઃ સઞ્જગ્માનાસુ કૃષ્ટિષુ ।
૪ ૬ ૨ ૦૧ ૦૨c અરક્ષદ્દાશુષે ગયમ્ ॥ ૧૩૮૦
૪ ૬ ૨ ૦૧ ૦૩a સ નો વેદો અમાત્યમગ્ની રક્ષતુ શન્તમઃ ।
૪ ૬ ૨ ૦૧ ૦૩c ઉતાસ્માન્પાત્વँહસઃ ॥ ૧૩૮૧
૪ ૬ ૨ ૦૧ ૦૪a ઉત બ્રુવન્તુ જન્તવ ઉદગ્નિર્વૃત્રહાજનિ ।
૪ ૬ ૨ ૦૧ ૦૪c ધનઞ્જયો રણેરણે ॥ ૧૩૮૨

૪ ૬ ૨ ૦૨ ૦૧a અગ્ને યુઙ્ક્ષ્વા હિ યે તવાશ્વાસો દેવ સાધવઃ ।
૪ ૬ ૨ ૦૨ ૦૧c અરં વહન્ત્યાશવઃ ॥ ૧૩૮૩
૪ ૬ ૨ ૦૨ ૦૨a અચ્છા નો યાહ્યા વહાભિ પ્રયાँસિ વીતયે ।
૪ ૬ ૨ ૦૨ ૦૨c આ દેવાન્ત્સોમપીતયે ॥ ૧૩૮૪
૪ ૬ ૨ ૦૨ ૦3a ઉદગ્ને ભારત દ્યુમદજસ્રેણ દવિદ્યુતત્ ।
૪ ૬ ૨ ૦૨ ૦3c શોચા વિ ભાહ્યજર ॥ ૧૩૮૫

૪ ૬ ૨ ૦૩૦૧a પ્ર સુન્વાનાયાન્ધસો મર્ત્તો ન વષ્ટ તદ્વચઃ ।
૪ ૬ ૨ ૦૩૦૧c અપ શ્વાનમરાધસँ હતા મખં ન ભૃગવઃ ॥ ૧૩૮૬
૪ ૬ ૨ ૦૩૦૨a આ જામિરત્કે અવ્યત ભુજે ન પુત્ર ઓણ્યોઃ ।
૪ ૬ ૨ ૦૩૦૨c સરજ્જારો ન યોષણાં વરો ન યોનિમાસદમ્ ॥ ૧૩૮૭
૪ ૬ ૨ ૦૩૦3a સ વીરો દક્ષસાધનો વિ યસ્તસ્તમ્ભ રોદસી ।
૪ ૬ ૨ ૦૩૦3c હરિઃ પવિત્રે અવ્યત વેધા ન યોનિમાસદમ્ ॥ ૧૩૮૮

૪ ૬ ૨ ૦૪૦૧a અભ્રાતૃવ્યો અના ત્વમનાપિરિન્દ્ર જનુષા સનાદસિ ।
૪ ૬ ૨ ૦૪૦૧c યુધેદાપિત્વમિચ્છસે ॥ ૧૩૮૯
૪ ૬ ૨ ૦૪૦૨a ન કી રેવન્તँ સખ્યાય વિન્દસે પીયન્તિ તે સુરાશ્વઃ ।
૪ ૬ ૨ ૦૪૦૨c યદા કૃણોષિ નદનું સમૂહસ્યાદિત્પિતેવ હૂયસે ॥ ૧૩૯૦

૪ ૬ ૨ ૦૫૦૧a આ ત્વા સહસ્રમા શતં યુક્તા રથે હિરણ્યયે ।
૪ ૬ ૨ ૦૫૦૧c બ્રહ્મયુજો હરય ઇન્દ્ર કેશિનો વહન્તુ સોમપીતયે ॥ ૧૩૯૧
૪ ૬ ૨ ૦૫૦૨a આ ત્વા રથે હિરણ્યયે હરી મયૂરશેપ્યા ।
૪ ૬ ૨ ૦૫૦૨c શિતિપૃષ્ઠા વહતાં મધ્વો અન્ધસો વિવક્ષણસ્ય પીતયે ॥ ૧૩૯૨
૪ ૬ ૨ ૦૫૦3a પિબા ત્વાઽસ્ય ગિર્વણઃ સુતસ્ય પૂર્વપા ઇવ ।
૪ ૬ ૨ ૦૫૦3c પરિષ્કૃતસ્ય રસિન ઇયમાસુતિશ્ચારુર્મદાય પત્યતે ॥ ૧૩૯૩

૪ ૬ ૨ ૦૬૦૧a આ સોતા પરિ ષિઞ્ચતાશ્વં ન સ્તોમમપ્તુરँ રજસ્તુરમ્ ।
૪ ૬ ૨ ૦૬૦૧c વનપ્રક્ષમુદપ્રુતમ્ ॥ ૧૩૯૪
૪ ૬ ૨ ૦૬૦૨a સહસ્રધારં વૃષભં પયોદુહં પ્રિયં દેવાય જન્મને ।
૪ ૬ ૨ ૦૬૦૨c ઋતેન ય ઋતજાતો વિવાવૃધે રાજા દેવ ઋતં બૃહત્ ॥ ૧૩૯૫

૪ ૬ ૨ ૦૭૦૧a અગ્નિર્વૃત્રાણિ જઙ્ઘનદ્દ્રવિણસ્યુર્વિપન્યયા ।
૪ ૬ ૨ ૦૭૦૧c સમિદ્ધઃ શુક્ર આહુતઃ ॥ ૧૩૯૬
૪ ૬ ૨ ૦૭૦૨a ગર્ભે માતુઃ પિતુષ્પિતા વિદિદ્યુતાનો અક્ષરે ।
૪ ૬ ૨ ૦૭૦૨c સીદન્નૃતસ્ય યોનિમા ॥ ૧૩૯૭

૪ ૬ ૨ ૦૭૦૩a બ્રહ્મ પ્રજાવદા ભર જાતવેદો વિચર્ષણે ।
૪ ૬ ૨ ૦૭૦૩c અગ્ને યદ્દીદયદ્દિવિ ॥ ૧૩૯૮

૪ ૬ ૨ ૦૮૦૧a અસ્ય પ્રેષા હેમના પૂયમાનો દેવો દેવેભિઃ સમપૃક્ત રસમ્ ।
૪ ૬ ૨ ૦૮૦૧c સુતઃ પવિત્રં પર્યેતિ રેભન્મિતેવ સદ્મ પશુમન્તિ હોતા ॥ ૧૩૯૯
૪ ૬ ૨ ૦૮૦૨a ભદ્રા વસ્ત્રા સમન્યાऽऽ૩ વસાનો મહાન્કવિર્નિવચનાનિ શઁસન્ ।
૪ ૬ ૨ ૦૮૦૨c આ વચ્યસ્વ ચમ્વોઃ પૂયમાનો વિચક્ષણો જાગૃવિર્દેવવીતૌ ॥ ૧૪૦૦
૪ ૬ ૨ ૦૮૦૩a સમુ પ્રિયો મૃજ્યતે સાનો અવ્યે યશસ્તરો યશસાં ક્ષૈતો અસ્મે ।
૪ ૬ ૨ ૦૮૦૩c અભિ સ્વર ધન્વા પૂયમાનો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૧૪૦૧

૪ ૬ ૨ ૦૯૦૧a એતો ન્વિન્દ્રઁ સ્તવામ શુદ્ધઁ શુદ્ધેન સામ્ના ।
૪ ૬ ૨ ૦૯૦૧c શુદ્ધૈરુક્થૈર્વાવૃધ્વાઁસઁ શુદ્ધૈરાશીર્વાન્મમત્તુ ॥ ૧૪૦૨
૪ ૬ ૨ ૦૯૦૨a ઇન્દ્ર શુદ્ધો ન આ ગહિ શુદ્ધઃ શુદ્ધાભિરૂતિભિઃ ।
૪ ૬ ૨ ૦૯૦૨c શુદ્ધો રયિં નિ ધારય શુદ્ધો મમદ્ધિ સોમ્ય ॥ ૧૪૦૩
૪ ૬ ૨ ૦૯૦૩a ઇન્દ્ર શુદ્ધો હિ નો રયિઁ શુદ્ધો રત્નાનિ દાશુષે ।
૪ ૬ ૨ ૦૯૦૩c શુદ્ધો વૃત્રાણિ જિઘ્નસે શુદ્ધો વાજઁ સિષાસસિ ॥ ૧૪૦૪

૪ ૬ ૨ ૧૦૦૧a અગ્ને સ્તોમં મનામહે સિધ્રમદ્ય દિવિસ્પૃશઃ ।
૪ ૬ ૨ ૧૦૦૧c દેવસ્ય દ્રવિણસ્યવઃ ॥ ૧૪૦૫
૪ ૬ ૨ ૧૦૦૨a અગ્નિર્જુષત નો ગિરો હોતા યો માનુષેષ્વા ।
૪ ૬ ૨ ૧૦૦૨c સ યક્ષદ્દૈવ્યં જનમ્ ॥ ૧૪૦૬
૪ ૬ ૨ ૧૦૦૩a ત્વમગ્ને સપ્રથા અસિ જુષ્ટો હોતા વરેણ્યઃ ।
૪ ૬ ૨ ૧૦૦૩c ત્વયા યજ્ઞં વિ તન્વતે ॥ ૧૪૦૭

૪ ૬ ૨ ૧૧૦૧a અભિ ત્રિપૃષ્ઠં વૃષણં વયોધામાઙ્ગોષિણમવાવશન્ત વાણીઃ ।
૪ ૬ ૨ ૧૧૦૧c વના વસાનો વરુણો ન સિન્ધૂર્વિ રત્નધા દયતે વાર્યાણિ ॥ ૧૪૦૮
૪ ૬ ૨ ૧૧૦૨a શૂરગ્રામઃ સર્વવીરઃ સહાવાઞ્જેતા પવસ્વ સનિતા ધનાનિ ।
૪ ૬ ૨ ૧૧૦૨c તિગ્માયુધઃ ક્ષિપ્રધન્વા સમત્સ્વષાઢઃ સાહ્વાન્પૃતનાસુ શત્રૂન્ ॥ ૧૪૦૯
૪ ૬ ૨ ૧૧૦૩a ઉરુગવ્યૂતિરભયાનિ કૃણ્વન્ત્સમીચીને આ પવસ્વા પુરન્ધી ।
૪ ૬ ૨ ૧૧૦૩c અપઃ સિષાસન્નુષસઃ સ્વાऽऽર્ગાઃ સં ચિક્રદો મહો અસ્મભ્યં વાજાન્ ॥ ૧૪૧૦

૪ ૬ ૨ ૧૨૦૧a ત્વમિન્દ્ર યશા અસ્યૃજીષી શવસસ્પતિઃ ।
૪ ૬ ૨ ૧૨૦૧c ત્વં વૃત્રાણિ હઁસ્યપ્રતીન્યેક ઇત્પુર્વનુત્તશ્ચર્ષણીધૃતિઃ ॥ ૧૪૧૧
૪ ૬ ૨ ૧૨૦૨a તમુ ત્વા નૂનમસુર પ્રચેતસઁ રાધો ભાગમિવેમહે ।
૪ ૬ ૨ ૧૨૦૨c મહીવ કૃત્તિઃ શરણા ત ઇન્દ્ર પ્ર તે સુમ્ના નો અશ્નવન્ ॥ ૧૪૧૨

૪ ૬ ૨ ૧૩૦૧a યજિષ્ઠં ત્વા વવૃમહે દેવં દેવત્રા હોતારમમર્ત્યમ્ ।
૪ ૬ ૨ ૧૩૦૧c અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ ૧૪૧૩
૪ ૬ ૨ ૧૩૦૨a અપાં નપાતઁ સુભગઁ સુદીદિતિમગ્નિમુ શ્રેષ્ઠશોચિષમ્ ।
૪ ૬ ૨ ૧૩૦૨c સ નો મિત્રસ્ય વરુણસ્ય સો અપામા સુમ્નં યક્ષતે દિવિ ॥ ૧૪૧૪

૪ ૬ ૨ ૧૪૦૧a યમગ્ને પૃત્સુ મર્ત્યમવા વાજેષુ યં જુનાઃ ।
૪ ૬ ૨ ૧૪૦૧c સ યન્તા શશ્વતીરિષઃ ॥ ૧૪૧૫
૪ ૬ ૨ ૧૪૦૨a ન કિરસ્ય સહન્ત્ય પર્યેતા કયસ્ય ચિત્ ।
૪ ૬ ૨ ૧૪૦૨c વાજો અસ્તિ શ્રવાય્યઃ ॥ ૧૪૧૬
૪ ૬ ૨ ૧૪૦૩a સ વાજં વિશ્વચર્ષણિરર્વદ્ભિરસ્તુ તરુતા ।
૪ ૬ ૨ ૧૪૦૩c વિપ્રેભિરસ્તુ સનિતા ॥ ૧૪૧૭

૪ ૬ ૨ ૧૫૦૧a સાકમુક્ષો મર્જયન્ત સ્વસારો દશ ધીરસ્ય ધીતયો ધનુત્રીઃ ।
૪ ૬ ૨ ૧૫૦૧c હરિઃ પર્યદ્રવજ્જાઃ સૂર્યસ્ય દ્રોણં નનક્ષે અત્યો ન વાજી ॥ ૧૪૧૮
૪ ૬ ૨ ૧૫૦૨a સં માતૃભિર્ન શિશુર્વાવશાનો વૃષા દધન્વે પુરુવારો અદ્ભિઃ ।
૪ ૬ ૨ ૧૫૦૨c મર્યો ન યોષામભિ નિષ્કૃતં યન્ત્સં ગચ્છતે કલશ ઉસ્રિયાભિઃ ॥ ૧૪૧૯
૪ ૬ ૨ ૧૫૦૩a ઉત પ્ર પિપ્ય ઊધરઘ્ન્યાયા ઇન્દુર્ધારાભિઃ સચતે સુમેધાઃ ।
૪ ૬ ૨ ૧૫૦૩c મૂર્ધાનં ગાવઃ પયસા ચમૂષ્વભિ શ્રીણન્તિ વસુભિર્ન નિક્તૈઃ ॥ ૧૪૨૦

૪ ૬ ૨ ૧૬૦૦a પિબા સુતસ્ય રસિનો મત્સ્વા ન ઇન્દ્ર ગોમતઃ ।
૪ ૬ ૨ ૧૬૦૦c આપિર્નો બોધિ સધમાદ્યે વૃધેઽસ્માઁ અવન્તુ તે ધિયઃ ॥ ૧૪૨૧
૪ ૬ ૨ ૧૬૦૦a ભૂયામ તે સુમતૌ વાજિનો વયં મા ન સ્તરભિમાતયે ।
૪ ૬ ૨ ૧૬૦૦c અસ્માં ચિત્રાભિરવતાદભિષ્ટિભિરા નઃ સુમ્નેષુ યામય ॥ ૧૪૨૨

૪ ૬ ૨ ૧૭૦૧a ત્રિરસ્મૈ સપ્ત ધેનવો દુદુહ્રિરે સત્યામાશિરં પરમે વ્યોમનિ ।
૪ ૬ ૨ ૧૭૦૧c ચત્વાર્યન્યા ભુવનાનિ નિર્ણિજે ચારૂણિ ચક્રે યદૃતૈરવર્ધત ॥ ૧૪૨૩
૪ ૬ ૨ ૧૭૦૨a સ ભક્ષમાણો અમૃતસ્ય ચારુણ ઉભે દ્યાવા કાવ્યેના વિ શશ્રથે ।
૪ ૬ ૨ ૧૭૦૨c તેજિષ્ઠા અપો મઁહના પરિ વ્યત યદી દેવસ્ય શ્રવસા સદો વિદુઃ ॥ ૧૪૨૪
૪ ૬ ૨ ૧૭૦૩a તે અસ્ય સન્તુ કેતવોઽમૃત્યવોઽદાભ્યાસો જનુષી ઉભે અનુ ।
૪ ૬ ૨ ૧૭૦૩c યેભિર્નૃમ્ણા ચ દેવ્યા ચ પુનત આદિદ્રાજાનં મનના અગૃભ્ણત ॥ ૧૪૨૫

૪ ૬ ૨ ૧૮૦૧a અભિ વાયું વીત્યર્ષા ગૃણાનોઽભિ મિત્રાવરુણા પૂયમાનઃ ।
૪ ૬ ૨ ૧૮૦૧c અભી નરં ધીજવનઁ રથેષ્ઠામભીન્દ્રં વૃષણં વજ્રબાહુમ્ ॥ ૧૪૨૬
૪ ૬ ૨ ૧૮૦૨a અભિ વસ્ત્રા સુવસનાન્યર્ષાભિ ધેનૂઃ સુદુઘાઃ પૂયમાનઃ ।
૪ ૬ ૨ ૧૮૦૨c અભિ ચન્દ્રા ભર્ત્તવે નો હિરણ્યાભ્યશ્વાન્રથિનો દેવ સોમ ॥ ૧૪૨૭

૪ ૬ ૨ ૧૮૦૩a અભી નો અર્ષ દિવ્યા વસૂન્યભિ વિશ્વા પાર્થિવા પૂયમાનઃ ।
૪ ૬ ૨ ૧૮૦૩c અભિ યેન દ્રવિણમશ્નવામાભ્યાર્ષેયં જમદગ્નિવન્નઃ ॥ ૧૪૨૮

૪ ૬ ૨ ૧૯૦૧a યજ્જાયથા અપૂર્વ્ય મઘવન્વૃત્રહત્યાય ।
૪ ૬ ૨ ૧૯૦૧c તત્પૃથિવીમપ્રથયસ્તદસ્તભ્ના ઉતો દિવમ્ ॥ ૧૪૨૯
૪ ૬ ૨ ૧૯૦૨a તત્તે યજ્ઞો અજાયત તદર્ક ઉત હસ્કૃતિઃ ।
૪ ૬ ૨ ૧૯૦૨c તદ્વિશ્વમભિભૂરસિ યજ્જાતં યચ્ચ જન્ત્વમ્ ॥ ૧૪૩૦
૪ ૬ ૨ ૧૯૦૩a આમાસુ પક્વમૈરય આ સૂર્યં રોહયો દિવિ ।
૪ ૬ ૨ ૧૯૦૩c ઘર્મં ન સામં તપતા સુવૃક્તિભિર્જુષ્ટં ગિર્વણસે બૃહત્ ॥ ૧૪૩૧

૪ ૬ ૨ ૨૦૦૧a મત્સ્યપાયિ તે મહઃ પાત્રસ્યેવ હરિવો મત્સરો મદઃ ।
૪ ૬ ૨ ૨૦૦૧c વૃષા તે વૃષ્ણ ઇન્દુર્વાજી સહસ્રસાતમઃ ॥ ૧૪૩૨
૪ ૬ ૨ ૨૦૦૨a આ નસ્તે ગન્તુ મત્સરો વૃષા મદો વરેણ્યઃ ।
૪ ૬ ૨ ૨૦૦૨c સહાવાઁ ઇન્દ્ર સાનસિઃ પૃતનષાડમર્ત્યઃ ॥ ૧૪૩૩
૪ ૬ ૨ ૨૦૦૩a ત્વઁ હિ શૂરઃ સનિતા ચોદયો મનુષો રથમ્ ।
૪ ૬ ૨ ૨૦૦૩c સહાવાન્દસ્યુમવ્રતમોષઃ પાત્રં ન શોચિષા ॥ ૧૪૩૪

ષષ્ઠ પ્રપાઠકઃ । તૃતીયોઽર્ધઃ
૪ ૬ ૩ ૦૧૦૧a પવસ્વ વૃષ્ટિમા સુ નોઽપામૂર્મિં દિવસ્પરિ ।
૪ ૬ ૩ ૦૧૦૧c અયક્ષ્મા બૃહતીરિષઃ ॥ ૧૪૩૫
૪ ૬ ૩ ૦૧૦૨a તયા પવસ્વ ધારયા યયા ગાવ ઇહાગમન્ ।
૪ ૬ ૩ ૦૧૦૨c જન્યાસ ઉપ નો ગૃહમ્ ॥ ૧૪૩૬
૪ ૬ ૩ ૦૧૦૩a ઘૃતં પવસ્વ ધારયા યજ્ઞેષુ દેવવીતમઃ ।
૪ ૬ ૩ ૦૧૦૩c અસ્મભ્યં વૃષ્ટિમા પવ ॥ ૧૪૩૭
૪ ૬ ૩ ૦૧૦૪a સ ન ઊર્જે વ્યાઉવ્યયં પવિત્રં ધાવ ધારયા ।
૪ ૬ ૩ ૦૧૦૪c દેવાસઃ શ઼ૃણવન્હિ કમ્ ॥ ૧૪૩૮
૪ ૬ ૩ ૦૧૦૫a પવમાનો અસિષ્યદદ્રક્ષાઁસ્યપજઙ્ઘનત્ ।
૪ ૬ ૩ ૦૧૦૫c પ્રત્નવદ્રોચયન્રુચઃ ॥ ૧૪૩૯

૪ ૬ ૩ ૦૨૦૧a પ્રત્યસ્મૈ પિપીષતે વિશ્વાનિ વિદુષે ભર ।
૪ ૬ ૩ ૦૨૦૧c અરઙ્ગમાય જગ્મયેઽપશ્ચાદધ્વને નરઃ ॥ ૧૪૪૦
૪ ૬ ૩ ૦૨૦૨a એમેનં પ્રત્યેતન સોમેભિઃ સોમપાતમમ્ ।
૪ ૬ ૩ ૦૨૦૨c અમત્રેભિરૃજીષિણમિન્દ્રઁ સુતેભિરિન્દુભિઃ ॥ ૧૪૪૧
૪ ૬ ૩ ૦૨૦૩a યદી સુતેભિરિન્દુભિઃ સોમેભિઃ પ્રતિભૂષથ ।

૪ ૬ ૩ ૦૨૦૩c વેદા વિશ્વસ્ય મેધિરો ધૃષત્તન્તમિદેષતે ॥ ૧૪૪૨
૪ ૬ ૩ ૦૨૦૪a અસ્માસ્મા ઇદન્ધસોऽધ્વર્યો પ્ર ભરા સુતમ્ ।
૪ ૬ ૩ ૦૨૦૪c કુવિત્સમસ્ય જેન્યસ્ય શર્ધતોऽભિશસ્તેરવસ્વરત્ ॥ ૧૪૪૩

૪ ૬ ૩ ૦૩૦૧a બભ્રવે નુ સ્વતવસેऽરુણાય દિવિસ્પૃશે ।
૪ ૬ ૩ ૦૩૦૧c સોમાય ગાથમર્ચત ॥ ૧૪૪૪
૪ ૬ ૩ ૦૩૦૨a હસ્તચ્યુતેભિરદ્રિભિઃ સુતઁ સોમં પુનીતન ।
૪ ૬ ૩ ૦૩૦૨c મધાવા ધાવતા મધુ ॥ ૧૪૪૫
૪ ૬ ૩ ૦૩૦૩a નમસેદુપ સીદત દધ્નેદભિ શ્રીણીતન ।
૪ ૬ ૩ ૦૩૦૩c ઇન્દુમિન્દ્રે દધાતન ॥ ૧૪૪૬
૪ ૬ ૩ ૦૩૦૪a અમિત્રહા વિચર્ષણિઃ પવસ્વ સોમ શં ગવે ।
૪ ૬ ૩ ૦૩૦૪c દેવેભ્યો અનુકામકૃત્ ॥ ૧૪૪૭
૪ ૬ ૩ ૦૩૦૫a ઇન્દ્રાય સોમ પાતવે મદાય પરિ ષિચ્યસે ।
૪ ૬ ૩ ૦૩૦૫c મનશ્ચિન્મનસસ્પતિઃ ॥ ૧૪૪૮
૪ ૬ ૩ ૦૩૦૬a પવમાન સુવીર્યં રયિઁ સોમ રિરીહિ નઃ ।
૪ ૬ ૩ ૦૩૦૬c ઇન્દવિન્દ્રેણ નો યુજા ॥ ૧૪૪૯

૪ ૬ ૩ ૦૪૦૧a ઉદ્ધેદભિ શ્રુતામઘં વૃષભં નર્યાપસમ્ ।
૪ ૬ ૩ ૦૪૦૧c અસ્તારમેષિ સૂર્ય ॥ ૧૪૫૦
૪ ૬ ૩ ૦૪૦૨a નવ યો નવતિં પુરો બિભેદ બાહ્વોજસા ।
૪ ૬ ૩ ૦૪૦૨c અહિં ચ વૃત્રહાવધીત્ ॥ ૧૪૫૧
૪ ૬ ૩ ૦૪૦૩a સ ન ઇન્દ્રઃ શિવઃ સખાશ્વાવદ્ગોમદ્યવમત્ ।
૪ ૬ ૩ ૦૪૦૩c ઉરુધારેવ દોહતે ॥ ૧૪૫૨

૪ ૬ ૩ ૦૫૦૧a વિભ્રાડ્ બૃહત્પિબતુ સોમ્યં મધ્વાયુર્દધદ્યજ્ઞપતાવવિહ્રુતમ્ ।
૪ ૬ ૩ ૦૫૦૧c વાતજૂતો યો અભિરક્ષતિ ત્મના પ્રજાઃ પિપર્તિ બહુધા વિ રાજતિ ॥ ૧૪૫૩
૪ ૬ ૩ ૦૫૦૨a વિભ્રાડ્ બૃહત્સુભૃતં વાજસાતમં ધર્મં દિવો ધરુણે સત્યમર્પિતમ્ ।
૪ ૬ ૩ ૦૫૦૨c અમિત્રહા વૃત્રહા દસ્યુહન્તમં જ્યોતિર્જજ્ઞે અસુરહા સપત્નહા ॥ ૧૪૫૪
૪ ૬ ૩ ૦૫૦૩a ઇદઁ શ્રેષ્ઠં જ્યોતિષાં જ્યોતિરુત્તમં વિશ્વજિદ્ધનજિદુચ્યતે બૃહત્ ।
૪ ૬ ૩ ૦૫૦૩c વિશ્વભ્રાડ્ ભ્રાજો મહિ સૂર્યો દૃશ ઉરુ પપ્રથે સહ ઓજો અચ્યુતમ્ ॥ ૧૪૫૫

૪ ૬ ૩ ૦૬૦૧a ઇન્દ્ર ક્રતું ન આ ભર પિતા પુત્રેભ્યો યથા ।
૪ ૬ ૩ ૦૬૦૧c શિક્ષા ણો અસ્મિન્પુરુહૂત યામનિ જીવ જ્યોતિરશીમહિ ॥ ૧૪૫૬
૪ ૬ ૩ ૦૬૦૨a મા નો અજ્ઞાતા વૃજના દુરાધ્યોउ માશિવાસોऽવ ક્રમુઃ ।

૪ ૬ ૩ ૦૬૦૨c ત્વયા વયં પ્રવતઃ શશ્વતીરપોઽતિ શૂર તરામસિ ॥ ૧૪૫૭

૪ ૬ ૩ ૦૭૦૧a અધાધા શ્વઃશ્વ ઇન્દ્ર ત્રાસ્વ પરે ચ નઃ ।
૪ ૬ ૩ ૦૭૦૧c વિશ્વા ચ નો જરિતૄન્ત્સત્પતે અહા દિવા નક્તં ચ રક્ષિષઃ ॥ ૧૪૫૮
૪ ૬ ૩ ૦૭૦૨a પ્રભઙ્ગી શૂરો મઘવા તુવીમઘઃ સમ્મિશ્લો વિર્યાય કમ્ ।
૪ ૬ ૩ ૦૭૦૨c ઉભા તે બાહૂ વૃષણા શતક્રતો નિ યા વજ્રં મિમિક્ષતુઃ ॥ ૧૪૫૯

૪ ૬ ૩ ૦૮૦૧a જનીયન્તો ન્વગ્રવઃ પુત્રીયન્તઃ સુદાનવઃ ।
૪ ૬ ૩ ૦૮૦૧c સરસ્વન્તઁ હવામહે ॥ ૧૪૬૦

૪ ૬ ૩ ૦૯૦૧a ઉત નઃ પ્રિયા પ્રિયાસુ સપ્તસ્વસા સુજુષ્ટા ।
૪ ૬ ૩ ૦૯૦૧c સરસ્વતી સ્તોમ્યા ભૂત્ ॥ ૧૪૬૧

૪ ૬ ૩ ૧૦૦૧a તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
૪ ૬ ૩ ૧૦૦૧c ધિયો યો નઃ પ્રચોદયાત્ ॥ ૧૪૬૨
૪ ૬ ૩ ૧૦૦૨a સોમાનાઁ સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે ।
૪ ૬ ૩ ૧૦૦૨a કક્ષીવન્તઁ ય ઔશિજઃ ॥ ૧૪૬૩
૪ ૬ ૩ ૧૦03a અગ્ન આયૂઁષિ પવસે આ સુવોર્જં ઇષં ચ નઃ ।
૪ ૬ ૩ ૧૦03a આરે બાધસ્વ દુચ્છુનામ્ ॥ ૧૪૬૪

૪ ૬ ૩ ૧૧૦૧a તા નઃ શક્તં પાર્થિવસ્ય મહો રાયો દિવ્યસ્ય ।
૪ ૬ ૩ ૧૧૦૧c મહિ વા ક્ષત્રં દેવેષુ ॥ ૧૪૬૫
૪ ૬ ૩ ૧૧૦૨a ઋતમૃતેન સપન્તેષિરં દક્ષમાશાતે ।
૪ ૬ ૩ ૧૧૦૨c અદ્રુહા દેવૌ વર્ધેતે ॥ ૧૪૬૬
૪ ૬ ૩ ૧૧03a વૃષ્ટિદ્યાવા રીત્યાપેષસ્પતી દાનુમત્યાઃ ।
૪ ૬ ૩ ૧૧03c બૃહન્તં ગર્ત્તમાશાતે ॥ ૧૪૬૭

૪ ૬ ૩ ૧૨૦૧a યુઞ્જન્તિ બ્રધ્નમરુષં ચરન્તં પરિ તસ્થુષઃ ।
૪ ૬ ૩ ૧૨૦૧c રોચન્તે રોચના દિવિ ॥ ૧૪૬૮
૪ ૬ ૩ ૧૨૦૨a યુઞ્જન્ત્યસ્ય કામ્યા હરી વિપક્ષસા રથે ।
૪ ૬ ૩ ૧૨૦૨c શોણા ધૃષ્ણૂ નૃવાહસા ॥ ૧૪૬૯
૪ ૬ ૩ ૧૨03a કેતું કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે ।
૪ ૬ ૩ ૧૨03c સમુષદ્ભિરજાયથાઃ ॥ ૧૪૭૦

૪ ૬ ૩ ૧૩૦૧a અયઁ સોમ ઇન્દ્ર તુભ્યઁ સુન્વે તુભ્યં પવતે ત્વમસ્ય પાહિ ।
૪ ૬ ૩ ૧૩૦૧c ત્વઁ હ યં ચકૃષે ત્વં વવૃષ ઇન્દું મદાય યુજ્યાય સોમમ્ ॥ ૧૪૭૧
૪ ૬ ૩ ૧૩૦૨a સ ઈઁ રથો ન ભુરિષાડયોજિ મહઃ પુરૂણિ સાતયે વસૂનિ ।

૪ ૬ ૩ ૧૩૦૨c આદીં વિશ્વા નહુષ્યાણિ જાતા સ્વર્ષાતા વન ઊર્ધ્વા નવન્ત ॥ ૧૪૭૨
૪ ૬ ૩ ૧૩૦૩a શુષ્મી શર્ધો ન મારુતં પવસ્વાનભિશસ્તા દિવ્યા યથા વિટ્ ।
૪ ૬ ૩ ૧૩૦૩c આપો ન મક્ષૂ સુમતિર્ભવા નઃ સહસ્રાપ્સાઃ પૃતનાષાણ્ન યજ્ઞઃ ॥ ૧૪૭૩

૪ ૬ ૩ ૧૪૦૧a ત્વમગ્ને યજ્ઞાનાઁ હોતા વિશ્વેષાઁ હિતઃ ।
૪ ૬ ૩ ૧૪૦૧c દેવેભિર્માનુષે જને ॥ ૧૪૭૪
૪ ૬ ૩ ૧૪૦૨a સ નો મન્દ્રાભિરધ્વરે જિહ્વાભિર્યજા મહઃ ।
૪ ૬ ૩ ૧૪૦૨c આ દેવાન્વક્ષિ યક્ષિ ચ ॥ ૧૪૭૫
૪ ૬ ૩ ૧૪૦૩a વેત્થા હિ વેધો અધ્વનઃ પથશ્ચ દેવાઞ્જસા ।
૪ ૬ ૩ ૧૪૦૩c અગ્ને યજ્ઞેષુ સુક્રતો ॥ ૧૪૭૬

૪ ૬ ૩ ૧૫૦૧a હોતા દેવો અમર્ત્યઃ પુરસ્તાદેતિ માયયા ।
૪ ૬ ૩ ૧૫૦૧c વિદથાનિ પ્રચોદયન્ ॥ ૧૪૭૭
૪ ૬ ૩ ૧૫૦૨a વાજી વાજેષુ ધીયતેઽધ્વરેષુ પ્ર ણીયતે ।
૪ ૬ ૩ ૧૫૦૨c વિપ્રો યજ્ઞસ્ય સાધનઃ ॥ ૧૪૭૮
૪ ૬ ૩ ૧૫૦૩a ધિયા ચક્રે વરેણ્યો ભૂતાનાં ગર્ભમા દધે ।
૪ ૬ ૩ ૧૫૦૩c દક્ષસ્ય પિતરં તના ॥ ૧૪૭૯

૪ ૬ ૩ ૧૬૦૧a આ સુતે સિઞ્ચત શ્રિયઁ રોદસ્યોરભિશ્રિયમ્ ।
૪ ૬ ૩ ૧૬૦૧c રસા દધીત વૃષભમ્ ॥ ૧૪૮૦
૪ ૬ ૩ ૧૬૦૨a તે જાનત સ્વમોક્યાઉઁ સં વત્સાસો ન માતૃભિઃ ।
૪ ૬ ૩ ૧૬૦૨c મિથો નસન્ત જામિભિઃ ॥ ૧૪૮૧
૪ ૬ ૩ ૧૬૦૩a ઉપ સ્રક્વેષુ બપ્સતઃ કૃણ્વતે ધરુણં દિવિ ।
૪ ૬ ૩ ૧૬૦૩c ઇન્દ્રે અગ્ના નમઃ સ્વઃ ॥ ૧૪૮૨

૪ ૬ ૩ ૧૭૦૧a તદિદાસ ભુવનેષુ જ્યેષ્ઠં યતો જજ્ઞા ઉગ્રસ્ત્વેષનૃમ્ણઃ ।
૪ ૬ ૩ ૧૭૦૧c સદ્યો જજ્ઞાનો નિ રિણાતિ શત્રૂનનુ યં વિશ્વે મદન્ત્યૂમાઃ ॥ ૧૪૮૩
૪ ૬ ૩ ૧૭૦૨a વાવૃધાનઃ શવસા ભૂર્યોજાઃ શત્રુર્દાસાય ભિયસં દધાતિ ।
૪ ૬ ૩ ૧૭૦૨c અવ્યનચ્ચ વ્યનચ્ચ સસ્નિ સં તે નવન્ત પ્રભૃતા મદેષુ ॥ ૧૪૮૪
૪ ૬ ૩ ૧૭૦૩a ત્વે ક્રતુમપિ વૃઞ્જન્તિ વિશ્વે દ્વિર્યદેતે ત્રિર્ભવન્ત્યૂમાઃ ।
૪ ૬ ૩ ૧૭૦૩c સ્વાદોઃ સ્વાદીયઃ સ્વાદુના સૃજા સમદઃ સુ મધુ મધુનાભિ યોધીઃ ॥ ૧૪૮૫

૪ ૬ ૩ ૧૮૦૧a ત્રિકદ્રુકેષુ મહિષો યવાશિરં તુવિશુષ્મસ્તૃમ્પત્સોમમપિબદ્વિષ્ણુના સુતં યથાવશમ્ ।
૪ ૬ ૩ ૧૮૦૧c સ ઈં મમાદ મહિ કર્મ કર્તવે મહામુરુઁ સૈનઁ સશ્ચદ્દેવો દેવઁ સત્ય ઇન્દુઃ સત્યમિન્દ્રમ્ ॥ ૧૪૮૬
૪ ૬ ૩ ૧૮૦૨a સાકં જાતઃ ક્રતુના સાકમોજસા વવક્ષિથ સાકં વૃદ્ધો વીર્યૈઃ સાસહિર્મૃધો વિચર્ષણિઃ ।

૪ ૬ ૩ ૧૮૦૨c દાતા રાધ સ્તુવતે કામ્યં વસુ પ્રચેતન સૈનઁ સશ્ચદ્દેવો દેવઁ સત્ય ઇન્દુઃ સત્યમિન્દ્રમ્ ॥ ૧૪૮૭
૪ ૬ ૩ ૧૮૦૩a અધ ત્વિષીમાઁ અભ્યોજસા કૃવિં યુધાભવદા રોદસી અપૃણદસ્ય મજ્મના પ્ર વાવૃધે ।
૪ ૬ ૩ ૧૮૦૩c અધત્તાન્યં જઠરે પ્રેમરિચ્યત પ્ર ચેતય સૈનઁ સશ્ચદ્દેવો દેવઁ સત્ય ઇન્દુઃ સત્યમિન્દ્રમ્ ॥ ૧૪૮૮

સપ્તમ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

૪ ૭ ૧ ૦૧૦૧a અભિ પ્ર ગોપતિં ગિરેન્દ્રમર્ચ યથા વિદે ।
૪ ૭ ૧ ૦૧૦૧c મૂનુઁ સત્યસ્ય સત્પતિમ્ ॥ ૧૪૮૯
૪ ૭ ૧ ૦૧૦૨a આ હરયઃ સસૃજ્રિરેઽરુષીરધિ બર્હિષિ ।
૪ ૭ ૧ ૦૧૦૨c યત્રાભિ સંનવામહે ॥ ૧૪૯૦
૪ ૭ ૧ ૦૧૦૩a ઇન્દ્રાય ગાવ આશિરં દુદુહ્રે વજ્રિણે મધુ ।
૪ ૭ ૧ ૦૧૦૩c યત્સીમુપહ્વરે વિદત્ ॥ ૧૪૯૧

૪ ૭ ૧ ૦૨૦૧a આ નો વિશ્વાસુ હવ્યમિન્દ્રઁ સમત્સુ ભૂષત ।
૪ ૭ ૧ ૦૨૦૧c ઉપ બ્રહ્માણિ સવનાનિ વૃત્રહન્પરમજ્યા ઋચીષમ ॥ ૧૪૯૨
૪ ૭ ૧ ૦૨૦૨a ત્વં દાતા પ્રથમો રાધસામસ્યસિ સત્ય ઈશાનકૃત્ ।
૪ ૭ ૧ ૦૨૦૨c તુવિદ્યુમ્નસ્ય યુજ્યા વૃણીમહે પુત્રસ્ય શવસો મહઃ ॥ ૧૪૯૩

૪ ૭ ૧ ૦૩૦૧a પ્રત્નં પીયૂષં પૂર્વ્યં યદુક્થ્યં મહો ગાહદ્દિવ આ નિરધુક્ષત ।
૪ ૭ ૧ ૦૩૦૧c ઇન્દ્રમભિ જાયમાનઁ સમસ્વરન્ ॥ ૧૪૯૪
૪ ૭ ૧ ૦૩૦૨a આદીં કે ચિત્પશ્યમાનાસ આપ્યં વસુરુચો દિવ્યા અભ્યનૂષત ।
૪ ૭ ૧ ૦૩૦૨c દિવો ન વારઁ સવિતા વ્યૂર્ણુતે ॥ ૧૪૯૫
૪ ૭ ૧ ૦૩૦૩a અધ યદિમે પવમાન રોદસી ઇમા ચ વિશ્વા ભુવનાભિ મજ્મના ।
૪ ૭ ૧ ૦૩૦૩c યૂથે ન નિષ્ઠા વૃષભો વિ રાજસિ ॥ ૧૪૯૬

૪ ૭ ૧ ૦૪૦૧a ઇમમૂ ષુ ત્વમસ્માકઁ સનિં ગાયત્રં નવ્યાઁસમ્ ।
૪ ૭ ૧ ૦૪૦૧c અગ્ને દેવેષુ પ્ર વોચઃ ॥ ૧૪૯૭
૪ ૭ ૧ ૦૪૦૨a વિભક્તાસિ ચિત્રભાનો સિન્ધોરૂર્મા ઉપાક આ ।
૪ ૭ ૧ ૦૪૦૨c સદ્યો દાશુષે ક્ષરસિ ॥ ૧૪૯૮
૪ ૭ ૧ ૦૪૦૩a આ નો ભજ પરમેષ્વા વાજેષુ મધ્યમેષુ ।
૪ ૭ ૧ ૦૪૦૩c શિક્ષા વસ્વો અન્તમસ્ય ॥ ૧૪૯૯

૪ ૭ ૧ ૦૫૦૧a અહમિદ્ધિ પિતુષ્પરિ મેધામૃતસ્ય જગ્રહ ।
૪ ૭ ૧ ૦૫૦૧c અહઁ સૂર્ય ઇવાજનિ ॥ ૧૫૦૦
૪ ૭ ૧ ૦૫૦૨a અહં પ્રત્નેન જન્મના ગિરઃ શુમ્ભામિ કણ્વવત્ ।
૪ ૭ ૧ ૦૫૦૨c યેનેન્દ્રઃ શુષ્મમિદ્દધે ॥ ૧૫૦૧

૪ ૭ ૧ ૦૫૦૩a  યે ત્વામિન્દ્ર ન તુષ્ટુવુરૃષયો યે ચ તુષ્ટુવુઃ ।
૪ ૭ ૧ ૦૫૦૩c  મમેદ્વર્ધસ્વ સુષ્ટુતઃ ॥ ૧૫૦૨

૪ ૭ ૧ ૦૬૦૧a  અગ્ને વિશ્વેભિરગ્નિભિર્જોષિ બ્રહ્મ સહસ્કૃત ।
૪ ૭ ૧ ૦૬૦૧c  યે દેવત્રા ય આયુષુ તેભિર્નો મહયા ગિરઃ ॥ ૧૫૦૩
૪ ૭ ૧ ૦૬૦૨a  પ્ર સ વિશ્વેભિરગ્નિભિરગ્નિઃ સ યસ્ય વાજિનઃ ।
૪ ૭ ૧ ૦૬૦૨c  તનયે તોકે અસ્મદા સમ્યઙ્વાજૈઃ પરીવૃતઃ ॥ ૧૫૦૪
૪ ૭ ૧ ૦૬૦૩a  ત્વં નો અગ્ને અગ્નિભિર્બ્રહ્મ યજ્ઞં ચ વર્ધય ।
૪ ૭ ૧ ૦૬૦૩c  ત્વં નો દેવતાતયે રાયો દાનાય ચોદય ॥ ૧૫૦૫

૪ ૭ ૧ ૦૭૦૧a  ત્વે સોમ પ્રથમા વૃક્તબર્હિષો મહે વાજાય શ્રવસે ધિયન્ દધુઃ ।
૪ ૭ ૧ ૦૭૦૧c  સ ત્વં નો વીર વીર્યાય ચોદય ॥ ૧૫૦૬
૪ ૭ ૧ ૦૭૦૨a  અભ્યભિ હિ શ્રવસા તતર્દિથોત્સં ન કં ચિજ્જનપાનમક્ષિતમ્ ।
૪ ૭ ૧ ૦૭૦૨c  શર્યાભિર્ન ભરમાણો ગભસ્ત્યોઃ ॥ ૧૫૦૭
૪ ૭ ૧ ૦૭૦૩a  અજીજનો અમૃત મર્ત્યાય અમૃતસ્ય ધર્મન્નમૃતસ્ય ચારુણઃ ।
૪ ૭ ૧ ૦૭૦૩c  સદાસરો વાજમચ્છા સનિષ્યદત્ ॥ ૧૫૦૮

૪ ૭ ૧ ૦૮૦૧a  એન્દુમિન્દ્રાય સિઞ્ચત પિબાતિ સોમ્યં મધુ ।
૪ ૭ ૧ ૦૮૦૧c  પ્ર રાધાँસિ ચોદયતે મહિત્વના ॥ ૧૫૦૯
૪ ૭ ૧ ૦૮૦૨a  ઉપો હરીણાં પતિँ રાધઃ પૃઞ્ચન્તમબ્રવમ્ ।
૪ ૭ ૧ ૦૮૦૨c  નૂનँ શ્રુધિ સ્તુવતો અશ્વ્યસ્ય ॥ ૧૫૧૦
૪ ૭ ૧ ૦૮૦૩a  ન હ્યાઙ્ગ પુરા ચ ન જજ્ઞે વીરતરસ્ત્વત્ ।
૪ ૭ ૧ ૦૮૦૩c  ન કી રાયા નૈવથા ન ભન્દના ॥ ૧૫૧૧

૪ ૭ ૧ ૦૯૦૧a  નદં વ ઓદતીનાં નદં યોયુવતીનામ્ ।
૪ ૭ ૧ ૦૯૦૧c  પતિં વો અઘ્ન્યાનાં ધેનૂનામિષુધ્યસિ ॥ ૧૫૧૨

૪ ૭ ૧ ૧૦૦૧a  દેવો વો દ્રવિણોદાઃ પૂર્ણાં વિવષ્ટ્વાસિચમ્ ।
૪ ૭ ૧ ૧૦૦૧c  ઉદ્વા સિઞ્ચધ્વમુપ વા પૃણધ્વમાદિદ્વો દેવ ઓહતે ॥ ૧૫૧૩
૪ ૭ ૧ ૧૦૦૨a  તँ હોતારમધ્વરસ્ય પ્રચેતસં વહ્નિં દેવા અકૃણ્વત ।
૪ ૭ ૧ ૧૦૦૨c  દધાતિ રત્નં વિધતે સુવીર્યમગ્નિર્જનાય દાશુષે ॥ ૧૫૧૪

૪ ૭ ૧ ૧૧૦૧a  અદર્શિ ગાતુવિત્તમો યસ્મિન્વ્રતાન્યાદધુઃ ।
૪ ૭ ૧ ૧૧૦૧c  ઉપોષુ જાતમાર્યસ્ય વર્ધનમગ્નિં નક્ષન્તુ નો ગિરઃ ॥ ૧૫૧૫
૪ ૭ ૧ ૧૧૦૨a  યસ્માદ્રેજન્ત કૃષ્ટયશ્ચર્કૃત્યાનિ કૃણ્વતઃ ।
૪ ૭ ૧ ૧૧૦૨c  સહસ્રસાં મેધસાતાવિવ ત્મનાગ્નિં ધીભિર્નમસ્યત ॥ ૧૫૧૬

૪ ૭ ૧ ૧૧૦૩a  પ્ર દૈવોદાસો અગ્નિર્દેવ ઇન્દ્રો ન મજ્મના ।
૪ ૭ ૧ ૧૧૦૩c  અનુ માતરં પૃથિવીં વિ વાવૃતે તસ્થૌ નાકસ્ય શર્મણિ ॥ ૧૫૧૭

૪ ૭ ૧ ૧૨૦૧a  અગ્ન આયૂँષિ પવસે આસુવોર્જમિષં ચ નઃ ।
૪ ૭ ૧ ૧૨૦૧c  આરે બાધસ્વ દુચ્છુનામ્ ॥ ૧૫૧૮
૪ ૭ ૧ ૧૨૦૨a  અગ્નિરૃષિઃ પવમાનઃ પાઞ્ચજન્યઃ પુરોહિતઃ ।
૪ ૭ ૧ ૧૨૦૨c  તમીમહે મહાગયમ્ ॥ ૧૫૧૯
૪ ૭ ૧ ૧૨૦૩a  અગ્ને પવસ્વ સ્વપા અસ્મે વર્ચઃ સુવીર્યમ્ ।
૪ ૭ ૧ ૧૨૦૩c  દધદ્રયિં મયિ પોષમ્ ॥ ૧૫૨૦

૪ ૭ ૧ ૧૩૦૧a  અગ્ને પાવક રોચિષા મન્દ્રયા દેવ જિહ્વયા ।
૪ ૭ ૧ ૧૩૦૧c  આ દેવાન્વક્ષિ યક્ષિ ચ ॥ ૧૫૨૧
૪ ૭ ૧ ૧૩૦૨a  તં ત્વા ધૃતસ્નવીમહે ચિત્રભાનો સ્વર્દૃશમ્ ।
૪ ૭ ૧ ૧૩૦૨c  દેવાँ આ વીતયે વહ ॥ ૧૫૨૨
૪ ૭ ૧ ૧૩૦૩a  વીતિહોત્રં ત્વા કવે દ્યુમન્તँ સમિધીમહિ ।
૪ ૭ ૧ ૧૩૦૩c  અગ્ને બૃહન્તમધ્વરે ॥ ૧૫૨૩

૪ ૭ ૧ ૧૪૦૧a  અવા નો અગ્ન ઊતિભિર્ગાયત્રસ્ય પ્રભર્મણિ ।
૪ ૭ ૧ ૧૪૦૧c  વિશ્વાસુ ધીષુ વન્દ્ય ॥ ૧૫૨૪
૪ ૭ ૧ ૧૪૦૨a  આ નો અગ્ને રયિં ભર સત્રાસાહં વરેણ્યમ્ ।
૪ ૭ ૧ ૧૪૦૨c  વિશ્વાસુ પૃત્સુ દુષ્ટરમ્ ॥ ૧૫૨૫
૪ ૭ ૧ ૧૪૦૩a  આ નો અગ્ને સુચેતુના રયિં વિશ્વાયુપોષસમ્ ।
૪ ૭ ૧ ૧૪૦૩c  માર્ડીકં ધેહિ જીવસે ॥ ૧૫૨૬

૪ ૭ ૧ ૧૫૦૧a  અગ્નિँ હિન્વન્તુ નો ધિયઃ સપ્તિમાશુમિવાજિષુ ।
૪ ૭ ૧ ૧૫૦૧c  તેન જેષ્મ ધનન્ધનમ્ ॥ ૧૫૨૭
૪ ૭ ૧ ૧૫૦૨a  યયા ગા આકરામહૈ સેનયાગ્ને તવોત્યા ।
૪ ૭ ૧ ૧૫૦૨c  તાં નો હિન્વ મઘત્તયે ॥ ૧૫૨૮
૪ ૭ ૧ ૧૫૦૩a  આગ્ને સ્થૂરँ રયિં ભર પૃથું ગોમન્તમશ્વિનમ્ ।
૪ ૭ ૧ ૧૫૦૩c  અઙ્ધિ ખં વર્ત્તયા પવિમ્ ॥ ૧૫૨૯
૪ ૭ ૧ ૧૫૦૪a  અગ્ને નક્ષત્રમજરમા સૂર્યં રોહયો દિવિ ।
૪ ૭ ૧ ૧૫૦૪c  દધજ્જ્યોતિર્જનેભ્યઃ ॥ ૧૫૩૦
૪ ૭ ૧ ૧૫૦૫a  અગ્ને કેતુર્વિશામસિ પ્રેષ્ઠઃ શ્રેષ્ઠ ઉપસ્થસત્ ।
૪ ૭ ૧ ૧૫૦૫c  બોધા સ્તોત્રે વયો દધત્ ॥ ૧૫૩૧

૪ ૭ ૧ ૧૬૦૧a  અગ્નિર્મૂર્ધા દિવઃ કકુત્પતિઃ પૃથિવ્યા અયમ્ ।
૪ ૭ ૧ ૧૬૦૧c  અપાઁ રેતાઁસિ જિન્વતિ ॥ ૧૫૩૨
૪ ૭ ૧ ૧૬૦૨a  ઈશિષે વાર્યસ્ય હિ દાત્રસ્યાગ્ને સ્વઃપતિઃ ।
૪ ૭ ૧ ૧૬૦૨c  સ્તોતા સ્યાં તવ શર્મણિ ॥ ૧૫૩૩
૪ ૭ ૧ ૧૬૦૩a  ઉદગ્ને શુચયસ્તવ શુક્રા ભ્રાજન્ત ઈરતે ।
૪ ૭ ૧ ૧૬૦૩c  તવ જ્યોતીઁષ્યર્ચયઃ ॥ ૧૫૩૪

સપ્તમ પ્રપાઠકઃ । દ્વિતીયોઽર્ધઃ

૪ ૭ ૨ ૦૧૦૧a  કસ્તે જામિર્જનાનામગ્ને કો દાશ્વધ્વરઃ ।
૪ ૭ ૨ ૦૧૦૧c  કો હ કસ્મિન્નસિ શ્રિતઃ ॥ ૧૫૩૫
૪ ૭ ૨ ૦૧૦૨a  ત્વં જામિર્જનાનામગ્ને મિત્રો અસિ પ્રિયઃ ।
૪ ૭ ૨ ૦૧૦૨c  સખા સખિભ્ય ઈડ્યઃ ॥ ૧૫૩૬
૪ ૭ ૨ ૦૧૦૩a  યજા નો મિત્રાવરુણા યજા દેવાઁ ઋતં બૃહત્ ।
૪ ૭ ૨ ૦૧૦૩c  અગ્ને યક્ષિ સ્વં દમમ્ ॥ ૧૫૩૭

૪ ૭ ૨ ૦૨૦૧a  ઈડેન્યો નમસ્યસ્તિરસ્તમાઁસિ દર્શતઃ ।
૪ ૭ ૨ ૦૨૦૧c  સમગ્નિરિધ્યતે વૃષા ॥ ૧૫૩૮
૪ ૭ ૨ ૦૨૦૨a  વૃષો અગ્નિઃ સમિધ્યતેઽશ્વો ન દેવવાહનઃ ।
૪ ૭ ૨ ૦૨૦૨c  તઁ હવિષ્મન્ત ઈડતે ॥ ૧૫૩૯
૪ ૭ ૨ ૦૨૦૩a  વૃષણં ત્વા વયં વૃષન્વૃષણઃ સમિધીમહિ ।
૪ ૭ ૨ ૦૨૦૩c  અગ્ને દીદ્યતં બૃહત્ ॥ ૧૫૪૦

૪ ૭ ૨ ૦૩૦૧a  ઉત્તે બૃહન્તો અર્ચયઃ સમિધાનસ્ય દીદિવઃ ।
૪ ૭ ૨ ૦૩૦૧c  અગ્ને શુક્રાસ ઈરતે ॥ ૧૫૪૧
૪ ૭ ૨ ૦૩૦૨a  ઉપ ત્વા જુહ્વોૐ મમ ઘૃતાચીર્યન્તુ હર્યત ।
૪ ૭ ૨ ૦૩૦૨c  અગ્ને હવ્યા જુષસ્વ નઃ ॥ ૧૫૪૨
૪ ૭ ૨ ૦૩૦૩a  મન્દ્રઁ હોતારમૃત્વિજં ચિત્રભાનું વિભાવસુમ્ ।
૪ ૭ ૨ ૦૩૦૩c  અગ્નિમીડે સ ઉ શ્રવત્ ॥ ૧૫૪૩

૪ ૭ ૨ ૦૪૦૧a  પાહિ નો અગ્ન એકયા પાહ્યૂ૩ત દ્વિતીયયા ।
૪ ૭ ૨ ૦૪૦૧c  પાહિ ગીર્ભિસ્તિસૃભિરૂર્જાં પતે પાહિ ચતસૃભિર્વસો ॥ ૧૫૪૪
૪ ૭ ૨ ૦૪૦૨a  પાહિ વિશ્વસ્માદ્રક્ષસો અરાવ્ણઃ પ્ર સ્મ વાજેષુ નોઽવ ।
૪ ૭ ૨ ૦૪૦૨c  ત્વામિદ્ધિ નેદિષ્ઠં દેવતાતય આપિં નક્ષામહે વૃધે ॥ ૧૫૪૫

૪ ૭ ૨ ૦૫૦૧a  ઇનો રાજન્નરતિઃ સમિદ્ધો રૌદ્રો દક્ષાય સુષુમાઁ અદર્શિ ।

૪ ૭ ૨ ૦૫૦૧c  ચિકિદ્વિ ભાતિ ભાસા બૃહતાસિક્નીમેતિ રુશતીમપાજન્ ॥ ૧૫૪૬
૪ ૭ ૨ ૦૫૦૨a  કૃષ્ણાં યદેનીમભિ વર્પસાભૂજ્જનયન્યોષાં બૃહતઃ પિતુર્જામ્ ।
૪ ૭ ૨ ૦૫૦૨c  ઊર્ધ્વં ભાનુઁ સૂર્યસ્ય સ્તભાયન્દિવો વસુભિરરતિર્વિ ભાતિ ॥ ૧૫૪૭
૪ ૭ ૨ ૦૫૦૩a  ભદ્રો ભદ્રયા સચમાન આગાત્સ્વસારં જારો અભ્યેતિ પશ્ચાત્ ।
૪ ૭ ૨ ૦૫૦૩c  સુપ્રકેતૈર્દ્યુભિરગ્નિર્વિતિષ્ઠન્નુશદ્ભિર્વર્ણૈરભિ રામમસ્થાત્ ॥ ૧૫૪૮

૪ ૭ ૨ ૦૬૦૧a  કયા તે અગ્ને અઙ્ગિર ઊર્જો નપાદુપસ્તુતિમ્ ।
૪ ૭ ૨ ૦૬૦૧c  વરાય દેવ મન્યવે ॥ ૧૫૪૯
૪ ૭ ૨ ૦૬૦૨a  દાશેમ કસ્ય મનસા યજ્ઞસ્ય સહસો યહો ।
૪ ૭ ૨ ૦૬૦૨c  કદુ વોચ ઇદં નમઃ ॥ ૧૫૫૦
૪ ૭ ૨ ૦૬૦૩a  અધા ત્વઁ હિ નસ્કરો વિશ્વા અસ્મભ્યઁ સુક્ષિતીઃ ।
૪ ૭ ૨ ૦૬૦૩c  વાજદ્રવિણસો ગિરઃ ॥ ૧૫૫૧

૪ ૭ ૨ ૦૭૦૧a  અગ્ન આ યાહ્યગ્નિભિર્હોતારં ત્વા વૃણીમહે ।
૪ ૭ ૨ ૦૭૦૧c  આ ત્વામનક્તુ પ્રયતા હવિષ્મતી યજિષ્ઠં બર્હિરાસદે ॥ ૧૫૫૨
૪ ૭ ૨ ૦૭૦૨a  અચ્છા હિ ત્વા સહસઃ સૂનો અઙ્ગિરઃ સ્રુચશ્ચરન્ત્યધ્વરે ।
૪ ૭ ૨ ૦૭૦૨c  ઊર્જો નપાતં ઘૃતકેશમીમહેઽગ્નિં યજ્ઞેષુ પૂર્વ્યમ્ ॥ ૧૫૫૩

૪ ૭ ૨ ૦૮૦૧a  અચ્છા નઃ શીરશોચિષં ગિરો યન્તુ દર્શતમ્ ।
૪ ૭ ૨ ૦૮૦૧c  અચ્છા યજ્ઞાસો નમસા પુરૂવસું પુરુપ્રશસ્તમૂતયે ॥ ૧૫૫૪
૪ ૭ ૨ ૦૮૦૨a  અગ્નિઁ સૂનુઁ સહસો જાતવેદસં દાનાય વાર્યાણામ્ ।
૪ ૭ ૨ ૦૮૦૨c  દ્વિતા યો ભૂદમૃતો મર્ત્યેષ્વા હોતા મન્દ્રતમો વિશિ ॥ ૧૫૫૫

૪ ૭ ૨ ૦૯૦૧a  અદાભ્યઃ પુરએતા વિશામગ્નિર્માનુષીણામ્ ।
૪ ૭ ૨ ૦૯૦૧c  તૂર્ણી રથઃ સદા નવઃ ॥ ૧૫૫૬
૪ ૭ ૨ ૦૯૦૨a  અભિ પ્રયાઁસિ વાહસા દાશ્વાઁ અશ્નોતિ મર્ત્યઃ ।
૪ ૭ ૨ ૦૯૦૨c  ક્ષયં પાવકશોચિષઃ ॥ ૧૫૫૭
૪ ૭ ૨ ૦૯૦૩a  સાહ્વાન્વિશ્વા અભિયુજઃ ક્રતુર્દેવાનામમૃક્તઃ ।
૪ ૭ ૨ ૦૯૦૩c  અગ્નિસ્તુવિશ્રવસ્તમઃ ॥ ૧૫૫૮

૪ ૭ ૨ ૧૦૦૧a  ભદ્રો નો અગ્નિરાહુતો ભદ્રા રાતિઃ સુભગ ભદ્રો અધ્વરઃ ।
૪ ૭ ૨ ૧૦૦૧c  ભદ્રા ઉત પ્રશસ્તયઃ ॥ ૧૫૫૯
૪ ૭ ૨ ૧૦૦૨a  ભદ્રં મનઃ કૃણુષ્વ વૃત્રતૂર્યે યેના સમત્સુ સાસહિઃ ।
૪ ૭ ૨ ૧૦૦૨c  અવ સ્થિરા તનુહિ ભૂરિ શર્ધતાં વનેમા તે અભિષ્ટયે ॥ ૧૫૬૦

૪ ૭ ૨ ૧૧૦૧a  અગ્ને વાજસ્ય ગોમત ઈશાનઃ સહસો યહો ।

૪ ૭ ૨ ૧૧૦૧c અસ્મે દેહિ જાતવેદો મહિ શ્રવઃ ॥ ૧૫૬૧
૪ ૭ ૨ ૧૧૦૨a સ ઇધાનો વસુષ્કવિરગ્નિરીડેન્યો ગિરા ।
૪ ૭ ૨ ૧૧૦૨c રેવદસ્મભ્યં પુર્વણીક દીદિહિ ॥ ૧૫૬૨
૪ ૭ ૨ ૧૧૦૩a ક્ષપો રાજન્નુત ત્મનાગ્ને વસ્તોરુતોષસઃ ।
૪ ૭ ૨ ૧૧૦૩c સ તિગ્મજમ્ભ રક્ષસો દહ પ્રતિ ॥ ૧૫૬૩

૪ ૭ ૨ ૧૨૦૧a વિશોવિશો વો અતિથિં વાજયન્તઃ પુરુપ્રિયમ્ ।
૪ ૭ ૨ ૧૨૦૧c અગ્નિં વો દુર્યં વચ સ્તુષે શૂષસ્ય મન્મભિઃ ॥ ૧૫૬૪
૪ ૭ ૨ ૧૨૦૨a યં જનાસો હવિષ્મન્તો મિત્રં ન સર્પિરાસુતિમ્ ।
૪ ૭ ૨ ૧૨૦૨c પ્રશઁસન્તિ પ્રશસ્તિભિઃ ॥ ૧૫૬૫
૪ ૭ ૨ ૧૨૦૩a પન્યાઁસં જાતવેદસં યો દેવતાત્યુધતા ।
૪ ૭ ૨ ૧૨૦૩c હવ્યાન્યૈરયદ્દિવિ ॥ ૧૫૬૬

૪ ૭ ૨ ૧૩૦૧a સમિદ્ધમગ્નિઁ સમિધા ગિરા ગૃણે શુચિં પાવકં પુરો અધ્વરે ધ્રુવમ્ ।
૪ ૭ ૨ ૧૩૦૧c વિપ્રઁ હોતારં પુરુવારમદ્રુહં કવિઁ સુમ્નૈરીમહે જાતવેદસમ્ ॥ ૧૫૬૭
૪ ૭ ૨ ૧૩૦૨a ત્વાં દૂતમગ્ને અમૃતં યુગેયુગે હવ્યવાહં દધિરે પાયુમીડ્યમ્।
૪ ૭ ૨ ૧૩૦૨c દેવાસશ્ચ મર્ત્તાસશ્ચ જાગૃવિં વિભું વિશ્પતિં નમસા નિ ષેદિરે ॥ ૧૫૬૮
૪ ૭ ૨ ૧૩૦૩a વિભૂષન્નગ્ન ઉભયાઁ અનુ વ્રતા દૂતો દેવાનાઁ રજસી સમીયસે ।
૪ ૭ ૨ ૧૩૦૩c યત્તે ધીતિઁ સુમતિમાવૃણીમહેऽધ સ્મા નસ્ત્રિવરૂથઃ શિવો ભવ ॥ ૧૫૬૯

૪ ૭ ૨ ૧૪૦૧a ઉપ ત્વા જામયો ગિરો દેદિશતીર્હવિષ્કૃતઃ ।
૪ ૭ ૨ ૧૪૦૧c વાયોરનીકે અસ્થિરન્ ॥ ૧૫૭૦
૪ ૭ ૨ ૧૪૦૨a યસ્ય ત્રિધાત્વવૃતં બર્હિસ્તસ્થાવસન્દિનમ્ ।
૪ ૭ ૨ ૧૪૦૨c આપશ્ચિન્નિ દધા પદમ્ ॥ ૧૫૭૧
૪ ૭ ૨ ૧૪૦૩a પદં દેવસ્ય મીઢુષોऽનાધૃષ્ટાભિરૂતિભિઃ ।
૪ ૭ ૨ ૧૪૦૩c ભદ્રા સૂર્ય ઇવોપદૃક્ ॥ ૧૫૭૨

સપ્તમ પ્રપાઠકઃ । તૃતીયોऽર્ધઃ
૪ ૭ ૩ ૦૧૦૧a અભિ ત્વા પૂર્વપીતય ઇન્દ્ર સ્તોમેભિરાયવઃ ।
૪ ૭ ૩ ૦૧૦૧c સમીચીનાસ ઋભવઃ સમસ્વરન્રુદ્રા ગૃણન્ત પૂર્વ્યમ્ ॥ ૧૫૭૩
૪ ૭ ૩ ૦૧૦૨a અસ્યેદિન્દ્રો વાવૃધે વૃષ્ણ્યઁ શવો મદે સુતસ્ય વિષ્ણવિ ।
૪ ૭ ૩ ૦૧૦૨c અદ્યા તમસ્ય મહિમાનમાયવોऽનુ ષ્ટુવન્તિ પૂર્વથા ॥ ૧૫૭૪

૪ ૭ ૩ ૦૨૦૧a પ્ર વામર્ચન્ત્યુક્થિનો નીથાવિદો જરિતારઃ ।
૪ ૭ ૩ ૦૨૦૧c ઇન્દ્રાગ્ની ઇષ આ વૃણે ॥ ૧૫૭૫

૪ ૭ ૩ ૦૨૦૨a ઇન્દ્રાગ્ની નવતિં પુરો દાસપત્નીરધૂનુતમ્ ।
૪ ૭ ૩ ૦૨૦૨c સાકમેકેન કર્મણા ॥ ૧૫૭૬
૪ ૭ ૩ ૦૨૦૩a ઇન્દ્રાગ્ની અપસસ્પર્યુપ પ્ર યન્તિ ધીતયઃ ।
૪ ૭ ૩ ૦૨૦૩c ઋતસ્ય પથ્યાऽऽ૩ અનુ ॥ ૧૫૭૭
૪ ૭ ૩ ૦૨૦૪a ઇન્દ્રાગ્ની તવિષાણી વાઁ સધસ્થાનિ પ્રયાઁસિ ચ ।
૪ ૭ ૩ ૦૨૦૪c યુવોરપ્તૂર્યં હિતમ્ ॥ ૧૫૭૮

૪ ૭ ૩ ૦૩૦૧a શગ્ધ્યૂ૩ ષુ શચીપત ઇન્દ્ર વિશ્વાભિરૂતિભિઃ ।
૪ ૭ ૩ ૦૩૦૧c ભગં ન હિ ત્વા યશસં વસુવિદમનુ શૂર ચરામસિ ॥ ૧૫૭૯
૪ ૭ ૩ ૦૩૦૨a પૌરો અશ્વસ્ય પુરુકૃદ્ગવામસ્યુત્સો દેવ હિરણ્યયઃ ।
૪ ૭ ૩ ૦૩૦૨c ન કિર્હિ દાનં પરિ મર્ધિષત્વે યદ્યદ્યામિ તદા ભર ॥ ૧૫૮૦

૪ ૭ ૩ ૦૪૦૧a ત્વૈઁ હ્યેહિ ચેરવે વિદા ભગં વસુત્તયે ।
૪ ૭ ૩ ૦૪૦૧c ઉદ્વાવૃષસ્વ મઘવન્ગવિષ્ટય ઉદિન્દ્રાશ્વમિષ્ટયે ॥ ૧૫૮૧
૪ ૭ ૩ ૦૪૦૨a ત્વં પુરૂ સહસ્રાણિ શતાનિ ચ યૂથા દાનાય મઁહસે ।
૪ ૭ ૩ ૦૪૦૨c આ પુરન્દરં ચકૃમ વિપ્રવચસ ઇન્દ્રં ગાયન્તોऽવસે ॥ ૧૫૮૨

૪ ૭ ૩ ૦૫૦૧a યો વિશ્વા દયતે વસુ હોતા મન્દ્રો જનાનામ્ ।
૪ ૭ ૩ ૦૫૦૧c મધોર્ન પાત્રા પ્રથમાન્યસ્મૈ પ્ર સ્તોમા યન્ત્વગ્નયે ॥ ૧૫૮૩
૪ ૭ ૩ ૦૫૦૨a અશ્વ ન ગીર્ભી રથ્યઁ સુદાનવો મર્મૃજ્યન્તે દેવયવઃ ।
૪ ૭ ૩ ૦૫૦૨c ઉભે તોકે તનયે દસ્મ વિસ્પતે પર્ષિ રાધો મઘોનામ્ ॥ ૧૫૮૪

૪ ૭ ૩ ૦૬૦૧a ઇમં મે વરુણ શ્રુધી હવમદ્યા ચ મૃડય ।
૪ ૭ ૩ ૦૬૦૧c ત્વામવસ્યુરા ચકે ॥ ૧૫૮૫

૪ ૭ ૩ ૦૭૦૧a કયા ત્વં ન ઊત્યાભિ પ્ર મન્દસે વૃષન્ ।
૪ ૭ ૩ ૦૭૦૧c કયા સ્તોતૃભ્ય આ ભર ॥ ૧૫૮૬

૪ ૭ ૩ ૦૮૦૧a ઇન્દ્રમિદ્દેવતાતય ઇન્દ્રં પ્રયત્યધ્વરે ।
૪ ૭ ૩ ૦૮૦૧c ઇન્દ્રઁ સમીકે વનિનો હવામહ ઇન્દ્રં ધનસ્ય સાતયે ॥ ૧૫૮૭
૪ ૭ ૩ ૦૮૦૨a ઇન્દ્રો મહ્ના રોદસી પપ્રથચ્છવ ઇન્દ્રઃ સૂર્યમરોચયત્ ।
૪ ૭ ૩ ૦૮૦૨c ઇન્દ્રે હ વિશ્વા ભુવનાનિ યેમિર ઇન્દ્રે સુવાનાસ ઇન્દવઃ ॥ ૧૫૮૮

૪ ૭ ૩ ૦૯૦૧a વિશ્વકર્મન્હવિષા વાવૃધાનઃ સ્વયં યજસ્વ તન્વાઉઁ સ્વા હિ તે ।
૪ ૭ ૩ ૦૯૦૧c મુહ્યન્ત્વન્યે અભિતો જનાસ ઇહાસ્માકં મઘવા સૂરિરસ્તુ ॥ ૧૫૮૯

૪ ૭ ૩ ૧૦૦૧a અયા રુચા હરિણ્યા પુનાનો વિશ્વા દ્વેષાઁસિ તરતિ સયુગ્વભિઃ સૂરો ન સયુગ્વભિઃ ।

૪ ૭ ૩ ૧૦૦૧c  ધારા પૃષ્ઠસ્ય રોચતે પુનાનો અરુષો હરિઃ ।
૪ ૭ ૩ ૧૦૦૧e  વિશ્વા યદ્રૂપા પરિયાસ્યૃક્વભિઃ સપ્તાસ્યેભિરૃક્વભિઃ ॥ ૧૫૯૦
૪ ૭ ૩ ૧૦૦૨a  પ્રાચીમનુ પ્રદિશં પાતિ ચેકિતત્સઁ રશ્મિભિર્યતતે દર્શતો રથો દૈવ્યો દર્શતો રથઃ ।
૪ ૭ ૩ ૧૦૦૨c  અગ્મન્નુક્થાનિ પૌઁસ્યેન્દ્રં જૈત્રાય હર્ષયત ।
૪ ૭ ૩ ૧૦૦૨e  વજ્રશ્ચ યદ્ભવથો અનપચ્યુતા સમત્સ્વનપચ્યુતા ॥ ૧૫૯૧
૪ ૭ ૩ ૧૦૦૩a  ત્વં હ ત્યત્પણીનાં વિદો વસુ સં માતૃભિર્મર્જયસિ સ્વ આ દમ ઋતસ્ય ધીતિભિર્દમે ।
૪ ૭ ૩ ૧૦૦૩c  પરાવતો ન સામ તદ્યત્રા રણન્તિ ધીતયઃ ।
૪ ૭ ૩ ૧૦૦૩e  ત્રિધાતુભિરરુષીભિર્વયો દધે રોચમાનો વયો દધે ॥ ૧૫૯૨

૪ ૭ ૩ ૧૧૦૧a  ઉત નો ગોષણિં ધિયમશ્વસાં વાજસામુત ।
૪ ૭ ૩ ૧૧૦૧c  નૃવત્કૃણુહ્યૂતયે ॥ ૧૫૯૩

૪ ૭ ૩ ૧૨૦૧a  શશમાનસ્ય વા નરઃ સ્વેદસ્ય સત્યશવસઃ ।
૪ ૭ ૩ ૧૨૦૧c  વિદા કામસ્ય વેનતઃ ॥ ૧૫૯૪

૪ ૭ ૩ ૧૩૦૧a  ઉપ નઃ સૂનવો ગિરઃ શ઼ૃણ્વન્ત્વમૃતસ્ય યે ।
૪ ૭ ૩ ૧૩૦૧c  સુમૃડીકા ભવન્તુ નઃ ॥ ૧૫૯૫

૪ ૭ ૩ ૧૪૦૧a  પ્ર વાં મહિ દ્યવી અભ્યુપસ્તુતિં ભરામહે ।
૪ ૭ ૩ ૧૪૦૧c  શુચી ઉપ પ્રશસ્તયે ॥ ૧૫૯૬
૪ ૭ ૩ ૧૪૦૨a  પુનાને તન્વા મિથઃ સ્વેન દક્ષેણ રાજથઃ ।
૪ ૭ ૩ ૧૪૦૨c  ઊહ્યાથે સનાદૃતમ્ ॥ ૧૫૯૭
૪ ૭ ૩ ૧૪૦૩a  મહી મિત્રસ્ય સાધથસ્તરન્તી પિપ્રતી ઋતમ્ ।
૪ ૭ ૩ ૧૪૦૩c  પરિ યજ્ઞં નિ ષેદથુઃ ॥ ૧૫૯૮

૪ ૭ ૩ ૧૫૦૧a  અયમુ તે સમતસિ કપોત ઇવ ગર્ભધિમ્ ।
૪ ૭ ૩ ૧૫૦૧c  વચસ્તચ્ચિન્ન ઓહસે ॥ ૧૫૯૯
૪ ૭ ૩ ૧૫૦૨a  સ્તોત્રઁ રાધાનાં પતે ગિર્વાહો વીર યસ્ય તે ।
૪ ૭ ૩ ૧૫૦૨c  વિભૂતિરસ્તુ સૂનૃતા ॥ ૧૬૦૦
૪ ૭ ૩ ૧૫૦૩a  ઊર્ધ્વસ્તિષ્ઠા ન ઊતયેઽસ્મિન્વાજે શતક્રતો ।
૪ ૭ ૩ ૧૫૦૩c  સમન્યેષુ બ્રવાવહૈ ॥ ૧૬૦૧

૪ ૭ ૩ ૧૬૦૧a  ગાવ ઉપ વદાવટે મહિ યજ્ઞસ્ય રપ્સુદા ।
૪ ૭ ૩ ૧૬૦૧c  ઉભા કર્ણા હિરણ્યયા ॥ ૧૬૦૨
૪ ૭ ૩ ૧૬૦૨a  અભ્યારમિદદ્રયો નિષિક્તં પુષ્કરે મધુ ।
૪ ૭ ૩ ૧૬૦૨c  અવટસ્ય વિસર્જને ॥ ૧૬૦૩

૪ ૭ ૩ ૧૬૦૩a  સિઞ્ચન્તિ નમસાવટમુચ્ચાચક્રં પરિજ્માનમ્ ।
૪ ૭ ૩ ૧૬૦૩c  નીચીનબારમક્ષિતમ્ ॥ ૧૬૦૪

૪ ૭ ૩ ૧૭૦૧a  મા ભેમ મા શ્રમિષ્મોગ્રસ્ય સખ્યે તવ ।
૪ ૭ ૩ ૧૭૦૧c  મહત્તે વૃષ્ણો અભિચક્ષ્યં કૃતં પશ્યેમ તુર્વશં યદુમ્ ॥ ૧૬૦૫
૪ ૭ ૩ ૧૭૦૨a  સવ્યામનુ સ્ફિગ્યં વાવસે વૃષ્ના ન દાનો અસ્ય રોષતિ ।
૪ ૭ ૩ ૧૭૦૨c  મધ્વા સમ્પૃક્તાઃ સારઘેણ ધેનવસ્તૂયમેહિ દ્રવા પિબ ॥ ૧૬૦૬

૪ ૭ ૩ ૧૮૦૧a  ઇમા ઉ ત્વા પુરૂવસો ગિરો વર્ધન્તુ યા મમ ।
૪ ૭ ૩ ૧૮૦૧c  પાવકવર્ણાઃ શુચયો વિપશ્ચિતોઽભિ સ્તોમૈરનૂષત ॥ ૧૬૦૭
૪ ૭ ૩ ૧૮૦૨a  અયઁ સહસ્રમૃષિભિઃ સહસ્કૃતઃ સમુદ્ર ઇવ પપ્રથે ।
૪ ૭ ૩ ૧૮૦૨c  સત્યઃ સો અસ્ય મહિમા ગૃણે શવો યજ્ઞેષુ વિપ્રરાજ્યે ॥ ૧૬૦૮

૪ ૭ ૩ ૧૯૦૧a  યસ્યાયં વિશ્વ આર્યો દાસઃ શેવધિપા અરિઃ ।
૪ ૭ ૩ ૧૯૦૧c  તિરશ્ચિદર્યે રુશમે પવીરવિ તુભ્યેત્સો અજ્યતે રયિઃ ॥ ૧૬૦૯
૪ ૭ ૩ ૧૯૦૨a  તુરણ્યવો મધુમન્તં ઘૃતશ્ચતં વિપ્રાસો અર્કમાનૃચુઃ ।
૪ ૭ ૩ ૧૯૦૨c  અસ્મે રયિઃ પપ્રથે વૃષ્ણ્યં શવોઽસ્મે સ્વાનાસ ઇન્દવઃ ॥ ૧૬૧૦

૪ ૭ ૩ ૨૦૦૧a  ગોમન્ન ઇન્દો અશ્વવત્સુતઃ સુદક્ષ ધનિવ ।
૪ ૭ ૩ ૨૦૦૧c  શુચિં ચ વર્ણમધિ ગોષુ ધાર્ય ॥ ૧૬૧૧
૪ ૭ ૩ ૨૦૦૨a  સ નો હરીણાં પત ઇન્દો દેવપ્સરસ્તમઃ ।
૪ ૭ ૩ ૨૦૦૨c  સખેવ સખ્યે નર્યો રુચે ભવ ॥ ૧૬૧૨
૪ ૭ ૩ ૨૦૦૩a  સનેમિ ત્વમસ્મદા અદેવં કં ચિદત્રિણમ્ ।
૪ ૭ ૩ ૨૦૦૩c  સાહ્વાઁ ઇન્દો પરિ બાધો અપ દ્વયુમ્ ॥ ૧૬૧૩

૪ ૭ ૩ ૨૧૦૧a  અઞ્જતે વ્યઞ્જતે સમઞ્જતે ક્રતું રિહન્તિ મધ્વાભ્યઞ્જતે ।
૪ ૭ ૩ ૨૧૦૧c  સિન્ધોરુચ્છ્વાસે પતયન્તમુક્ષણઁ હિરણ્યપાવાઃ પશુમપ્સુ ગૃભ્ણતે ॥ ૧૬૧૪
૪ ૭ ૩ ૨૧૦૨a  વિપશ્ચિતે પવમાનાય ગાયત મહી ન ધારાત્યન્ધો અર્ષતિ ।
૪ ૭ ૩ ૨૧૦૨c  અહિર્ન જૂર્ણામતિ સર્પતિ ત્વચમત્યો ન ક્રીડન્નસરદ્વૃષા હરિઃ ॥ ૧૬૧૫
૪ ૭ ૩ ૨૧૦૩a  અગ્રેગો રાજાપ્યસ્તવિષ્યતે વિમાનો અહ્નાં ભુવનેષ્વર્પિતઃ ।
૪ ૭ ૩ ૨૧૦૩c  હરિર્ઘૃતસ્નુઃ સુદૃશીકો અર્ણવો જ્યોતીરથઃ પવતે રાય ઓક્યઃ ॥ ૧૬૧૬

આષ્ટમ પ્રપાઠકઃ । પ્રથમોઽર્ધઃ

૪ ૮ ૧ ૦૧૦૧a  વિશ્વેભિરગ્ને અગ્નિભિરિમં યજ્ઞમિદં વચઃ ।
૪ ૮ ૧ ૦૧૦૧c  ચનો ધાઃ સહસા યહો ॥ ૧૬૧૭
૪ ૮ ૧ ૦૧૦૨a  યચ્ચિદ્ધિ શશ્વા તના દેવન્દેવં યજામહે ।

૪ ૮ ૧ ०१०२c ત્વે ઇધ્દૂયતે હવિઃ ॥ ૧૬૧૮
૪ ૮ ૧ ०१०3a પ્રિયો નો અસ્તુ વિશ્પતિર્હોતા મન્દ્રો વરેણ્યઃ ।
૪ ૮ ૧ ०१०3c પ્રિયાઃ સ્વગ્નયો વયમ્ ॥ ૧૬૧૯

૪ ૮ ૧ ०२०१a ઇન્દ્રં વો વિશ્વતસ્પરિ હવામહે જનેભ્યઃ ।
૪ ૮ ૧ ०२०१c અસ્માકમસ્તુ કેવલઃ ॥ ૧૬૨૦
૪ ૮ ૧ ०२०२a સ નો વૃષન્નમું ચરું સત્રાદાવન્નપા વૃધિ ।
૪ ૮ ૧ ०२०२c અસ્મભ્યમપ્રતિષ્કુતઃ ॥ ૧૬૨૧
૪ ૮ ૧ ०२०3a બૃષા યૂથેવ વઁસગઃ કૃષ્ટીરિયર્ત્યોજસા ।
૪ ૮ ૧ ०२०3c ઈશાનો અપ્રતિષ્કુતઃ ॥ ૧૬૨૨

૪ ૮ ૧ ०3०१a ત્વં નશ્ચિત્ર ઊત્યા વસો રાધાઁસિ ચોદય ।
૪ ૮ ૧ ०3०१c અસ્ય રાયસ્ત્વમગ્ને રથીરસિ વિદા ગાધં તુચે તુ નઃ ॥ ૧૬૨૩
૪ ૮ ૧ ०3०२a પર્ષિ તોકં તનયં પર્તૃભિષ્ટ્વમદબ્ધૈરપ્રયુત્વભિઃ ।
૪ ૮ ૧ ०3०२c અગ્ને હેડાઁસિ દૈવ્યા યુયોધિ નોઽદેવાનિ હરાઁસિ ચ ॥ ૧૬૨૪

૪ ૮ ૧ ०४०१a કિમિત્તે વિષ્ણો પરિચક્ષિ નામ પ્ર યદ્વવક્ષે શિપિવિષ્ટો અસ્મિ ।
૪ ૮ ૧ ०४०१c મા વર્પો અસ્મદપ ગૂહ એતદ્યદન્યરૂપઃ સમિથે બભૂથ ॥ ૧૬૨૫
૪ ૮ ૧ ०४०२a પ્ર તત્તે અદ્ય શિપિવિષ્ટ હવ્યમર્યઃ શઁસામિ વયુનાનિ વિદ્વાન્ ।
૪ ૮ ૧ ०४०२c તં ત્વા ગૃણામિ તવસમતવ્યાન્ક્ષયન્તમસ્ય રજસઃ પરાકે ॥ ૧૬૨૬
૪ ૮ ૧ ०४०3a વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
૪ ૮ ૧ ०४०3c વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરિ મે યૂયં પાત સ્વસ્તભિઃ સદા નઃ ॥ ૧૬૨૭

૪ ૮ ૧ ०५०१a વાયો શુક્રો અયામિ તે મધ્વો અગ્રં દિવિષ્ટિષુ ।
૪ ૮ ૧ ०५०१c આ યાહિ સોમપીતયે સ્પાર્હો દેવ નિયુત્વતા ॥ ૧૬૨૮
૪ ૮ ૧ ०५०२a ઇન્દ્રશ્ચ વાયવેષાઁ સોમાનાં પીતિમર્હથઃ ।
૪ ૮ ૧ ०५०२c યુવાઁ હિ યન્તીન્દવો નિમ્નમાપો ન સધ્ર્યક્ ॥ ૧૬૨૯
૪ ૮ ૧ ०५०3a વાયવિન્દ્રશ્ચ શુષ્મિણા સરથઁ શવસસ્પતી ।
૪ ૮ ૧ ०५०3c નિયુત્વન્તા ન ઊતય આ યાતઁ સોમપીતયે ॥ ૧૬૩૦

૪ ૮ ૧ ०६०१a અધ ક્ષપા પરિષ્કૃતો વાજાઁ અભિ પ્ર ગાહતે ।
૪ ૮ ૧ ०६०१c યદી વિવસ્વતો ધિયો હરિઁ હિન્વન્તિ યાતવે ॥ ૧૬૩૧
૪ ૮ ૧ ०६०२a તમસ્ય મર્જયામસિ મદો ય ઇન્દ્રપાતમઃ ।
૪ ૮ ૧ ०६०२c યં ગાવ આસભિર્દધુઃ પુરા નૂનં ચ સૂરયઃ ॥ ૧૬૩૨
૪ ૮ ૧ ०६०3a તં ગાથયા પુરાણ્યા પુનાનમભ્યનૂષત ।

૪ ૮ ૧ ૦૬૦૩c ઉતો કૃપન્ત ધીતયો દેવાનાં નામ બિભ્રતીઃ ॥ ૧૬૩૩

૪ ૮ ૧ ૦૭૦૧a અશ્વં ન ત્વા વારવન્તં વન્દધ્યા અગ્નિં નમોભિઃ ।
૪ ૮ ૧ ૦૭૦૧c સમ્રાજન્તમધ્વરાણામ્ ॥ ૧૬૩૪
૪ ૮ ૧ ૦૭૦૨a સ ઘા નઃ સૂનુઃ શવસા પૃથુપ્રગામા સુશેવઃ ।
૪ ૮ ૧ ૦૭૦૨c મીઢ્વાઁ અસ્માકં બભૂયાત્ ॥ ૧૬૩૫
૪ ૮ ૧ ૦૭૦૩a સ નો દૂરાચ્ચાસાચ્ચ નિ મર્ત્યાદઘાયોઃ ।
૪ ૮ ૧ ૦૭૦૩c પાહિ સદમિદ્વિશ્વાયુઃ ॥ ૧૬૩૬

૪ ૮ ૧ ૦૮૦૧a ત્વમિન્દ્ર પ્રતૂર્તિષ્વભિ વિશ્વા અસિ સ્પૃધઃ ।
૪ ૮ ૧ ૦૮૦૧c અશસ્તિહા જનિતા વૃત્રતૂરસિ ત્વં તૂર્ય તરુષ્યતઃ ॥ ૧૬૩૭
૪ ૮ ૧ ૦૮૦૨a અનુ તે શુષ્મં તુરયન્તમીયતુઃ ક્ષોણી શિશું ન માતરા ।
૪ ૮ ૧ ૦૮૦૨c વિશ્વાસ્તે સ્પૃધઃ શ્નથયન્ત મન્યવે વૃત્રં યદિન્દ્ર તૂર્વસિ ॥ ૧૬૩૮

૪ ૮ ૧ ૦૯૦૧a યજ્ઞ ઇન્દ્રમવર્ધયદ્યદ્ભૂમિં વ્યવર્તયત્ ।
૪ ૮ ૧ ૦૯૦૧c ચક્રાણ ઓપશં દિવિ ॥ ૧૬૩૯
૪ ૮ ૧ ૦૯૦૨a વ્યાઽન્તરિક્ષમતિરન્મદે સોમસ્ય રોચના ।
૪ ૮ ૧ ૦૯૦૨c ઇન્દ્રો યદભિનદ્વલમ્ ॥ ૧૬૪૦
૪ ૮ ૧ ૦૯૦૩a ઉદગા આજદઙ્ગિરોભ્ય આવિષ્કૃણ્વન્ગુહા સતીઃ ।
૪ ૮ ૧ ૦૯૦૩c અર્વાઞ્ચં નુનુદે વલમ્ ॥ ૧૬૪૧

૪ ૮ ૧ ૧૦૦૧a ત્યમુ વઃ સત્રાસાહં વિશ્વાસુ ગીર્ષ્વાયતમ્ ।
૪ ૮ ૧ ૧૦૦૧c આ ચ્યાવયસ્યૂતયે ॥ ૧૬૪૨
૪ ૮ ૧ ૧૦૦૨a યુધ્મઁ સન્તમનર્વાણઁ સોમપામનપચ્યુતમ્ ।
૪ ૮ ૧ ૧૦૦૨c નરમવાર્યક્રતુમ્ ॥ ૧૬૪૩
૪ ૮ ૧ ૧૦૦૩a શિક્ષા ણ ઇન્દ્ર રાય આ પુરુ વિદ્વાઁ ઋચીષમ ।
૪ ૮ ૧ ૧૦૦૩c અવા નઃ પાર્યે ધને ॥ ૧૬૪૪

૪ ૮ ૧ ૧૧૦૧a તવ ત્યદિન્દ્રિયં બૃહત્તવ દક્ષમુત ક્રતુમ્ ।
૪ ૮ ૧ ૧૧૦૧c વજ્રઁ શિશાતિ ધિષણા વરેણ્યમ્ ॥ ૧૬૪૫
૪ ૮ ૧ ૧૧૦૨a તવ દ્યૌરિન્દ્ર પૌઁસ્યં પૃથિવી વર્ધતિ શ્રવઃ ।
૪ ૮ ૧ ૧૧૦૨c ત્વામાપઃ પર્વતાસશ્ચ હિન્વિરે ॥ ૧૬૪૬
૪ ૮ ૧ ૧૧૦૩a ત્વાં વિષ્ણુર્બૃહન્ક્ષયો મિત્રો ગૃણાતિ વરુણઃ ।
૪ ૮ ૧ ૧૧૦૩c ત્વાઁ શર્ધો મદત્યનુ મારુતમ્ ॥ ૧૬૪૭

૪ ૮ ૧ ૧૨૦૧a નમસ્તે અગ્ન ઓજસે ગૃણન્તિ દેવ કૃષ્ટયઃ ।

૪ ૮ ૧ ૧૨૦૧c  અમૈરમિત્રમર્દય ॥ ૧૬૪૮
૪ ૮ ૧ ૧૨૦૨a  કુવિત્સુ નો ગવિષ્ટયેઽગ્ને સંવેષિષો રયિમ્ ।
૪ ૮ ૧ ૧૨૦૨c  ઉરુકૃદુરુ ણસ્કૃધિ ॥ ૧૬૪૯
૪ ૮ ૧ ૧૨૦૩a  મા નો અગ્ને મહાધને પરા વર્ગ્ભારભૃદ્યથા ।
૪ ૮ ૧ ૧૨૦૩c  સંવર્ગં સઁ રયિં જય ॥ ૧૬૫૦

૪ ૮ ૧ ૧૩૦૧a  સમસ્ય મન્યવે વિશો વિશ્વા નમન્ત કૃષ્ટયઃ ।
૪ ૮ ૧ ૧૩૦૧c  સમુદ્રાયેવ સિન્ધવઃ ॥ ૧૬૫૧
૪ ૮ ૧ ૧૩૦૨a  વિ ચિદ્વૃત્રસ્ય દોધતઃ શિરો બિભેદ વૃષ્ણિના ।
૪ ૮ ૧ ૧૩૦૨c  વજ્રેણ શતપર્વણા ॥ ૧૬૫૨
૪ ૮ ૧ ૧૩૦૩a  ઓજસ્તદસ્ય તિત્વિષ ઉભે યત્સમવર્ત્તયત્ ।
૪ ૮ ૧ ૧૩૦૩c  ઇન્દ્રશ્ચર્મેવ રોદસી ॥ ૧૬૫૩

૪ ૮ ૧ ૧૪૦૧a  સુમન્મા વસ્વી રન્તી સૂનરી ॥ ૧૬૫૪
૪ ૮ ૧ ૧૪૦૨a  સરૂપ વૃષન્ના ગહીમૌ ભદ્રૌ ધુર્યાવભિ ।
૪ ૮ ૧ ૧૪૦૨c  તાવિમા ઉપ સર્પતઃ ॥ ૧૬૫૫
૪ ૮ ૧ ૧૪૦૩a  નીવ શીર્ષાણિ મૃઢ્વં મધ્ય આપસ્ય તિષ્ઠતિ ।
૪ ૮ ૧ ૧૪૦૩c  શ꣡ૃઙ્ગેભિર્દશભિર્દિશન્ ॥ ૧૬૫૬

આષ્ટમ પ્રપાઠકઃ ।  દ્વિતીયોઽર્ધઃ
૪ ૮ ૨ ०૧૦૧a  પન્યંપન્યમિત્સોતાર આ ધાવત મદ્યાય ।
૪ ૮ ૨ ०૧૦૧c  સોમં વીરાય શૂરાય ॥ ૧૬૫૭
૪ ૮ ૨ ०૧૦૨a  એહ હરી બ્રહ્મયુજા શગ્મા વક્ષતઃ સખાયમ્ ।
૪ ૮ ૨ ०૧૦૨c  ઇન્દ્રં ગીર્ભિર્ગિર્વણસમ્ ॥ ૧૬૫૮
૪ ૮ ૨ ०૧૦૩a  પાતા વૃત્રહા સુતમા ઘા ગમન્નારે અસ્મત્ ।
૪ ૮ ૨ ०૧૦૩c  નિ યમતે શતમૂતિઃ ॥ ૧૬૫૯

૪ ૮ ૨ ०૨૦૧a  આ ત્વા વિશન્ત્વિન્દવઃ સમુદ્રમિવ સિન્ધવઃ ।
૪ ૮ ૨ ०૨૦૧c  ન ત્વામિન્દ્રાતિ રિચ્યતે ॥ ૧૬૬૦
૪ ૮ ૨ ०૨૦૨a  વિવ્યક્થ મહિના વૃષન્ભક્ષઁ સોમસ્ય જાગૃવે ।
૪ ૮ ૨ ०૨૦૨c  ય ઇન્દ્ર જઠરેષુ તે ॥ ૧૬૬૧
૪ ૮ ૨ ०૨૦૩a  અરં ત ઇન્દ્ર કુક્ષયે સોમો ભવતુ વૃત્રહન્ ।
૪ ૮ ૨ ०૨૦૩c  અરં ધામભ્ય ઇન્દવઃ ॥ ૧૬૬૨

૪ ૮ ૨ ०૩૦૧a  જરાબોધ તદ્વિવિડ્ઢિ વિશેવિશે યજ્ઞિયાય ।

૪ ૮ ૨ ૦૩૦૧c સ્તોમૈઁ રુદ્રાય દૃશીકમ્ ॥ ૧૬૬૩
૪ ૮ ૨ ૦૩૦૨a સ નો મહાઁ અનિમાનો ધૂમકેતુઃ પુરુશ્ચન્દ્રઃ ।
૪ ૮ ૨ ૦૩૦૨c ધિયે વાજાય હિન્વતુ ॥ ૧૬૬૪
૪ ૮ ૨ ૦૩૦૩a સ રેવાઁ ઇવ વિશ્પતિર્દૈવ્યઃ કેતુઃ શ઼ૃણોતુ નઃ ।
૪ ૮ ૨ ૦૩૦૩c ઉક્થૈરગ્નિર્બૃહદ્ભાનુઃ ॥ ૧૬૬૫

૪ ૮ ૨ ૦૪૦૧a તદ્વો ગાય સુતે સચા પુરુહૂતાય સત્વને ।
૪ ૮ ૨ ૦૪૦૧c શં યદ્ગવે ન શાકિને ॥ ૧૬૬૬
૪ ૮ ૨ ૦૪૦૨a ન ઘા વસુર્નિ યમતે દાનં વાજસ્ય ગોમતઃ ।
૪ ૮ ૨ ૦૪૦૨c યત્સીમુપશ્રવદ્ગિરઃ ॥ ૧૬૬૭
૪ ૮ ૨ ૦૪૦૩a કુવિત્સસ્ય પ્ર હિ વ્રજં ગોમન્તં દસ્યુહા ગમત્ ।
૪ ૮ ૨ ૦૪૦૩c શચીભિરપ નો વરત્ ॥ ૧૬૬૮

૪ ૮ ૨ ૦૫૦૧a ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ ।
૪ ૮ ૨ ૦૫૦૧c સમૂઢમસ્ય પાઁસુલે ॥ ૧૬૬૯
૪ ૮ ૨ ૦૫૦૨a ત્રીણિ પદા વિ ચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ ।
૪ ૮ ૨ ૦૫૦૨c અતો ધર્માણિ ધારયન્ ॥ ૧૬૭૦
૪ ૮ ૨ ૦૫૦૩a વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે ।
૪ ૮ ૨ ૦૫૦૩c ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ ૧૬૭૧
૪ ૮ ૨ ૦૫૦૪a તદ્વિષ્ણોઃ પરમં પદઁ સદા પશ્યન્તિ સૂરયઃ ।
૪ ૮ ૨ ૦૫૦૪c દિવીવ ચક્ષુરાતતમ્ ॥ ૧૬૭૨
૪ ૮ ૨ ૦૫૦૫a તદ્વિપ્રાસો વિપન્યુવો જાગૃવાઁસઃ સમિન્ધતે ।
૪ ૮ ૨ ૦૫૦૫c વિષ્ણોર્યત્પરમં પદમ્ ॥ ૧૬૭૩
૪ ૮ ૨ ૦૫૦૬a અતો દેવા અવન્તુ નો યતો વિષ્ણુર્વિચક્રમે ।
૪ ૮ ૨ ૦૫૦૬c પૃથિવ્યા અધિ સાનવિ ॥ ૧૬૭૪

૪ ૮ ૨ ૦૬૦૧a મો ષુ ત્વા વાઘતશ્ચ નારે અસ્મન્નિ રીરમન્ ।
૪ ૮ ૨ ૦૬૦૧c આરાત્તાદ્વ સધમાદં ન આ ગહીહ વા સન્નુપ શ્રુધિ ॥ ૧૬૭૫
૪ ૮ ૨ ૦૬૦૨a ઇમે હિ તે બ્રહ્મકૃતઃ સુતે સચા મધૌ ન મક્ષ આસતે ।
૪ ૮ ૨ ૦૬૦૨c ઇન્દ્રે કામં જરિતારો વસૂયવો રથે ન પાદમા દધુઃ ॥ ૧૬૭૬

૪ ૮ ૨ ૦૭૦૧a અસ્તાવિ મન્મ પૂર્વ્યં બ્રહ્મેન્દ્રાય વોચત ।
૪ ૮ ૨ ૦૭૦૧c પૂર્વીરૃતસ્ય બૃહતીરનૂષત સ્તોતુર્મેધા અસૃક્ષત ॥ ૧૬૭૭
૪ ૮ ૨ ૦૭૦૨a સમિન્દ્રો રાયો બૃહતીરધૂનુત સં ક્ષોણી સમુ સૂર્યમ્ ।

૪ ૮ ૨ ૦૭૦૨c સઁ શુક્રાસઃ શુચયઃ સં ગવાશિરઃ સોમા ઇન્દ્રમમન્દિષુઃ ॥ ૧૬૭૮

૪ ૮ ૨ ૦૮૦૧a ઇન્દ્રાય સોમ પાતવે વૃત્રઘ્ને પરિ ષિચ્યસે ।
૪ ૮ ૨ ૦૮૦૨c નરે ચ દક્ષિણાવતે દેવાય સદનાસદે ॥ ૧૬૭૯
૪ ૮ ૨ ૦૮૦૨a તઁ સખાયઃ પુરૂરુચં યૂયં વયં ચ સૂરયઃ ।
૪ ૮ ૨ ૦૮૦૨c અશ્યામ વાજગન્ધ્યઁ સનેમ વાજપસ્ત્યમ્ ॥ ૧૬૮૦
૪ ૮ ૨ ૦૮૦૩a પરિ ત્યઁ હર્યતઁ હરિં બભ્રું પુનન્તિ વારેણ ।
૪ ૮ ૨ ૦૮૦૩c યો દેવાન્વિશ્વાઁ ઇત્પરિ મદેન સહ ગચ્છતિ ॥ ૧૬૮૧

૪ ૮ ૨ ૦૯૦૧a કસ્તમિન્દ્ર ત્વાવસો મર્ત્યો દધર્ષતિ ।
૪ ૮ ૨ ૦૯૦૧c શ્રદ્ધા ઇત્તેમઘવન્ પાર્યે દિવિ વાજી વાજં સિષાસતિ ॥ ૧૬૮૨
૪ ૮ ૨ ૦૯૦૨a મઘોનઃ સ્મ વૃત્રહત્યેષુ ચોદય યે દદતિ પ્રિયા વસુ ।
૪ ૮ ૨ ૦૯૦૨c તવ પ્રણીતી હર્યશ્વ સૂરિભિર્વિશ્વા તરેમ દુરિતા ॥ ૧૬૮૩

૪ ૮ ૨ ૧૦૦૧a એદુ મધોર્મદિન્તરઁ સિઞ્ચાધ્વર્યો અન્ધસઃ ।
૪ ૮ ૨ ૧૦૦૧c એવા હિ વીર સ્તવતે સદાવૃધઃ ॥ ૧૬૮૪
૪ ૮ ૨ ૧૦૦૨a ઇન્દ્ર સ્થાતર્હરીણાં ન કિષ્ટે પૂર્વ્યસ્તુતિમ્ ।
૪ ૮ ૨ ૧૦૦૨c ઉદાનઁશ શવસા ન ભન્દના ॥ ૧૬૮૫
૪ ૮ ૨ ૧૦૦૩a તં વો વાજાનાં પતિમહૂમહિ શ્રવસ્યવઃ ।
૪ ૮ ૨ ૧૦૦૩c અપ્રાયુભિર્યજ્ઞેભિર્વાવૃધેન્યમ્ ॥ ૧૬૮૬

૪ ૮ ૨ ૧૧૦૧a તં ગૂર્ધયા સ્વર્ણરં દેવાસો દેવમરતિં દધન્વિરે ।
૪ ૮ ૨ ૧૧૦૧c દેવત્રા હવ્યમૂહિષે ॥ ૧૬૮૭
૪ ૮ ૨ ૧૧૦૨a વિભૂતરાતિં વિપ્ર ચિત્રશોચિષમગ્નિમીડિષ્વ યન્તુરમ્ ।
૪ ૮ ૨ ૧૧૦૨c અસ્ય મેધસ્ય સોમ્યસ્ય સોભરે પ્રેમધ્વરાય પૂર્વ્યમ્ ॥ ૧૬૮૮

૪ ૮ ૨ ૧૨૦૧a આ સોમ સવાનો અદ્રિભિસ્તિરો વારાણ્યવ્યયા ।
૪ ૮ ૨ ૧૨૦૧c જનો ન પુરિ ચમ્વોર્વિશદ્ધરિઃ સદો વનેષુ દધ્રિષે ॥ ૧૬૮૯
૪ ૮ ૨ ૧૨૦૨a સ મામૃજે તિરો અણ્વાનિ મેષ્યો મીઢ્વાન્ત્સપ્તિર્ન વાજયુઃ ।
૪ ૮ ૨ ૧૨૦૨c અનુમાદ્યઃ પવમાનો મનીષિભિઃ સોમો વિપ્રેભિરૃક્વભિઃ ॥ ૧૬૯૦

૪ ૮ ૨ ૧૩૦૧a વયમેનમિદા હ્યોઽપીપેમેહ વજ્રિણમ્ ।
૪ ૮ ૨ ૧૩૦૧c તસ્મા ઉ અદ્ય સવને સુતં ભરા નૂનં ભૂષત શ્રુતે ॥ ૧૬૯૧
૪ ૮ ૨ ૧૩૦૨a વૃકશ્ચિદસ્ય વારણ ઉરામથિરા વયુનેષુ ભૂષતિ ।
૪ ૮ ૨ ૧૩૦૨c સેમં ન સ્તોમં જુજુષાણ આ ગહીન્દ્ર પ્ર ચિત્રયા ધિયા ॥ ૧૬૯૨

૪ ૮ ૨ ૧૪૦૧a ઇન્દ્રાગ્ની રોચના દિવઃ પરિ વાજેષુ ભૂષથઃ ।

૪ ૮ ૨ ૧૪૦૧c તદ્વાં ચેતિ પ્ર વીર્યમ્ ॥ ૧૬૯૩
૪ ૮ ૨ ૧૪૦૨a ઇન્દ્રાગ્ની અપસસ્પરિ ઉપ પ્ર યન્તિ ધીતયઃ ।
૪ ૮ ૨ ૧૪૦૨c ઋતસ્ય પથ્યા અનુ ॥ ૧૬૯૪
૪ ૮ ૨ ૧૪૦૩a ઇન્દ્રાગ્ની તવિષાણિ વામ્ સધસ્થાનિ પ્રયાઁસિ ચ ।
૪ ૮ ૨ ૧૪૦૩c યુવોરમૂર્યં હિતમ્ ॥ ૧૬૯૫

૪ ૮ ૨ ૧૫૦૧a ક ઈં વેદ સુતે સચા પિબન્તં કદ્વયો દધે ।
૪ ૮ ૨ ૧૫૦૧c અયં યઃ પુરો વિભિનત્ત્યોજસા મન્દાનઃ શિપ્રયન્ધસઃ ॥ ૧૬૯૬
૪ ૮ ૨ ૧૫૦૨a દાના મૃગો ન વારણઃ પુરુત્રા ચરથં દધે ।
૪ ૮ ૨ ૧૫૦૨c ન કિષ્ટ્વા નિ યમદા સુતે ગમો મહાઁશ્ચરસ્યોજસા ॥ ૧૬૯૭
૪ ૮ ૨ ૧૫૦૩a ય ઉગ્રઃ સન્નનિષ્ટૃતઃ સ્થિરો રણાય સઁસ્કૃતઃ ।
૪ ૮ ૨ ૧૫૦૩c યદિ સ્તોતુર્મઘવા શ◌ૃણવદ્ધવં નેન્દ્રો યોષત્યા ગમત્ ॥ ૧૬૯૮

૪ ૮ ૨ ૧૬૦૧a પવમાના અસૃક્ષત સોમાઃ શુક્રાસ ઇન્દવઃ ।
૪ ૮ ૨ ૧૬૦૧c અભિ વિશ્વાનિ કાવ્યા ॥ ૧૬૯૯
૪ ૮ ૨ ૧૬૦૨a પવમાના દિવસ્પર્યન્તરિક્ષાદસૃક્ષત ।
૪ ૮ ૨ ૧૬૦૨c પૃથિવ્યા અધિ સાનવિ ॥ ૧૭૦૦
૪ ૮ ૨ ૧૬૦૩a પવમાનાસ આશવઃ શુભ્રા અસૃગ્રમિન્દવઃ ।
૪ ૮ ૨ ૧૬૦૩c ઘ્નન્તો વિશ્વા અપ દ્વિષઃ ॥ ૧૭૦૧

૪ ૮ ૨ ૧૭૦૧a તોશા વૃત્રહણા હુવે સજિત્વાનાપરાજિતા ।
૪ ૮ ૨ ૧૭૦૧c ઇન્દ્રાગ્ની વાજસાતમા ॥ ૧૭૦૨
૪ ૮ ૨ ૧૭૦૨a પ્ર વામર્ચન્ત્યુક્થિનો નીથાવિદો જરિતારઃ ।
૪ ૮ ૨ ૧૭૦૨c ઇન્દ્રાગ્ની ઇષ આ વૃણે ॥ ૧૭૦૩
૪ ૮ ૨ ૧૭૦૩a ઇન્દ્રાગ્ની નવતિં પુરો દાસપત્નીરધૂનુતમ્ ।
૪ ૮ ૨ ૧૭૦૩c સાકમેકેન કર્મણા ॥ ૧૭૦૪

૪ ૮ ૨ ૧૮૦૧a ઉપ ત્વા રણ્વસન્દૃશં પ્રયસ્વન્તઃ સહસ્કૃત ।
૪ ૮ ૨ ૧૮૦૧c અગ્ને સસૃજ્મહે ગિરઃ ॥ ૧૭૦૫
૪ ૮ ૨ ૧૮૦૨a ઉપ ચ્છાયામિવ ઘૃણેરગન્મ શર્મ તે વયમ્ ।
૪ ૮ ૨ ૧૮૦૨c અગ્ને હિરણ્યસન્દૃશઃ ॥ ૧૭૦૬
૪ ૮ ૨ ૧૮૦૩a ય ઉગ્ર ઇવ શર્યહા તિગ્મશ◌ૃઙ્ગો ન વઁસગઃ ।
૪ ૮ ૨ ૧૮૦૩c અગ્ને પુરો રુરોજિથ ॥ ૧૭૦૭

૪ ૮ ૨ ૧૯૦૧a ઋતાવાનં વૈશ્વાનરમૃતસ્ય જ્યોતિષસ્પતિમ્ ।

૪ ૮ ૨ ૧૯૦૧c અજસ્રં ઘર્મમીમહે ॥ ૧૭૦૮
૪ ૮ ૨ ૧૯૦૨a ય ઇદં પ્રતિપપ્રથે યજ્ઞસ્ય સ્વરુત્તિરન્ ।
૪ ૮ ૨ ૧૯૦૨c ઋતૂનુત્સૃજતે વશી ॥ ૧૭૦૯
૪ ૮ ૨ ૧૯૦૩a અગ્નિઃ પ્રિયેષુ ધામસુ કામો ભૂતસ્ય ભવ્યસ્ય ।
૪ ૮ ૨ ૧૯૦૩c સમ્રાડેકો વિ રાજતિ ॥ ૧૭૧૦

આષ્ટમ પ્રપાઠકઃ । તૃતીયોઽર્ધઃ
૪ ૮ ૩ ૦૧૦૧a અગ્નિઃ પ્રત્નેન જન્મના શુમ્ભાનસ્તન્વાઉઁ સ્વામ્ ।
૪ ૮ ૩ ૦૧૦૧c કવિર્વિપ્રેણ વવૃધે ॥ ૧૭૧૧
૪ ૮ ૩ ૦૧૦૨a ઊર્જો નપાતમા હુવેઽગ્નિં પાવકશોચિષમ્ ।
૪ ૮ ૩ ૦૧૦૨c અસ્મિન્યજ્ઞે સ્વધ્વરે ॥ ૧૭૧૨
૪ ૮ ૩ ૦૧૦૩a સ નો મિત્રમહસ્ત્વમગ્ને શુક્રેણ શોચિષા ।
૪ ૮ ૩ ૦૧૦૩c દેવૈરા સત્સિ બર્હિષિ ॥ ૧૭૧૩

૪ ૮ ૩ ૦૨૦૧a ઉત્તે શુષ્માસો અસ્થૂ રક્ષો ભિન્દન્તો અદ્રિવઃ ।
૪ ૮ ૩ ૦૨૦૧c નુદસ્વ યાઃ પરિસ્પૃધઃ ॥ ૧૭૧૪
૪ ૮ ૩ ૦૨૦૨a અયા નિજઘ્નિરોજસા રથસઙ્ગે ધને હિતે ।
૪ ૮ ૩ ૦૨૦૨c સ્તવા અબિભ્યુષા હૃદા ॥ ૧૭૧૫
૪ ૮ ૩ ૦૨૦૩a અસ્ય વ્રતાનિ નાધૃષે પવમાનસ્ય દૂઢ્યા ।
૪ ૮ ૩ ૦૨૦૩c રુજ યસ્ત્વા પૃતન્યતિ ॥ ૧૭૧૬
૪ ૮ ૩ ૦૨૦૪a તઁ હિન્વન્તિ મદચ્યુતઁ હરિં નદીષુ વાજિનમ્ ।
૪ ૮ ૩ ૦૨૦૪c ઇન્દુમિન્દ્રાય મત્સરમ્ ॥ ૧૭૧૭

૪ ૮ ૩ ૦૩૦૧a આ મન્દ્રૈરિન્દ્ર હરિભિર્યાહિ મયૂરરોમભિઃ ।
૪ ૮ ૩ ૦૩૦૧c મા ત્વા કે ચિન્નિ યેમુરિન્ન પાશિનોઽતિ ધન્વેવ તાઁ ઇહિ ॥ ૧૭૧૮
૪ ૮ ૩ ૦૩૦૨a વૃત્રખાદો વલઁ રુજઃ પુરાં દર્મો અપામજઃ ।
૪ ૮ ૩ ૦૩૦૨c સ્થાતા રથસ્ય હર્યોરભિસ્વર ઇન્દ્રો દૃઢા ચિદારુજઃ ॥ ૧૭૧૯
૪ ૮ ૩ ૦૩૦૩a ગમ્ભીરાઁ ઉદધીઁરિવ ક્રતું પુષ્યસિ ગા ઇવ ।
૪ ૮ ૩ ૦૩૦૩c પ્ર સુગોપા યવસં ધેનવો યથા હ્રદં કુલ્યા ઇવાશત ॥ ૧૭૨૦

૪ ૮ ૩ ૦૪૦૧a યથા ગૌરો અપા કૃતં તૃષ્યન્નેત્યવેરિણમ્ ।
૪ ૮ ૩ ૦૪૦૧c આપિત્વે નઃ પ્રપિત્વે તૂયમા ગહિ કણ્વેષુ સુ સચા પિબ ॥ ૧૭૨૧
૪ ૮ ૩ ૦૪૦૨a મન્દન્તુ ત્વા મઘવન્નિન્દ્રેન્દવો રાધોદેયાય સુન્વતે ।
૪ ૮ ૩ ૦૪૦૨c આમુષ્યા સોમમપિબશ્ચમૂ સુતં જ્યેષ્ઠં તદ્દધિષે સહઃ ॥ ૧૭૨૨

૪ ૮ ૩ ૦૫૦૧a ત્વમઙ્ગ પ્ર શૂઁસિષો દેવઃ શવિષ્ઠ મર્ત્યમ્ ।
૪ ૮ ૩ ૦૫૦૧c ન ત્વદન્યો મઘવન્નસ્તિ મર્ડિતેન્દ્ર બ્રવીમિ તે વચઃ ॥ ૧૭૨૩
૪ ૮ ૩ ૦૫૦૨a મા તે રાધાઁસિ મા ત ઊતયો વસોઽસ્માન્કદા ચના દભન્ ।
૪ ૮ ૩ ૦૫૦૨c વિશ્વા ચ ન ઉપમિમીહિ માનુષ વસૂનિ ચર્ષણિભ્ય આ ॥ ૧૭૨૪

૪ ૮ ૩ ૦૬૦૧a પ્રતિ ષ્યા સૂનરી જની વ્યુચ્છન્તી પરિ સ્વસુઃ ।
૪ ૮ ૩ ૦૬૦૧c દિવો અદર્શિ દુહિતા ॥ ૧૭૨૫
૪ ૮ ૩ ૦૬૦૨a અશ્વેવ ચિત્રારુષી માતા ગવામૃતાવરી ।
૪ ૮ ૩ ૦૬૦૨c સખા ભૂદશ્વિનોરુષાઃ ॥ ૧૭૨૬
૪ ૮ ૩ ૦૬૦૩a ઉત સખાસ્યશ્વિનોરુત માતા ગવામસિ ।
૪ ૮ ૩ ૦૬૦૩c ઉતોષો વસ્વ ઈશિષે ॥ ૧૭૨૭

૪ ૮ ૩ ૦૭૦૧a એષો ઉષા અપૂર્વ્ય વ્યુચ્છતિ પ્રિયા દિવઃ ।
૪ ૮ ૩ ૦૭૦૧c સ્તુષે વામશ્વિના બૃહત્ ॥ ૧૭૨૮
૪ ૮ ૩ ૦૭૦૨a યા દસ્રા સિન્ધુમાતરા મનોતરા રયીણામ્ ।
૪ ૮ ૩ ૦૭૦૨c ધિયા દેવા વસુવિદા ॥ ૧૭૨૯
૪ ૮ ૩ ૦૭૦૩a વચ્યન્તે વાં કકુહાસો જૂર્ણાયામધિ વિષ્ટપિ ।
૪ ૮ ૩ ૦૭૦૩c યદ્વાઁ રથો વિભિષ્પતાત્ ॥ ૧૭૩૦

૪ ૮ ૩ ૦૮૦૧a ઉષસ્તચ્ચિત્રમા ભરાસ્મભ્યં વાજિનીવતિ ।
૪ ૮ ૩ ૦૮૦૧c યેન તોકં ચ તનયં ચ ધામહે ॥ ૧૭૩૧
૪ ૮ ૩ ૦૮૦૨a ઉષો અદ્યેહ ગોમત્યશ્વાવતિ વિભાવરિ ।
૪ ૮ ૩ ૦૮૦૨c રેવદસ્મે વ્યુચ્છ સૂનૃતાવતિ ॥ ૧૭૩૨
૪ ૮ ૩ ૦૮૦૩a યુઙ્ક્ષ્વા હિ વાજિનીવત્યશ્વાઁ અદ્યારુણાઁ ઉષઃ ।
૪ ૮ ૩ ૦૮૦૩c અથા નો વિશ્વા સૌભગાન્યા વહ ॥ ૧૭૩૩

૪ ૮ ૩ ૦૯૦૧a અશ્વિના વર્તિરસ્મદા ગોમદ્દસ્રા હિરણ્યવત્ ।
૪ ૮ ૩ ૦૯૦૧c અર્વાગ્રથઁ સમનસા નિ યચ્છતમ્ ॥ ૧૭૩૪
૪ ૮ ૩ ૦૯૦૨a એહ દેવા મયોભુવા દસ્રા હિરણ્યવર્ત્તની ।
૪ ૮ ૩ ૦૯૦૨c ઉષર્બુધો વહન્તુ સોમપીતયે ॥ ૧૭૩૫
૪ ૮ ૩ ૦૯૦૩a યાવિત્થા શ્લોકમા દિવો જ્યોતિર્જનાય ચક્રથુઃ ।
૪ ૮ ૩ ૦૯૦૩c આ ન ઊર્જં વહતમશ્વિના યુવમ્ ॥ ૧૭૩૬

૪ ૮ ૩ ૧૦૦૧a અગ્નિં તં મન્યે યો વસુરસ્તં યં યન્તિ ધેનવઃ ।
૪ ૮ ૩ ૧૦૦૧c અસ્તમર્વન્ત આશવોસ્તં નિત્યાસો વાજિન ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૭૩૭

૪ ८ ૩ ૧૦૦૨a  અગ્નિર્હિ વાજિનં વિશે દદાતિ વિશ્વચર્ષણિઃ ।
૪ ८ ૩ ૧૦૦૨c  અગ્ની રાયે સ્વાભુવઁ સ પ્રીતો યાતિ વાર્યમિષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૭૩૮
૪ ८ ૩ ૧૦૦૩a  સો અગ્નિર્યો વસુર્ગૃણે સં યમાયન્તિ ધેનવઃ ।
૪ ८ ૩ ૧૦૦૩c  સમર્વન્તો રઘુદ્રુવઃ સઁ સુજાતાસઃ સૂરય ઇષઁ સ્તોતૃભ્ય આ ભર ॥ ૧૭૩૯

૪ ८ ૩ ૧૧૦૧a  મહે નો અદ્ય બોધયોષો રાયે દિવિત્મતી ।
૪ ८ ૩ ૧૧૦૧c  યથા ચિન્નો અબોધયઃ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૧૭૪૦
૪ ८ ૩ ૧૧૦૨a  યા સુનીથે શૌચદ્રથે વ્યૌચ્છો દુહિતર્દિવઃ ।
૪ ८ ૩ ૧૧૦૨c  સા વ્યુચ્છ સહીયસિ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૧૭૪૧
૪ ८ ૩ ૧૧૦૩a  સા નો અદ્યાભરદ્વસુર્વ્યુચ્છા દુહિતર્દિવઃ ।
૪ ८ ૩ ૧૧૦૩c  યો વ્યૌચ્છઃ સહીયસિ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૧૭૪૨

૪ ८ ૩ ૧૨૦૧a  પ્રતિ પ્રિયતમઁ રથં વૃશણં વસુવાહનમ્ ।
૪ ८ ૩ ૧૨૦૧c  સ્તોતા વામશ્વિનાવૃષિ સ્તોમેભિર્ભૂષતિ પ્રતિ માધ્વી મમ શ્રુતઁ હવમ્ ॥ ૧૭૪૩
૪ ८ ૩ ૧૨૦૨a  અત્યાયાતમશ્વિના તિરો વિશ્વા અહઁ સના ।
૪ ८ ૩ ૧૨૦૨c  દસ્રા હિરણ્યવર્ત્તની સુષુમ્ણા સિન્ધુવાહસા માધ્વી મમ શ્રુતઁ હવમ્ ॥ ૧૭૪૪
૪ ८ ૩ ૧૨૦૩a  આ નો રત્નાનિ બિભ્રતાવશ્વિના ગચ્છતં યુવમ્ ।
૪ ८ ૩ ૧૨૦૩c  રુદ્રા હિરણ્યવર્ત્તની જુષાણા વાજિનીવસૂ માધ્વી મમ શ્રુતઁ હવમ્ ॥ ૧૭૪૫

૪ ८ ૩ ૧૩૦૧a  અબોધ્યગ્નિઃ સમિધા જનાનાં પ્રતિ ધેનુમિવાયતીમુષાસમ્ ।
૪ ८ ૩ ૧૩૦૧c  યહ્વા ઇવ પ્ર વયામુજ્જિહાનાઃ પ્ર ભાનવઃ સસ્રતે નાકમચ્છ ॥ ૧૭૪૬
૪ ८ ૩ ૧૩૦૨a  અબોધિ હોતા યજથાય દેવાનૂર્ધ્વો અગ્નિઃ સુમનાઃ પ્રાતરસ્થાત્ ।
૪ ८ ૩ ૧૩૦૨c  સમિદ્ધસ્ય રુશદદર્શિ પાજો મહાન્દેવસ્તમસો નિરમોચિ ॥ ૧૭૪૭
૪ ८ ૩ ૧૩૦૩a  યદીં ગણસ્ય રશનામજીગઃ શુચિરઙ્ક્તે શુચિભિર્ગોભિરગ્નિઃ ।
૪ ८ ૩ ૧૩૦૩c  આદ્દક્ષિણા યુજ્યતે વાજયન્ત્યુત્તાનામૂર્ધ્વો અધયજ્જુહૂભિઃ ॥ ૧૭૪૮

૪ ८ ૩ ૧૪૦૧a  ઇદઁ શ્રેષ્ઠં જ્યોતિષાં જ્યોતિરાગાચ્ચિત્રઃ પ્રકેતો અજનિષ્ટ વિભ્વા ।
૪ ८ ૩ ૧૪૦૧c  યથા પ્રસૂતા સવિતુઃ સવાયૈવા રાત્ર્યુષસે યોનિમારૈક્ ॥ ૧૭૪૯
૪ ८ ૩ ૧૪૦૨a  રુશદ્વત્સા રુશતી શ્વેત્યાગાદારૈગુ કૃષ્ણા સદનાન્યસ્યાઃ ।
૪ ८ ૩ ૧૪૦૨c  સમાનબન્ધૂ અમૃતે અનૂચી દ્યાવા વર્ણં ચરત આમિનાને ॥ ૧૭૫૦
૪ ८ ૩ ૧૪૦૩a  સમાનો અધ્વા સ્વસ્રોરનન્તસ્તમન્યાન્યા ચરતો દેવશિષ્ટે ।
૪ ८ ૩ ૧૪૦૩c  ન મેથેતે ન તસ્થતુઃ સુમેકે નક્તોષાસા સમનસા વિરૂપે ॥ ૧૭૫૧

૪ ८ ૩ ૧૫૦૧a  આ ભાત્યગ્નિરુષસામનીકમુદ્વિપ્રાણાં દેવયા વાચો અસ્થુઃ ।
૪ ८ ૩ ૧૫૦૧c  અર્વાઞ્ચા નૂનઁ રથ્યેહ યાતં પીપિવાઁસમશ્વિના ઘર્મમચ્છ ॥ ૧૭૫૨

૪ ૮ ૩ ૧૫૦૨a  ન સँસ્કૃતં પ્ર મિમીતો ગમિષ્ઠાન્તિ નૂનમશ્વિનોપસ્તુતેહ ।
૪ ૮ ૩ ૧૫૦૨c  દિવાભિપિત્વેવસાગમિષ્ઠા પ્રત્યવર્ત્તિં દાશુષે શમ્ભવિષ્ઠા ॥ ૧૭૫૩
૪ ૮ ૩ ૧૫૦૩a  ઉતા યાતँ સઙ્ગવે પ્રાતરહ્નો મધ્યન્દિન ઉદિતા સૂર્યસ્ય ।
૪ ૮ ૩ ૧૫૦૩c  દિવા નક્તમવસા શન્તમેન નેદાનીં પીતિરશ્વિના તતાન ॥ ૧૭૫૪

૪ ૮ ૩ ૧૬૦૧a  એતા ઉ ત્યા ઉષસઃ કેતુમક્રત પૂર્વે અર્ધે રજસો ભાનુમઞ્જતે ।
૪ ૮ ૩ ૧૬૦૧c  નિષ્કૃણ્વાના આયુધાનીવ ધૃષ્ણવઃ પ્રતિ ગાવોઽરુષીર્યન્તિ માતરઃ ॥ ૧૭૫૫
૪ ૮ ૩ ૧૬૦૨a  ઉદપપ્તન્નરુણા ભાનવો વૃથા સ્વાયુજો અરુષીર્ગા અયુક્ષત ।
૪ ૮ ૩ ૧૬૦૨c  અક્રન્નુષાસો વયુનાનિ પૂર્વથા રુશન્તં ભાનુમરુષીરશિશ્રયુઃ ॥ ૧૭૫૬
૪ ૮ ૩ ૧૬૦૩a  અર્ચન્તિ નારીરપસો ન વિષ્ટિભિઃ સમાનેન યોજનેના પરાવતઃ ।
૪ ૮ ૩ ૧૬૦૩c  ઇષં વહન્તીઃ સુકૃતે સુદાનવે વિશ્વેદહ યજમાનાય સુન્વતે ॥ ૧૭૫૭

૪ ૮ ૩ ૧૭૦૧a  અબોધ્યગ્નિર્જ્મ ઉદેતિ સૂર્યો વ્યૂ૩ષાશ્ચન્દ્રા મહ્યાવો અર્ચિષા ।
૪ ૮ ૩ ૧૭૦૧c  આયુક્ષાતામશ્વિના યાતવે રથં પ્રાસાવીદ્દેવઃ સવિતા જગત્પૃથક્ ॥ ૧૭૫૮
૪ ૮ ૩ ૧૭૦૨a  યદ્યુઞ્જાથે વૃષણમશ્વિના રથં ઘૃતેન નો મધુના ક્ષત્રમુક્ષતમ્ ।
૪ ૮ ૩ ૧૭૦૨c  અસ્માકં બ્રહ્મ પૃતનાસુ જિન્વતં વયં ધના શૂરસાતા ભજેમહિ ॥ ૧૭૫૯
૪ ૮ ૩ ૧૭૦૩a  અર્વાઙ્ત્રિચક્રો મધુવાહનો રથો જીરાશ્વો અશ્વિનોર્યાતુ સુષ્ટુતઃ ।
૪ ૮ ૩ ૧૭૦૩c  ત્રિવન્ધુરો મઘવા વિશ્વસૌભગઃ શં ન આ વક્ષદ્દ્વિપદે ચતુષ્પદે ॥ ૧૭૬૦

૪ ૮ ૩ ૧૮૦૧a  પ્ર તે ધારા અસશ્ચતો દિવો ન યન્તિ વૃષ્ટયઃ ।
૪ ૮ ૩ ૧૮૦૧c  અચ્છા વાજँ સહસ્રિણમ્ ॥ ૧૭૬૧
૪ ૮ ૩ ૧૮૦૨a  અભિ પ્રિયાણિ કાવ્યા વિશ્વા ચક્ષાણો અર્ષતિ ।
૪ ૮ ૩ ૧૮૦૨c  હરિસ્તુઞ્જાન આયુધા ॥ ૧૭૬૨
૪ ૮ ૩ ૧૮૦૩a  સ મર્મૃજાન આયુભિરિભો રાજેવ સુવ્રતઃ ।
૪ ૮ ૩ ૧૮૦૩c  શ્યેનો ન વँસુ ષીદતિ ॥ ૧૭૬૩
૪ ૮ ૩ ૧૮૦૪a  સ નો વિશ્વા દિવો વસૂતો પૃથિવ્યા અધિ ।
૪ ૮ ૩ ૧૮૦૪c  પુનાન ઇન્દવા ભર ॥ ૧૭૬૪

નવમ પ્રપાઠકઃ ।  પ્રથમોઽર્ધઃ

૪ ૯ ૧ ૦૧૦૧a  પ્રાસ્ય ધારા અક્ષરન્વૃષ્ણઃ સુતસ્યૌજસા ।
૪ ૯ ૧ ૦૧૦૧c  દેવाँ અનુ પ્રભૂષતઃ ॥ ૧૭૬૫
૪ ૯ ૧ ૦૧૦૨a  સપ્તિં મૃજન્તિ વેધસો ગૃણન્તઃ કારવો ગિરા ।
૪ ૯ ૧ ૦૧૦૨c  જ્યોતિર્જજ્ઞાનમુક્થ્યમ્ ॥ ૧૭૬૬
૪ ૯ ૧ ૦૧૦૩a  સુષહા સોમ તાનિ તે પુનાનાય પ્રભૂવસો ।

૪ ૯ ૧ ૦૧૦૩c  વર્ધા સમુદ્રમુક્થ્યમ્ ॥ ૧૭૬૭

૪ ૯ ૧ ૦૨૦૧a  એષ બ્રહ્મા ય ઋત્વિય ઇન્દ્રો નામ શ્રુતો ગૃણે ॥ ૧૭૬૮
૪ ૯ ૧ ૦૨૦૨a  ત્વામિચ્છવસસ્પતે યન્તિ ગિરો ન સંયતઃ ॥ ૧૭૬૯
૪ ૯ ૧ ૦૨૦૩a  વિ સ્રુતયો યથા પથા ઇન્દ્ર ત્વદ્યન્તુ રાતયઃ ॥ ૧૭૭૦

૪ ૯ ૧ ૦૩૦૧a  આ ત્વા રથં યથોતયે સુમ્નાય વર્ત્તયામસિ ।
૪ ૯ ૧ ૦૩૦૧c  તુવિકૂર્મિમૃતીષહમિન્દ્રં શવિષ્ઠ સત્પતિમ્ ॥ ૧૭૭૧
૪ ૯ ૧ ૦૩૦૨a  તુવિશુષ્મ તુવિક્રતો શચીવો વિશ્વયા મતે ।
૪ ૯ ૧ ૦૩૦૨c  આ પપ્રાથ મહિત્વના ॥ ૧૭૭૨
૪ ૯ ૧ ૦૩૦૩a  યસ્ય તે મહિના મહઃ પરિ જ્માયન્તમીયતુઃ ।
૪ ૯ ૧ ૦૩૦૩c  હસ્તા વજ્રઁ હિરણ્યયમ્ ॥ ૧૭૭૩

૪ ૯ ૧ ૦૪૦૧a  આ યઃ પુરં નાર્મિણીમદીદેદત્યઃ કવિર્નભન્યોઽ નાર્વ ।
૪ ૯ ૧ ૦૪૦૧c  સૂરો ન રુરુક્વાઞ્છતાત્મા ॥ ૧૭૭૪
૪ ૯ ૧ ૦૪૦૨a  અભિ દ્વિજન્મા ત્રી રોચનાનિ વિશ્વા રજાઁસિ શુશુચનો અસ્થાત્ ।
૪ ૯ ૧ ૦૪૦૨c  હોતા યજિષ્ઠો અપાઁ સધસ્થે ॥ ૧૭૭૫
૪ ૯ ૧ ૦૪૦૩a  અયઁ સ હોતા યો દ્વિજન્મા વિશ્વા દધે વાર્યાણિ શ્રવસ્યા ।
૪ ૯ ૧ ૦૪૦૩c  મર્તો યો અસ્મૈ સુતુકો દદાશ ॥ ૧૭૭૬

૪ ૯ ૧ ૦૫૦૧a  અગ્ને તમદ્યાશ્વં ન સ્તોમૈઃ ક્રતું ન ભદ્રઁ હૃદિસ્પૃષમ્ ।
૪ ૯ ૧ ૦૫૦૧c  ઋધ્યામા ત ઓહૈઃ ॥ ૧૭૭૭
૪ ૯ ૧ ૦૫૦૨a  અધા હ્યગ્ને ક્રતોર્ભદ્રસ્ય દક્ષસ્ય સાધોઃ ।
૪ ૯ ૧ ૦૫૦૨c  રથીરૃતસ્ય બૃહતો બભૂથ ॥ ૧૭૭૮
૪ ૯ ૧ ૦૫૦૩a  એભિર્નો અર્કૈર્ભવા નો અર્વાઙ્ક્સ્વાઽર્ણ જ્યોતિઃ ।
૪ ૯ ૧ ૦૫૦૩c  અગ્ને વિશ્વેભિઃ સુમના અનીકૈઃ ॥ ૧૭૭૯

૪ ૯ ૧ ૦૬૦૧a  અગ્ને વિવસ્વદુષસશ્ચિત્રઁ રાધો અમર્ત્ય ।
૪ ૯ ૧ ૦૬૦૧c  આ દાશુષે જાતવેદો વહા ત્વમદ્યા દેવાઁ ઉષર્બુધઃ ॥ ૧૭૮૦
૪ ૯ ૧ ૦૬૦૨a  જુષ્ટો હિ દૂતો અસિ હવ્યવાહનોઽગ્ને રથીરધ્વરાણામ્ ।
૪ ૯ ૧ ૦૬૦૨c  સજૂરશ્વિભ્યામુષસા સુવીર્યમસ્મે ધેહિ શ્રવો બૃહત્ ॥ ૧૭૮૧

૪ ૯ ૧ ૦૭૦૧a  વિધું દદ્રાણઁ સમને બહૂનાં યુવાનઁ સન્તં પલિતો જગાર ।
૪ ૯ ૧ ૦૭૦૧c  દેવસ્ય પશ્ય કાવ્યં મહિત્વાદ્યા મમાર સ હ્યઃ સમાન ॥ ૧૭૮૨
૪ ૯ ૧ ૦૭૦૨a  શાક્મના શાકો અરુણઃ સુપર્ણ આ યો મહઃ શૂરઃ સનાદનીડઃ ।
૪ ૯ ૧ ૦૭૦૨c  યચ્ચિકેત સત્યમિત્તન્ન મોઘં વસુ સ્પાર્હમુત જેતોત દાતા ॥ ૧૭૮૩

૪ ૯ ૧ ૦૭૦૩a ઐભિર્દદે વૃષ્ણ્યા પૌઁસ્યાનિ યેભિરૌક્ષદ્વૃત્રહત્યાય વજ્રી ।
૪ ૯ ૧ ૦૭૦૩c યે કર્મણઃ ક્રિયમાણસ્ય મહ્ન ઋતેકર્મમુદજાયન્ત દેવાઃ ॥ ૧૭૮૪

૪ ૯ ૧ ૦૮૦૧a અસ્તિ સોમો અયઁ સુતઃ પિબન્ત્યસ્ય મરુતઃ ।
૪ ૯ ૧ ૦૮૦૧c ઉત સ્વરાજો અશ્વિના ॥ ૧૭૮૫
૪ ૯ ૧ ૦૮૦૨a પિબન્તિ મિત્રો અર્યમા તના પૂતસ્ય વરુણઃ ।
૪ ૯ ૧ ૦૮૦૨c ત્રિષધસ્થસ્ય જાવતઃ ॥ ૧૭૮૬
૪ ૯ ૧ ૦૮૦૩a ઉતો ન્વસ્ય જોષમા ઇન્દ્રઃ સુતસ્ય ગોમતઃ ।
૪ ૯ ૧ ૦૮૦૩c પ્રાતર્હોતેવ મત્સતિ ॥ ૧૭૮૭

૪ ૯ ૧ ૦૯૦૧a બણ્મહાઁ અસિ સૂર્ય બડાદિત્ય મહાઁ અસિ ।
૪ ૯ ૧ ૦૯૦૧c મહસ્તે સતો મહિમા પનિષ્તમ મહ્ના દેવ મહાઁ અસિ ॥ ૧૭૮૮
૪ ૯ ૧ ૦૯૦૨a બટ્ સૂર્ય શ્રવસા મહાઁ અસિ સત્રા દેવ મહાઁ અસિ ।
૪ ૯ ૧ ૦૯૦૨c મહ્ના દેવાનામસુર્યઃ પુરોહિતો વિભુ જ્યોતિરદાભ્યમ્ ॥ ૧૭૮૯

૪ ૯ ૧ ૧૦૦૧a ઉપ નો હરિભિઃ સુતં યાહિ મદાનાં પતે ।
૪ ૯ ૧ ૧૦૦૧c ઉપ નો હરિભિઃ સુતમ્ ॥ ૧૭૯૦
૪ ૯ ૧ ૧૦૦૨a દ્વિતા યો વૃત્રહન્તમો વિદ ઇન્દ્રઃ શતક્રતુઃ ।
૪ ૯ ૧ ૧૦૦૨c ઉપ નો હરિભિઃ સુતમ્ ॥ ૧૭૯૧
૪ ૯ ૧ ૧૦૦૩a ત્વઁ હિ વૃત્રહન્નેષાં પાતા સોમાનામસિ ।
૪ ૯ ૧ ૧૦૦૩c ઉપ નો હરિભિઃ સુતમ્ ॥ ૧૭૯૨

૪ ૯ ૧ ૧૧૦૧a પ્ર વો મહે મહેવૃધે ભરધ્વં પ્રચેતસે પ્ર સુમતિં કૃણુધ્વમ્ ।
૪ ૯ ૧ ૧૧૦૧c વિશઃ પૂર્વીઃ પ્ર ચર ચર્ષણિપ્રાઃ ॥ ૧૭૯૩
૪ ૯ ૧ ૧૧૦૨a ઉરુવ્યચસે મહિને સુવૃક્તિમિન્દ્રાય બ્રહ્મ જનયન્ત વિપ્રાઃ ।
૪ ૯ ૧ ૧૧૦૨c તસ્ય વ્રતાનિ ન મિનન્તિ ધીરાઃ ॥ ૧૭૯૪
૪ ૯ ૧ ૧૧૦૩a ઇન્દ્રં વાણીરનુત્તમન્યુમેવ સત્રા રાજાનં દધિરે સહધ્યૈ ।
૪ ૯ ૧ ૧૧૦૩c હર્યશ્વાય બર્હયા સમાપીન્ ॥ ૧૭૯૫

૪ ૯ ૧ ૧૨૦૧a યદિન્દ્ર યાવતસ્ત્વમેતાવદહમીશીય ।
૪ ૯ ૧ ૧૨૦૧c સ્તોતારમિદ્દધિષે રદાવસો ન પાપત્વાય રઁસિષમ્ ॥ ૧૭૯૬
૪ ૯ ૧ ૧૨૦૨a શિક્ષેયમિન્મહયતે દિવેદિવે રાય આ કુહચિદ્વિદે ।
૪ ૯ ૧ ૧૨૦૨c ન હિ ત્વદન્યન્મઘવન્ન આપ્યં વસ્યો અસ્તિ પિતા ચ ન ॥ ૧૭૯૭

૪ ૯ ૧ ૧૩૦૧a શ્રુધી હવં વિપિપાનસ્યાદ્રેર્બોધા વિપ્રસ્યાર્ચતો મનીષામ્ ।
૪ ૯ ૧ ૧૩૦૧c કૃષ્વા દુવાઁસ્યન્તમા સચેમા ॥ ૧૭૯૮

૪ ૯ ૧ ૧૩૦૨a  ન તે ગિરો અપિ મૃષ્યે તુરસ્ય ન સુષ્ટુતિમસુર્યસ્ય વિદ્વાન્ ।
૪ ૯ ૧ ૧૩૦૨c  સદા તે નામ સ્વયશો વિવક્મિ ॥ ૧૭૯૯
૪ ૯ ૧ ૧૩૦૩a  ભૂરિ હિ તે સવના માનુષેષુ ભૂરિ મનીષી હવતે ત્વામિત્ ।
૪ ૯ ૧ ૧૩૦૩c  મારે અસ્મન્મઘવઞ્જ્યોક્કઃ ॥ ૧૮૦૦

૪ ૯ ૧ ૧૪૦૧a  પ્રો ષ્વસ્મૈ પુરોરથમિન્દ્રાય શૂષમર્ચત ।
૪ ૯ ૧ ૧૪૦૧c  અભીકે ચિદુ લોકકૃત્સઙ્ગે સમત્સુ વૃત્રહ ।
૪ ૯ ૧ ૧૪૦૧e  અસ્માકં બોધિ ચોદિતા નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૮૦૧
૪ ૯ ૧ ૧૪૦૨a  ત્વઁ સિન્ધૂઁરવાસૃજોઽધરાચો અહન્નહિમ્ ।
૪ ૯ ૧ ૧૪૦૨c  અશત્રુરિન્દ્ર જજ્ઞિષે વિશ્વં પુષ્યસિ વાર્યમ્ ।
૪ ૯ ૧ ૧૪૦૨e  તં ત્વા પરિ ષ્વજામહે નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૮૦૨
૪ ૯ ૧ ૧૪૦૩a  વિ ષુ વિશ્વા અરાતયોઽર્યો નશન્ત નો ધિયઃ ।
૪ ૯ ૧ ૧૪૦૩c  અસ્તાસિ શત્રવે વધં યો ન ઇન્દ્ર જિઘાઁસતિ ।
૪ ૯ ૧ ૧૪૦૩e  યા તે રાતિર્દદિવસુ નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૮૦૩

૪ ૯ ૧ ૧૫૦૧a  રેવાઁ ઇદ્રેવત સ્તોતા સ્યાત્ત્વાવતો મઘોનઃ ।
૪ ૯ ૧ ૧૫૦૧c  પ્રેદુ હરિવઃ સુતસ્ય ॥ ૧૮૦૪
૪ ૯ ૧ ૧૫૦૨a  ઉક્થં ચ ન શસ્યમાનં નાગો રયિરા ચિકેત ।
૪ ૯ ૧ ૧૫૦૨c  ન ગાયત્રં ગીયમાનમ્ ॥ ૧૮૦૫
૪ ૯ ૧ ૧૫૦૩a  મા ન ઇન્દ્ર પીયત્નવે મા શર્ધતે પરા દાઃ ।
૪ ૯ ૧ ૧૫૦૩c  શિક્ષા શચીવઃ શચીભિઃ ॥ ૧૮૦૬

૪ ૯ ૧ ૧૬૦૧a  એન્દ્ર યાહિ હરિભિરુપ કણ્વસ્ય સુષ્ટુતિમ્ ।
૪ ૯ ૧ ૧૬૦૧c  દિવો અમુષ્ય શાસતો દિવં યય દિવાવસો ॥ ૧૮૦૭
૪ ૯ ૧ ૧૬૦૨a  અત્રા વિ નેમિરેષામુરાં ન ધૂનુતે વૃકઃ ।
૪ ૯ ૧ ૧૬૦૨c  દિવો અમુષ્ય શાસતો દિવં યય દિવાવસો ॥ ૧૮૦૮
૪ ૯ ૧ ૧૬૦૩a  આ ત્વા ગ્રાવા વદનીહ સોમી ઘોષેણ વક્ષતુ ।
૪ ૯ ૧ ૧૬૦૩c  દિવો અમુષ્ય શાસતો દિવં યય દિવાવસો ॥ ૧૮૦૯

૪ ૯ ૧ ૧૭૦૧a  પવસ્વ સોમ મન્દયન્નિન્દ્રાય મધુમત્તમઃ ॥ ૧૮૧૦
૪ ૯ ૧ ૧૭૦૨a  તે સુતાસો વિપશ્ચિતઃ શુક્રા વાયુમસૃક્ષત ॥ ૧૮૧૧
૪ ૯ ૧ ૧૭૦૩a  અસૃગ્રં દેવવીતયે વાજયન્તો રથા ઇવ ॥ ૧૮૧૨

૪ ૯ ૧ ૧૮૦૧a  અગ્નિઁ હોતારં મન્યે દાસ્વન્તં વસોઃ સૂનુઁ સહસો જાતવેદસં વિપ્રં ન જાતવેદસમ્ ।
૪ ૯ ૧ ૧૮૦૧c  ય ઊર્ધ્વરો સ્વધ્વરો દેવો દેવાચ્યા કૃપા ।

૪ ૯ ૧ ૧૮૦૧e ઘૃતસ્ય વિભ્રાષ્ટિમનુ શુક્રશોચિષ આજુહ્વાનસ્ય સર્પિષઃ ॥ ૧૮૧૩
૪ ૯ ૧ ૧૮૦૨a યજિષ્ઠં ત્વા યજમાના હુવેમ જ્યેષ્ઠમઙ્ગિરસાં વિપ્ર મન્મભિર્વિપ્રેભિઃ શુક્ર મન્મભિઃ ।
૪ ૯ ૧ ૧૮૦૨c પરિજ્માનમિવ દ્યાઁ હોતારં ચર્ષણીનામ્ ।
૪ ૯ ૧ ૧૮૦૨e શોચિષ્કેશં વૃષણં યમિમા વિશઃ પ્રાવન્તુ જૂતયે વિશઃ ॥ ૧૮૧૪
૪ ૯ ૧ ૧૮૦૩a સ હિ પુરૂ ચિદોજસા વિરુક્મતા દીદ્યાનો ભવતિ દ્રુહન્તરઃ પરશુર્ન દ્રુહન્તરઃ ।
૪ ૯ ૧ ૧૮૦૩c વીડુ ચિદ્યસ્ય સમૃતૌ શ્રુવદ્વનેવ યત્સ્થિરમ્ ।
૪ ૯ ૧ ૧૮૦૩e નિષ્ષહમાણો યમતે નાયતે ધન્વાસહા નાયતે ॥ ૧૮૧૫

નવમ પ્રપાઠકઃ । દ્વિતીયોऽર્ધઃ

૪ ૯ ૨ ૦૧૦૧a અગ્ને તવ શ્રવો વયો મહિ ભ્રાજન્તે અર્ચયો વિભાવસો ।
૪ ૯ ૨ ૦૧૦૧c બૃહદ્ભાનો શવસા વાજમુક્થ્યઉં દધાસિ દાશુષે કવે ॥ ૧૮૧૬
૪ ૯ ૨ ૦૧૦૨a પાવકવર્ચાઃ શુક્રવર્ચા અનૂનવર્ચા ઉદિયર્ષિ ભાનુના ।
૪ ૯ ૨ ૦૧૦૨c પુત્રો માતરા વિચરન્નુપાવસિ પૃણક્ષિ રોદસી ઉભે ॥ ૧૮૧૭
૪ ૯ ૨ ૦૧૦૩a ઊર્જો નપાજ્જાતવેદઃ સુશસ્તિભિર્મન્દસ્વ ધીતિભિર્હિતઃ ।
૪ ૯ ૨ ૦૧૦૩c ત્વે ઇષઃ સં દધુર્ભૂરિવર્પસશ્ચિત્રોતયો વામજાતાઃ ॥ ૧૮૧૮
૪ ૯ ૨ ૦૧૦૪a ઇરજ્યન્નગ્ને પ્રથયસ્વ જન્તુભિરસ્મે રાયો અમર્ત્ય ।
૪ ૯ ૨ ૦૧૦૪c સ દર્શતસ્ય વપુષો વિ રાજસિ પૃણક્ષિ દર્શતં ક્રતુમ્ ॥ ૧૮૧૯
૪ ૯ ૨ ૦૧૦૫a ઇષ્કર્ત્તારમધ્વરસ્ય પ્રચેતસં ક્ષયન્તઁ રાધસો મહઃ ।
૪ ૯ ૨ ૦૧૦૫c રાતિં વામસ્ય સુભગાં મહીમિષં દધાસિ સાનસિઁ રયિમ્ ॥ ૧૮૨૦
૪ ૯ ૨ ૦૧૦૬a ઋતાવાનં મહિષં વિશ્વદર્શતમગ્નિઁ સુમ્નાય દધિરે પુરો જનાઃ ।
૪ ૯ ૨ ૦૧૦૬c શ્રુત્કર્ણં સપ્રથસ્તમં ત્વા ગિરા દૈવ્યં માનુષા યુગા ॥ ૧૮૨૧

૪ ૯ ૨ ૦૨૦૧a પ્ર સો અગ્ને તવોતિભિઃ સુવિરાભિસ્તરતિ વાજકર્મભિઃ ।
૪ ૯ ૨ ૦૨૦૧c યસ્ય ત્વઁ સખ્યમાવિથ ॥ ૧૮૨૨
૪ ૯ ૨ ૦૨૦૨a તવ દ્રપ્સો નીલવાન્વાશ ઋત્વિય ઇન્ધાનઃ સિષ્ણવા દદે ।
૪ ૯ ૨ ૦૨૦૨c ત્વં મહીનામુષસામસિ પ્રિયઃ ક્ષપો વસ્તુષુ રાજસિ ॥ ૧૮૨૩

૪ ૯ ૨ ૦૩૦૧a તમોષધીર્દધિરે ગર્ભમૃત્વિયં તમાપો અગ્નિં જનયન્ત માતરઃ ।
૪ ૯ ૨ ૦૩૦૧c તમિત્સમાનં વનિનશ્ચ વીરુધોऽન્તર્વતીશ્ચ સુવતે ચ વિશ્વહા ॥ ૧૮૨૪

૪ ૯ ૨ ૦૪૦૧a અગ્નિરિન્દ્રાય પવતે દિવિ શુક્રો વિ રાજતિ ।
૪ ૯ ૨ ૦૪૦૧c મહિષીવ વિ જાયતે ॥ ૧૮૨૫

૪ ૯ ૨ ૦૫૦૧a યો જાગાર તમૃચઃ કામયન્તે યો જાગાર તમુ સામાનિ યન્તિ ।
૪ ૯ ૨ ૦૫૦૧c યો જાગાર તમયઁ સોમ આહ તવાહમસ્મિ સખ્યે ન્યોકાઃ ॥ ૧૮૨૬

૪ ૯ ૨ ০૬০૧a  અગ્નિર્જાગાર તમૃચઃ કામયન્તેગ્નિર્જાગાર તમુ સામાનિ યન્તિ ।
૪ ૯ ૨ ০૬০૧c  અગ્નિર્જાગાર તમયઁ સોમ આહ તવાહમસ્મિ સખ્યે ન્યોકાઃ ॥ ૧૮૨૭

૪ ૯ ૨ ০૭০૧a  નમઃ સખિભ્યઃ પૂર્વસદ્ભ્યો નમઃ સાકન્નિષેભ્યઃ ।
૪ ૯ ૨ ০૭০૧c  યુઞ્જે વાચઁ શતપદીમ્ ॥ ૧૮૨૮
૪ ૯ ૨ ০૭০૨a  યુઞ્જે વાચઁ શતપદીં ગાયે સહસ્રવર્ત્તનિ ।
૪ ૯ ૨ ০૭০૨c  ગાયત્રં ત્રૈષ્ટુભં જગત્ ॥ ૧૮૨૯
૪ ૯ ૨ ০૭০3a  ગાયત્રં ત્રૈષ્ટુભં જગદ્વિશ્વા રૂપાણિ સમ્ભૃતા ।
૪ ૯ ૨ ০૭০3c  દેવા ઓકાઁસિ ચક્રિરે ॥ ૧૮૩૦

૪ ૯ ૨ ০૮০૧a  અગ્નિર્જ્યોતિર્જ્યોતિરગ્નિરિન્દ્રો જ્યોતિર્જ્યોતિરિન્દ્રઃ ।
૪ ૯ ૨ ০૮০૧c  સૂર્યો જ્યોતિર્જ્યોતિઃ સૂર્યઃ ॥ ૧૮૩૧
૪ ૯ ૨ ০૮০૨a  પુનરૂર્જા નિ વર્ત્તસ્વ પુનરગ્ન ઇષાયુષા ।
૪ ૯ ૨ ০૮০૨c  પુનર્નઃ પાહ્યઁહસઃ ॥ ૧૮૩૨
૪ ૯ ૨ ০૮০3a  સહ રય્યા નિ વર્તસ્વાગ્ને પિન્વસ્વ ધારયા ।
૪ ૯ ૨ ০૮০3c  વિશ્વપ્સ્ન્યા વિશ્વતસ્પરિ ॥ ૧૮૩૩

૪ ૯ ૨ ০૯০૧a  યદિન્દ્રાહં યથા ત્વમીશીય વસ્વ એક ઇત્ ।
૪ ૯ ૨ ০૯০૧c  સ્તોતા મે ગોસખા સ્યાત્ ॥ ૧૮૩૪
૪ ૯ ૨ ০૯০૨a  શિક્ષેયમસ્મૈ દિત્સેયઁ શચીપતે મનીષિણે ।
૪ ૯ ૨ ০૯০૨c  યદહં ગોપતિઃ સ્યામ્ ॥ ૧૮૩૫
૪ ૯ ૨ ০૯০3a  ધેનુષ્ટ ઇન્દ્ર સૂનૃતા યજમાનાય સુન્વતે ।
૪ ૯ ૨ ০૯০3c  ગામશ્વં પિપ્યુષી દુહે ॥ ૧૮૩૬

૪ ૯ ૨ ૧০০૧a  આપો હિ ષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન ।
૪ ૯ ૨ ૧০০૧c  મહે રણાય ચક્ષસે ॥ ૧૮૩૭
૪ ૯ ૨ ૧০০૨a  યો વઃ શિવતમો રસસ્તસ્ય ભાજયતેહ નઃ ।
૪ ૯ ૨ ૧০০૨c  ઉશતીરિવ માતરઃ ॥ ૧૮૩૮
૪ ૯ ૨ ૧০০3a  તસ્મા અરં ગમામ વો યસ્ય ક્ષયાય જિન્વથ ।
૪ ૯ ૨ ૧০০3c  આપો જનયથા ચ નઃ ॥ ૧૮૩૯

૪ ૯ ૨ ૧૧০૧a  વાત આ વાતુ ભેષજઁ શમ્ભુ મયોભુ નો હૃદે ।
૪ ૯ ૨ ૧૧০૧c  પ્ર ન આયૂઁષિ તારિષત્ ॥ ૧૮૪૦
૪ ૯ ૨ ૧૧০૨a  ઉત વાત પિતાસિ ન ઉત ભ્રાતોત નઃ સખા ।
૪ ૯ ૨ ૧૧০૨c  સ નો જીવાતવે કૃધિ ॥ ૧૮૪૧

૪ ૯ ૨ ૧૧૦૩a યદદો વાત તે ગૃહેઽમૃતં નિહિતં ગુહા ।
૪ ૯ ૨ ૧૧૦૩c તસ્યો નો દેહિ જીવસે ॥ ૧૮૪૨

૪ ૯ ૨ ૧૨૦૧a અભિ વાજી વિશ્વરૂપો જનિત્રઁ હિરણ્યયં બિભ્રદત્કઁ સુપર્ણઃ ।
૪ ૯ ૨ ૧૨૦૧c સૂર્યસ્ય ભાનુમૃતુથા વસાનઃ પરિ સ્વયં મેધમૃજ્રો જજાન ॥ ૧૮૪૩
૪ ૯ ૨ ૧૨૦૨a અપ્સુ રેતઃ શિશ્રિયે વિશ્વરૂપં તેજઃ પૃથિવ્યામધિ યત્સમ્બભૂવ ।
૪ ૯ ૨ ૧૨૦૨c અન્તરિક્ષે સ્વં મહિમાનં મિમાનઃ કનિક્રન્તિ વૃષ્ણો અશ્વસ્ય રેતઃ ॥ ૧૮૪૪
૪ ૯ ૨ ૧૨૦૩a અયઁ સહસ્રા પરિ યુક્તા વસાનઃ સૂર્યસ્ય ભાનું યજ્ઞો દાધાર ।
૪ ૯ ૨ ૧૨૦૩c સહસ્રદાઃ શતદા ભૂરિદાવા ધર્ત્તા દિવો ભુવનસ્ય વિશ્પતિઃ ॥ ૧૮૪૫

૪ ૯ ૨ ૧૩૦૧a નાકે સુપર્ણમુપ યત્પતન્તઁ હૃદા વેનન્તો અભ્યચક્ષત ત્વા ।
૪ ૯ ૨ ૧૩૦૧c હિરણ્યપક્ષં વરુણસ્ય દૂતં યમસ્ય યોનૌ શકુનં ભુરણ્યુમ્ ॥ ૧૮૪૬
૪ ૯ ૨ ૧૩૦૨a ઊર્ધ્વો ગન્ધર્વો અધિ નાકે અસ્થાત્પ્રત્યઙ્ચિત્રા બિભ્રદસ્યાયુધાનિ ।
૪ ૯ ૨ ૧૩૦૨c વસાનો અત્કઁ સુરભિં દૃશે કઁ સ્વ૩ર્ણ નામ જનત પ્રિયાણિ ॥ ૧૮૪૭
૪ ૯ ૨ ૧૩૦૩a દ્રપ્સઃ સમુદ્રમભિ યજ્જિગાતિ પશ્યન્ગૃધ્રસ્ય ચક્ષસા વિધર્મન્ ।
૪ ૯ ૨ ૧૩૦૩c ભાનુઃ શુક્રેણ શોચિષા ચકાનસ્તૃતીયે ચક્રે રજસિ પ્રિયાણિ ॥ ૧૮૪૮

નવમ પ્રપાઠકઃ । તૃતીયોઽર્ધઃ

૪ ૯ ૩ ૦૧૦૧a આશુઃ શિશાનો વૃષભો ન ભીમો ઘનાઘનઃ ક્ષોભણશ્ચર્ષણીનામ્ ।
૪ ૯ ૩ ૦૧૦૧c સઙ્ક્રન્દનોઽનિમિષ એકવીરઃ શતઁ સેના અજયત્સાકમિન્દ્રઃ ॥ ૧૮૪૯
૪ ૯ ૩ ૦૧૦૨a સઙ્ક્રન્દનેનાનિમિષેણ જિષ્ણુના યુત્કારેણ દુશ્ચ્યવનેન ધૃષ્ણુના ।
૪ ૯ ૩ ૦૧૦૨c તદિન્દ્રેણ જયત તત્સહધ્વં યુધો નર ઇષુહસ્તેન વૃષ્ણા ॥ ૧૮૫૦
૪ ૯ ૩ ૦૧૦૩a સ ઇષુહસ્તૈઃ સ નિષઙ્ગિભિર્વશી સઁસ્રષ્ટા સ યુધ ઇન્દ્રો ગણેન ।
૪ ૯ ૩ ૦૧૦૩c સઁ સૃષ્ટજિત્સોમપા બાહુશર્ધ્યૂ૩ગ્રધન્વા પ્રતિહિતાભિરસ્તા ॥ ૧૮૫૧

૪ ૯ ૩ ૦૨૦૧a બૃહસ્પતે પરિ દીયા રથેન રક્ષોહામિત્રાઁ અપબાધમાનઃ ।
૪ ૯ ૩ ૦૨૦૧c પ્રભઞ્જન્સેનાઃ પ્રમૃણો યુધા જયન્નસ્માકમેધ્યવિતા રથાનામ્ ॥ ૧૮૫૨
૪ ૯ ૩ ૦૨૦૨a બલવિજ્ઞાયઃ સ્થવિરઃ પ્રવીરઃ સહસ્વાન્વાજી સહમાન ઉગ્રઃ ।
૪ ૯ ૩ ૦૨૦૨c અભિવીરો અભિસત્વા સહોજા જૈત્રમિન્દ્ર રથમા તિષ્ઠ ગોવિત્ ॥ ૧૮૫૩
૪ ૯ ૩ ૦૨૦૩a ગોત્રભિદં ગોવિદં વજ્રબાહું જયન્તમજ્મ પ્રમૃણન્તમોજસા ।
૪ ૯ ૩ ૦૨૦૩c ઇમઁ સજાતા અનુ વીરયધ્વમિન્દ્રઁ સખાયો અનુ સઁ રભધ્વમ્ ॥ ૧૮૫૪

૪ ૯ ૩ ૦૩૦૧a અભિ ગોત્રાણિ સહસા ગાહમાનોઽદયો વીરઃ શતમન્યુરિન્દ્રઃ ।
૪ ૯ ૩ ૦૩૦૧c દુશ્ચ્યવનઃ પૃતનાષાડયુધ્યો૩ઽસ્માકઁ સેના અવતુ પ્ર યુત્સુ ॥ ૧૮૫૫
૪ ૯ ૩ ૦૩૦૨a ઇન્દ્ર આસાં નેતા બૃહસ્પતિર્દક્ષિણા યજ્ઞઃ પુર એતુ સોમઃ ।

૪ ૯ ૩ ૦૩૦૨c  દેવસેનાનામભિભઞ્જતીનાં જયન્તીનાં મરુતો યન્ત્વગ્રમ્ ॥ ૧૮૫૬
૪ ૯ ૩ ૦૩૦૩a  ઇન્દ્રસ્ય વૃષ્ણો વરુણસ્ય રાજ્ઞ આદિત્યાનાં મરુતાઁ શર્ધ ઉગ્રમ્ ।
૪ ૯ ૩ ૦૩૦૩c  મહામનસાં ભુવનચ્યવાનાં ઘોષો દેવાનાં જયતામુદસ્થાત્ ॥ ૧૮૫૭

૪ ૯ ૩ ૦૪૦૧a  ઉદ્ધર્ષય મઘવન્નાયુધાન્યુત્સત્વનાં મામકાનાં મનાઁસિ ।
૪ ૯ ૩ ૦૪૦૧c  ઉદ્વૃત્રહન્વાજિનાં વાજિનાન્યુદ્રથાનાં જયતાં યન્તુ ઘોષાઃ ॥ ૧૮૫૮
૪ ૯ ૩ ૦૪૦૨a  અસ્માકમિન્દ્રઃ સમૃતેષુ ધ્વજેષ્વસ્માકં યા ઇષવસ્તા જયન્તુ ।
૪ ૯ ૩ ૦૪૦૨c  અસ્માકં વીરા ઉત્તરે ભવન્ત્વસ્માઁ ઉ દેવા અવતા હવેષુ ॥ ૧૮૫૯
૪ ૯ ૩ ૦૪૦૩a  અસૌ યા સેના મરુતઃ પરેષામભ્યેતિ ન ઓજસા સ્પર્ધમાના ।
૪ ૯ ૩ ૦૪૦૩c  તાં ગૂહત તમસાપવ્રતેન યથૈતેષામન્યો અન્યં ન જાનાત્ ॥ ૧૮૬૦

૪ ૯ ૩ ૦૫૦૧a  અમીષાં ચિત્તં પ્રતિલોભયન્તી ગૃહાણાઙ્ગાન્યપ્વે પરેહિ ।
૪ ૯ ૩ ૦૫૦૧c  અભિ પ્રેહિ નિર્દહ હૃત્સુ શોકૈરન્ધેનામિત્રાસ્તમસા સચન્તામ્ ॥ ૧૮૬૧
૪ ૯ ૩ ૦૫૦૨a  પ્રેતા જયતા નર ઇન્દ્રો વઃ શર્મ યચ્છતુ ।
૪ ૯ ૩ ૦૫૦૨c  ઉગ્રા વઃ સન્તુ બાહવોઽનાધૃષ્યા યથાસથ ॥ ૧૮૬૨
૪ ૯ ૩ ૦૫૦૩a  અવસૃષ્ટા પરા પત શરવ્યે બ્રહ્મસઁશિતે ।
૪ ૯ ૩ ૦૫૦૩c  ગચ્છામિત્રાન્પ્ર પદ્યસ્વ મામીષાં કં ચ નોચ્છિષઃ ॥ ૧૮૬૩

૪ ૯ ૩ ૦૬૦૧a  કઙ્કાઃ સુપર્ણા અનુ યન્ત્વેનાન્ગૃધ્રાણામન્નમસાવસ્તુ સેના ।
૪ ૯ ૩ ૦૬૦૧c  મૈષાં મોચ્યઘહારશ્ચ નેન્દ્ર વયાઁસ્યેનાનનુસંયન્તુ સર્વાન્ ॥ ૧૮૬૪
૪ ૯ ૩ ૦૬૦૨a  અમિત્રસેનાં મઘવન્નસ્માઞ્છત્રુયતીમભિ ।
૪ ૯ ૩ ૦૬૦૨c  ઉભૌ તામિન્દ્ર વૃત્રહન્નગ્નિશ્ચ દહતં પ્રતિ ॥ ૧૮૬૫
૪ ૯ ૩ ૦૬૦૩a  યત્ર બાણાઃ સમ્પતન્તિ કુમારા વિશિખા ઇવ ।
૪ ૯ ૩ ૦૬૦૩c  તત્રા નો બ્રહ્મણસ્પતિરદિતિઃ શર્મ યચ્છતુ વિશ્વાહા શર્મ યચ્છતુ ॥ ૧૮૬૬

૪ ૯ ૩ ૦૭૦૧a  વિ રક્ષો વિ મૃધો જહિ વિ વૃત્રસ્ય હનૂ રુજ ।
૪ ૯ ૩ ૦૭૦૧c  વિ મન્યુમિન્દ્ર વૃત્રહન્નમિત્રસ્યાભિદાસતઃ ॥ ૧૮૬૭
૪ ૯ ૩ ૦૭૦૨a  વિ ન ઇન્દ્ર મૃધો જહિ નીચા યચ્છ પૃતન્યતઃ ।
૪ ૯ ૩ ૦૭૦૨c  યો અસ્માઁ અભિદાસત્યધરં ગમયા તમઃ ॥ ૧૮૬૮
૪ ૯ ૩ ૦૭૦૩a  ઇન્દ્રસ્ય બાહૂ સ્થવિરૌ યુવાનાવનાધૃષ્યૌ સુપ્રતીકાવસહ્યૌ ।
૪ ૯ ૩ ૦૭૦૩c  તૌ યુઞ્જીત પ્રથમૌ યોગ આગતે યાભ્યાં જિતમસુરાણાઁ સહો મહત્ ॥ ૧૮૬૯

૪ ૯ ૩ ૦૮૦૧a  મર્માણિ તે વર્મણા ચ્છાદયામિ સોમસ્ત્વા રાજામૃતેનાનુ વસ્તામ્ ।
૪ ૯ ૩ ૦૮૦૧c  ઉરોર્વરીયો વરુણસ્તે કૃણોતુ જયન્તં ત્વાનુ દેવા મદન્તુ ॥ ૧૮૭૦
૪ ૯ ૩ ૦૮૦૨a  અન્ધા અમિત્રા ભવતાશીર્ષાણોઽહય ઇવ ।

૪ ૯ ૩ ૦૮૦૨c તેષાં વો અગ્નિનુન્નાનામિન્દ્રો હન્તુ વરંવરમ્ ॥ ૧૮૭૧

૪ ૯ ૩ ૦૮૦૩a યો નઃ સ્વોऽરણો યશ્ચ નિષ્ટ્યો જિઘાઁસતિ ।

૪ ૯ ૩ ૦૮૦૩c દેવાસ્તઁ સર્વે ધૂર્વન્તુ બ્રહ્મ વર્મ મમાન્તરઁ શર્મ વર્મ મમાન્તરમ્ ॥ ૧૮૭૨

૪ ૯ ૩ ૦૯૦૧a મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ પરાવત આ જગન્થા પરસ્યાઃ ।

૪ ૯ ૩ ૦૯૦૧c સૃકઁ સઁશાય પવિમિન્દ્ર તિગ્મં વિ શત્રૂં તાઢિ વિ મૃધો નુદસ્વ ॥ ૧૮૭૩

૪ ૯ ૩ ૦૯૦૨a ભદ્રં કર્ણેભિઃ શ઼ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।

૪ ૯ ૩ ૦૯૦૨c સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁ સસ્તનૂભિર્વ્યશેમહિ દેવહિતં યદાયુઃ ॥ ૧૮૭૪

૪ ૯ ૩ ૦૯૦૩a સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।

૪ ૯ ૩ ૦૯૦૩c સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

૪ ૯ ૩ ૦૯૦૩e ૐ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૧૮૭૫

॥ ઇત્યુત્તરાર્ચિકઃ ॥

॥ ઇતિ સામવેદસંહિતા સમાપ્તા ॥

Encoded and proofread by Anshuman Pandey pandey at umich.edu

*Samaveda Samhita Kauthuma ShAkha*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*